... Public Instruction, Mysore.

SELECTIONS IN SANSKRIT FOR HIGH SCHOOL CLA

संस्कृतकाव्यसंग्रहः

FIRST EDITION—3,000 COPIES

MYSORE
PRINTED AT THE GOVERNMENT BRANCH PRESS
1926

Price ~~0-9-~~6 Annas.
0-3-0

Department of Public Instruction, Mysore.

SELECTIONS IN SANSKRIT FOR HIGH SCHOOL CLASSES

संस्कृतकाव्यसंग्रहः

FIRST EDITION—3,000 COPIES

MYSORE
PRINTED AT THE GOVERNMENT BRANCH PRESS
1926

विषयानुक्रमणिका.

॥ श्रीः ॥

रघुवंशम्

प्रथमः सर्गः

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १
क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ २
मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥ ३
अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ ४
सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥ ५
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥ ६
त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥ ७
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥ ८
रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ ९

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ १०
वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥ ११
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥ १२
व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥ १३
सर्वातिरिक्तसारेण सर्वतेजोभिभाविना ।
स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥ १४
आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥ १५
भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥ १३
रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥ १७
प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥ १८
सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठता बुद्धिर्मौर्वी धनुषि चातता ॥ १९
तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥ २०
जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ॥ २१
ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥ २२

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना ॥ २३
प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥ २४
स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥ २५
दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥ २६
न किलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥ २७
द्वेष्योऽपि संमतः शिष्टस्तस्यार्थस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥ २८
तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथाहि सर्वे तस्यासन्परार्थैकफला गुणाः ॥ २९
स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥ ३०
तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥ ३१
कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥ ३२
तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः ।
विलम्बितफलैः कालं स निनाय मनोरथैः ॥ ३३
संतानार्थाय विधये स्वभुजादवतारिता ।
तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ॥ ३४
अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ।
तौ दंपती वशिष्ठस्य गुरोर्जग्मतुराश्रमम् ॥ ३५

स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥ ३६
मा भूदाश्रमपीडेति परिमेयपुरःसरौ ।
अनुभावविशेषात्तु सेनापरिवृताविव ॥ ३७
सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥ ३८
मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ॥ ३९
परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥ ४०
श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम् ।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥ ४१
पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः ।
रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ॥ ४२
सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।
आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम् ॥ ४३
ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम् ।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ॥ ४४
हैयंगवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥ ४५
काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः ।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥ ४६
तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः ।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ॥ ४७
स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः ।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥ ४८

वनान्तरादुपावृत्तैः समित्कुशफलाहरैः ।
पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ॥ ४९
आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः ।
अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥ ५०
सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।
विश्वासाय विहंगानामालवालाम्बुपायिनाम् ॥ ५१
आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।
मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ॥ ५२
अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ।
पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ॥ ५३
अथ यन्तारमादिश्य धुर्यान्विश्रामयेति सः ।
तामवारोपयत्पत्नीं रथादवततार च ॥ ५४
तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः ।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥ ५५
विधेः सायंतनस्यान्ते स ददर्श तपोनिधिम् ।
अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ॥ ५६
तयोर्जगृहतुः पादान्राजा राज्ञी च मागधी ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥ ५७
तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् ।
पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥ ५८
अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ।
अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ॥ ५९
उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम् ॥ ६०
तव मन्त्रकृतो मन्त्रैर्दूरात्प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥ ६१

हविरावर्जितं होतस्त्वया विधिवदग्निषु।
वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम् ॥ ६२
पुरुषायुषजीविन्यो निरातङ्का निरीतयः।
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम् ॥ ६३
त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना।
सानुबन्धाः कथं न स्युः संपदो मे निरापदः॥ ६४
किंतु वध्वां तवैतस्यामदृष्टसदृशप्रजम् ।
न मामवति सद्वीपा रत्नसूरपि मेदिनी॥ ६५
नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः॥ ६६
मत्परं दुर्लभं मत्वा नूनमावर्जितं मया।
पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते॥ ६७
सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः॥ ६८
लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।
संततिः शुद्धवंश्या हि परत्रेह च शर्मणे॥ ६९
तया हीनं विधातर्मां कथं पश्यन्न दूयसे।
सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकम् ॥ ७०
असह्यपीडं भगवन्नृणमन्त्यमवेहि मे।
अरुंतुदमिवालानमनिर्वाणस्य दन्तिनः॥ ७१
तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः॥ ७२
इति विज्ञापितो राज्ञा ध्यानास्तिमितलोचनः।
क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः॥ ७३
सोऽपश्यत्प्रणिधानेन संततेः स्तम्भकारणम् ।
भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ॥ ७४

पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः ।
आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥ ७५
धर्मलोपभयाद्राज्ञीमृतुस्नातामिमां स्मरन् ।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः ॥ ७६
अवजानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥ ७७
स शापो न त्वया राजन्न च सारथिना श्रुतः ।
नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ॥ ७८
ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः ।
प्रतिबध्नाति हि श्रेयः पूज्यपूज्याव्यतिक्रमः ॥ ७९
हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः ।
भुजंगपिहितद्वारं पातालमधितिष्ठति ॥ ८०
सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥ ८१
इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ॥ ८२
ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला ।
बिभ्रती श्वेतरोमाङ्कं संध्येव शशिनं नवम् ॥ ८३
भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृतादपि ।
प्रस्रवेनाभिवर्षन्ती वत्सालोकप्रवर्तिना ॥ ८४
रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् ।
तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः ॥ ८५
तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥ ८६
अदूरवर्तिनीं सिद्धिं राजन्विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥ ८७

वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् ।
विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ॥ ८८

प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ॥ ८९

वधूर्भक्तिमती चैनामर्चितामा तपोवनात् ।
प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ॥ ९०

इत्या प्रसादादस्यास्त्वं परिचर्यापरो भव ।
अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ॥ ९१

तथेति प्रतिजग्राह प्रीतिमान्सपरिग्रहः ।
आदेशं देशकालज्ञः शिष्यः शासितुरानतः ॥ ९२

अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।
सूनुः सूनृतवाक्स्रष्टुर्विससर्जोर्जितश्रियम् ॥ ९३

सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः ।
कल्पवित्कल्पयामास वन्यामेवास्य संविधाम् ॥ ९४

निर्दिष्टां कुलपतिना स पर्णशाला-
 मध्यास्य प्रयतपरिग्रहद्वितीयः ।
तच्छिष्याध्ययननिवेदितावसानां
 संविष्टः कुशशयने निशां निनाय ॥ ९५

इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ
वशिष्ठाश्रमाभिगमनोनाम प्रथमः सर्गः.

चतुर्थः सर्गः.

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ॥ १

दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ॥ २

पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तयः ।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ॥ ३
सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम् ॥ ४
छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥ ५
परिकल्पितसांनिध्या काले काले च बन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥ ६
मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुंधरा ॥ ७
स हि सर्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥ ८
मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ॥ ९
नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् ।
पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः ॥ १०
पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः ।
नवे तस्मिन्महीपाले सर्वं नवमिवाभवत् ॥ ११
यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ १२
कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ॥ १३
लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा ॥ १४
निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः ।
प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः ॥ १५

वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ॥ १६
पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥ १७
प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः ॥ १८
हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।
विभूतयस्तदीयानां पर्यस्ता यशसामिव ॥ १९
इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥ २०
प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः ॥ २१
मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।
लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम् ॥ २२
प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥ २३
सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् ।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् ॥ २४
तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ ।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ ॥ २५
स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥ २६
अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः ।
पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ॥ २७
स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।
अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः ॥ २८

रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसंनिभैः ।
भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलम् ॥ २९

प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः ॥ ३०

मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः ।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ॥ ३१

स सेनां महतीं कर्षन्पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ॥ ३२

त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः ।
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ॥ ३३

पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी ।
प्राप तालीवनश्याममुपकण्ठं महोदधेः ॥ ३४

अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव ।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ॥ ३५

वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान्गङ्गास्रोतोन्तरेषु सः ॥ ३६

आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥ ३७

स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥ ३८

स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥ ३९

प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥ ४०

द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥ ४१

ताम्वूलीनां दलैस्तत्र रचितापानभूमयः ।
नारिकेलासवं योधाः शात्रवं च पपुर्यशः ॥ ४२
गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥ ४३
ततो वेलातटेनैव फलवत्पूगमालिना ।
अगस्त्याचरितामाशामनाशास्यजयो ययौ ॥ ४४
स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥ ४५
बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः ॥ ४६
ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः ।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥ ४७
भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नास्रसत्करिणां ग्रैवं त्रिपदीछेदिनामपि ॥ ४८
दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥ ४९
ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।
ते निपत्य ददुस्तस्मै यशः स्वमिव संचितम् ॥ ५०
स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदुर्दुरौ ॥ ५१
असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता ।
नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् ॥ ५२
तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः ।
रामास्त्रोत्सारितोऽप्यासीत्सह्यलग्न इवार्णवः ॥ ५३
भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥ ५४

मरुलामारुतोद्धूतमगमत्कैतकं रजः ।
तद्योधवारबाणानामयत्नपटवासताम् ॥ ५५
अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः ।
वर्मभिः पवनोद्धूतराजतालीवनध्वनिः ॥ ५६
खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुंनागेभ्यः शिलीमुखाः ॥ ५७
अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ ।
अपरान्तमहीपालव्याजेन रघवे करम् ॥ ५८
मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् ।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः ॥ ५९
पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥ ६०
यवनीमुखपद्मानां सेहे मधुमदं न स ।
बालातपमिवाब्जानामकालजलदोदयः ॥ ६१
सङ्ग्रामस्तुमुलस्तस्य पाश्चात्त्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ६२
भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ६३
अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥ ६४
विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥ ६५
ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ॥ ६६
विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः ।
दुधुवुर्वाजिनः स्कन्धाँल्लग्नकुङ्कुमकेसरान् ॥ ६७

तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥ ६८

काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ॥ ६९

तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः ।
उपदा विविशुः शश्वन्नोत्सेकाः कोसलेश्वरम् ॥ ७०

ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥ ७१

शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंभ्रमम् ।
गुहाशयानां सिंहानां परिवृत्यावलोकितम् ॥ ७२

भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः ।
गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे ॥ ७३

विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।
दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ॥ ७४

सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः ।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥ ७५

तस्योत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः ।
गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ॥ ७६

तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥ ७७

शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान् ।
जयोदाहरणं बाह्वोर्गापयामास किंनरान् ॥ ७८

परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥ ७९

तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥ ८०

चकम्पे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः॥ ८१
न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम्।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम्॥ ८२
तमीशः कामरूपाणामत्याखण्डलविक्रमम्।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः॥ ८३
कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम्।
रत्नपुष्पोपहारेण छायामानर्च पादयोः॥ ८४
इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम्।
रजो विश्रामयन्राज्ञां छत्रशून्येषु मौलिषु॥ ८५
स विश्वजितमारेभे यज्ञं सर्वस्वदक्षिणम्।
आदानं हि विसर्गाय सतां वारिमुचामिव॥ ८६
सत्रान्ते सचिवसखः पुरस्क्रियाभि-
गुर्वीभिः शमितपराजयव्यलीकान्।
काकुत्स्थश्चिरविरहोत्सुकावरोधा-
न्राजन्यान्स्वपुरनिवृत्तयेऽनुमेने॥ ८७
ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम्।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम्॥ ८८

इति श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ
रघुदिग्विजयो नाम चतुर्थः सर्गः.

दशमः सर्गः.

पृथिवीं शासतस्तस्य पाकशासनतेजसः।
किंचिदूनमनूनर्द्धेः शरदामयुतं ययौ॥ १

न चोपलेभे पूर्वेषामृणनिर्मोक्षसाधनम् ।
सुताभिधानं स ज्योतिः सद्यः शोकतमोपहम् ॥ २
अतिष्ठत्प्रत्ययापेक्षसंततिः स चिरं नृपः ।
प्राङ्मन्थादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥ ३
ऋष्यशृङ्गादयस्तस्य सन्तः सन्तानकाङ्क्षिणः ।
आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः ॥ ४
तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम् ।
अभिजग्मुर्निदाघार्ताश्छायावृक्षमिवाध्वगाः ॥ ५
ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः ।
अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ॥ ६
भोगिभोगासनासीनं ददृशुस्तं दिवौकसः ।
तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम् ॥ ७
श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले ।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे ॥ ८
प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥ ९
प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा ॥ १०
बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः ।
आविर्भूतमपां मध्ये पारिजातमिवापरम् ॥ ११
दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः ।
हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम् ॥ १२
मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ॥ १३
योगनिद्रान्तविशदैः पावनैरवलोकनैः ।
भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन् ॥ १४

प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् ।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ॥ १५

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥ १६

रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥ १७

अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः ।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् ॥ १८

हृदयस्थमनासन्नमकामं त्वां तपस्विनम् ।
दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥ १९

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः ।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥ २०

सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् ।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् ॥ २१

चतुर्वर्गफलं ज्ञानं कालावस्थाचतुर्युगा ।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥ २२

अभ्यासनिगृहीतेन मनसा हृदयाश्रयम् ।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ॥ २३

अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥ २४

शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः ।
पर्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्तितुम् ॥ २५

बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः ।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥ २६

त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम् ।
गतिस्त्वं वीतरागाणामभूयःसन्निवृत्तये ॥ २७

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ॥ २८
केवलं स्मरणेनैव पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ॥ २९
उदधेरिव रत्नानि तेजांसीव विवस्वतः ।
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते ॥ ३०
अनवाप्तमवाप्तव्यं न ते किंचन विद्यते ।
लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः ॥ ३१
महिमानं यदुत्कीर्त्य तव संह्रियते वचः ।
श्रमेण तदशक्त्या वा न गुणानामियत्तया ॥ ३२
इति प्रसादयामासुस्ते सुरास्तमधोक्षजम् ।
भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ॥ ३३
तस्मै कुशलसंप्रश्नव्यञ्जितप्रीतये सुराः ।
भयमप्रलयोद्वेलादाचख्युर्नैर्ऋतोदधेः ॥ ३४
अथ वेलासमासन्नशैलरन्ध्रानुनादिना ।
स्वरेणोवाच भगवान्परिभूतार्णवध्वनिः ॥ ३५
पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता ।
बभूव कृतसंस्कारा चरितार्थैव भारती ॥ ३६
बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता ।
निर्यातशेषा चरणाद्गङ्गेवोर्ध्वप्रवर्तिनी ॥ ३७
जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ ।
अङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ ॥ ३८
विदितं तप्यमानं च तेन मे भुवनत्रयम् ।
अकामोपनतेनेव साधोर्हृदयमेनसा ॥ ३९
कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा ।
स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ॥ ४०

स्वासिधारापरिहृतः कामं चक्रस्य तेन मे।
स्थापितो दशमो मूर्धा लभ्यांश इव रक्षसा॥ ४१
स्रष्टुर्वरातिसर्गात्तु मया तस्य दुरात्मनः।
अत्यारूढं रिपोः सोढं चन्दनेनेव भोगिनः॥ ४२
धातारं तपसा प्रीतं ययाचे स हि राक्षसः।
दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः॥ ४३
सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमम्।
करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयम्॥ ४४
अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पुनः।
मायाविभिरनालीढमादास्यध्वे निशाचरैः॥ ४५
वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतां पथि।
पुष्पकालोकसंक्षोभं मेघावरणतत्पराः॥ ४६
मोक्ष्यध्वे स्वर्गबन्दीनां वेणीबन्धानदूषितान्।
शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः॥ ४७
रावणावग्रहक्लान्तामिति वागमृतेन सः।
अभिवृष्य मरुत्सस्यं कृष्णमेघास्तिरोदधे॥ ४८
पुरुहूतप्रभृतयः सुरकार्योद्यतं सुराः।
अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः॥ ४९
अथ तस्य विशांपत्युरन्ते काम्यस्य कर्मणः।
पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम्॥ ५०
हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुम्।
अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम्॥ ५१
प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः।
वृषेव पयसां सारमाविष्कृतमुदन्वता॥ ५२
अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः।
प्रसूतिं चकमे तस्मिंस्त्रैलोक्यप्रभवोऽपि यत्॥ ५३

स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम् ।
द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम् ॥ ५४
अर्चिता तस्य कौसल्या प्रिया केकयवंशजा ।
अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः ॥ ५५
ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः ।
चरोरर्धार्धभागाभ्यां तामयोजयतामुभे ॥ ५६
सा हि प्रणयवत्यासीत्सपत्न्योरुभयोरपि ।
भ्रमरी वारणस्येव मदनिस्यन्दरेखयोः ॥ ५७
ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसंभवः ।
सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः ॥ ५८
सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः ।
अन्तर्गतफलारम्भाः सस्यानामिव संपदः ॥ ५९
गुप्तं ददृशुरात्मानं सर्वाः स्वप्नेषु वामनैः ।
जलजासिगदाशार्ङ्गचक्रलाञ्छितमूर्तिभिः ॥ ६०
हेमपक्षप्रभाजालं गगने च वितन्वता ।
उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा ॥ ६१
बिभ्रत्या कोस्तुभन्यासं स्तनान्तरविलम्बिनम् ।
पर्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया ॥ ६२
कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः ।
ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे ॥ ६३
ताभ्यस्तथाविधान्स्वप्नाञ्छ्रुत्वा प्रीतो हि पार्थिवः ।
मेने परार्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥ ६४
विभक्तात्मा विभुस्तासामेकः कुक्षिष्वनेकधा ।
उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव ॥ ६५
अथाग्र्यमहिषी राज्ञः प्रसूतिसमये सती ।
पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः ॥ ६६

राम इत्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ॥ ६७
रघुवंशप्रदीपेन तेनाप्रतिमतेजसा ।
रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् ॥ ६८
शय्यागतेन रामेण माता शातोदरी बभौ ।
सैकताम्भोजबलिना जाह्नवीव शरत्कृशा ॥ ६९
कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् ।
जनयित्रीमलंचक्रे यः प्रश्रय इव श्रियम् ॥ ७०
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ ।
सम्यगागमिता विद्या प्रबोधविनयाविव ॥ ७१
निर्दोषमभवत्सर्वमाविष्कृतगुणं जगत् ।
अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमम् ॥ ७२
तस्योदये चतुर्मूर्तेः पौलस्त्यचकितेश्वराः ।
विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥ ७३
कृशानुरपधूमत्वात्प्रसन्नत्वात्प्रभाकरः ।
रक्षोविप्रकृतावास्तामपविद्धशुचाविव ॥ ७४
दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः ।
मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः ॥ ७५
पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः ।
आरम्भं प्रथमं चक्रुर्देवदुन्दुभयो दिवि ॥ ७६
सन्तानकमयी वृष्टिर्भवने चास्य पेतुषी ।
सन्मङ्गलोपचाराणां सैवादिरचनाभवत् ॥ ७७
कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः ।
आनन्देनाग्रजेनेव समं ववृधिरे पितुः ॥ ७८
स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा ।
मुमूर्छ सहजं तेजो हविषेव हविर्भुजाम् ॥ ७९

परस्पराविरुद्धास्ते तद्रघोरनघं कुलम् ।
अलमुद्द्योतयामासुर्देवारण्यमिवर्तवः ॥ ८०
समानेऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ ।
तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं बभूवतुः ॥ ८१
तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन ।
यथा वायुविभावस्वोर्यथा चन्द्रसमुद्रयोः ॥ ८२
ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च ।
मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ॥ ८३
स चतुर्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः ।
धर्मार्थकाममोक्षाणामवतार इवाङ्गभाक् ॥ ८४
गुणैराराधयामासुस्ते गुरुं गुरुवत्सलाः ।
तमेव चतुरन्तेशं रत्नैरिव महार्णवाः ॥ ८५
सुरगज इव दन्तैर्भग्नदैत्यासिधारै-
र्नय इव पणबन्धव्यक्तयोगैरुपायैः ।
हरिरिव युगदीर्घैर्दोर्भिरंशैस्तदीयैः
पतिरवनिपतीनां तैश्चकाशे चतुर्भिः ॥ ८६

इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ
रामावतारो नाम दशमः सर्गः.

सुभाषितम्

विष्णुर्वा त्रिपुरान्तको भवतु वा ब्रह्मा सुरेन्द्रोऽथवा
भानुर्वा शशलक्षणोऽथ भगवान्बुद्धोऽथ सिद्धोऽथवा ।
रागद्वेषविषार्तिमोहरहितः सत्वानुकम्पोद्यतो
यः सर्वैः सह संस्कृतो गुणगणैस्तस्मै नमः सर्वदा ॥ १

भूनायकं वा धननायकं वा भजन्भुवं वा धनमेति लोके ।
तद्विघ्ननाथं न भजामि किन्तु सहस्रशस्तं प्रणमामि नित्यम् ॥ २

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥ ३

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रामाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥ ४

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ ५

नमः सर्वविदे तस्मै व्यासाय कविवेधसे ।
चक्रे पुण्यं सरस्वत्या योवर्षमिव भारतम् ॥ ६

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥ ७

द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता।
सुभाषितरसस्याग्रे सुधा भीता दिवं गता॥ ८

सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम्।
अहार्यत्वादनर्घ्यत्वादक्षयत्वाच्च सर्वदा॥ ९

यत्सारस्वतवैभवं गुरुकृपापीयूषपाकोद्भवं
तल्लभ्यं कविनैव नैव हठतः पाठप्रतिष्ठाजुषाम्।
कासारे दिवसं वसन्नपि पयःपूरं परं पङ्किलं
कुर्वाणः कमलाकरस्य लभते किं सौरभं सैरिभः॥ १०

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते॥ ११

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति॥ १२

शास्त्राण्यधीत्यापि भवन्ति मूर्खा यस्तु क्रियावान्पुरुषः स विद्वान्।
सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगम्॥ १३

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति॥ १४

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति॥ १५

साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥ १६

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।
कदाचिदपि पर्यटञ्छशविषाणमासादये
न्नतु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥ १७

सन्तः स्वतः प्रकाशन्ते गुणा न परतो नृणाम्।
आमोदो न हि कस्तूर्याः शपथेन विभाव्यते॥ १८

उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ॥ १९
वित्ते त्यागः क्षमा शक्तौ दुःखे दैन्यविहीनता ।
निर्दम्भता सदाचारे स्वभावोऽयं महात्मनाम् ॥ २०
सुजनो न याति वैरं परहितनिरतो विनाशकालेऽपि ।
छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य ॥ २१
सज्जनस्य हृदयं नवनीतं यद्वदन्ति कवयस्तदलीकम् ।
अन्यदेहविलसत्परितापात्सज्जनो द्रवति नो नवनीतम् ॥ २२
पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥२३
विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरतिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥२४
यः प्रीणयेत्सुचरितैः पितरं सपुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं य-
देतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ २५
आरभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनःपुनरपि प्रतिहन्यमानाः
प्रारभ्यचोत्तमजना न परित्यजन्ति ॥ २६
प्रथमवयसिपीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नालिकेरा नराणाम् ।
ददति जलमनल्पास्वादमाजीवितान्तं ।
न हि कृतमुपकारं साधवो विस्मरन्ति ॥ २७
करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयिभुजयोर्वीर्यमतुलम् ।

गृहे स्वस्था वृत्तिः श्रुतमधिगतैकव्रतफलं
विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ २८

विजेतव्या लङ्का चरणतरणीयो जलनिधि-
र्विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।
तथाप्येको रामः सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥ २९

रथस्यैकं चक्रं भुजगयमिताः सप्ततुरगा
निरालम्बो मार्गश्चरणरहितः सारथिरपि ।
रविर्गच्छत्यन्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥ ३०

धनुः पौष्पं मौर्वी मधुकरमयी चञ्चलदृशां
दृशां कोणो बाणः सुहृदपि जडात्मा हिमकरः ।
तथाप्येकोऽनङ्गस्त्रिभुवनमपि व्याकुलयति
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥ ३१

विपक्षः श्रीकण्ठो जडतनुरमात्यः शशधरो
वसन्तः सामन्तः कुसुममिषवः सैन्यमबलाः ।
तथापि त्रैलोक्यं जयति मदनो देहरहितः
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥ ३२

घटो जन्मस्थानं मृगपरिजनो भूर्जवसनो
वने वासः कन्दाशनमपि च दुःस्थं वपुरिदं ।
तथाप्येकोऽगस्त्यः सकलमपिबद्वारिधिजलं
क्रियासिद्धिः सत्वे वसति महतां नोपकरणे ॥ ३३

घर्मार्तं न तथा सुशीतलजलैः स्नानं न मुक्तावलि-
र्न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितम् ।
प्रीत्यै सज्जनभाषितं प्रभवति प्रायो यथा चेतसः
सद्युक्त्या च पुरस्कृतं सुकृतिनामाकृष्टिमन्त्रोपमम् ॥ ३४

शूराः सन्ति सहस्रशः प्रतिपदं विद्याविदोऽनेकशः
सन्ति श्रीपतयो निरस्तधनदास्तेऽपि क्षितौ भूरिशः।
ये कर्मण्यनिरीक्ष्य वान्यमनुजं दुःखार्दितं यन्मन-
स्ताद्रूप्यम् प्रतिपद्यते जगति ते सत्पूरुषाः पञ्चषाः॥ ३५

खलः सर्षपमात्राणि परच्छिद्राणि पश्यति।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति॥ ३६

दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयंकरः॥ ३७

उपकारोऽपि नीचानामपकारो हि जायते।
पयःपानं भुजङ्गानां केवलं विषवर्धनम्॥ ३८

सर्पदुर्जनयोर्मध्ये वरं सर्पो न दुर्जनः।
सर्पो दशति कालेन दुर्जनस्तु पदेपदे॥ ३९

दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत्।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम्॥ ४०

दुर्जनः प्रियवादी च नैतद्विश्वासकारणम्।
मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम्॥ ४१

जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नताः।
किं कनिष्ठाः किमु ज्येष्ठा घटीयन्त्रस्य दुर्जनाः॥ ४२

मुखेनैकेन विध्यन्ति पादमेकस्य कण्टकाः।
दूरान्मुखसहस्रेण सर्वप्राणहराः खलाः॥ ४३

दुर्जनः सुजनीकर्तुं यत्नेनापि न शक्यते।
संस्कारेणापि लशुनं कः सुगन्धी करिष्यति॥ ४४

परवादे दशवदनः पररन्ध्रनिरीक्षणे सहस्राक्षः।
सद्वृत्तवित्तहरणे बाहुसहस्रार्जुनः पिशुनः॥ ४५

मृद्घटवत्सुखभेद्यो दुःसंधानश्च दुर्जनो भवति।
सुजनस्तु कनकघटवद्दुर्भेद्यश्चाशु संधेयः॥ ४६

बोधितोऽपि बहुसूक्तिविस्तरैः किं खलो जगति सज्जनो भवेत्।
स्नापितोऽपि बहुशो नदीजलै र्गर्दभः किमु हयो भवेत्कचित् ॥४७

विद्यया विमलयाप्यलंकृतो दुर्जनः सदसि मास्तु कश्चन।
साक्षरा हि विपरीततां गताः केवलं जगति तेऽपि राक्षसाः ॥४८

न दुर्जनः सज्जनतामुपैति बहुप्रकारैरपि सेव्यमानः।
भूयोपि सिक्तः पयसा घृतेन न निम्बवृक्षो मधुरत्वमेति ॥ ४९

प्राक्पादयोः पतति खादति पृष्ठमांसं
कर्णे कलं किमपि रौति शनैर्विचित्रम्।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ॥ ५०

एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ५१

वाताहारतया जगद्विषधरैराश्वास्य निःशेषितं
ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः।
तेऽपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकै
र्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते ॥ ५२

भिक्षो मांसनिषेवणं प्रकुरुषे किं तेन मद्यं विना
मद्यं चापि तव प्रियं प्रियमहो वाराङ्गनाभिः सह।
वेश्या द्रव्यरुचिः कुतस्तव धनं द्यूतेन चौर्येण वा
चौर्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या गतिः ॥ ५३

उत्साहसंपन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम्।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः ॥५४

हलाहलो नैव विषं विषं रमा जनाः परं व्यत्ययमत्र मन्वते।
निपीय जागर्ति सुखेन तं शिवः स्पृशन्निमां मुह्यति निद्रया हरिः ॥

न नरस्य नरो दासो दासश्चार्थस्य भूपते।
गौरवं लाघवं वापि धनाधननिबन्धनम् ॥ ५६
यस्यास्ति वित्तं सनरः कुलीनः स पण्डितः स श्रुतवान्गुणज्ञः।
स एव वक्ता सचंदर्शनीयः सर्वैगुणाः काश्चनमाश्रयन्ति ॥ ५७
त्यजन्ति मित्राणि धनैर्विहीनं पुत्राश्च दाराश्च सुहृज्जनाश्च।
तमर्थवन्तं पुनराश्रयन्ति ह्यर्थो हि लोके पुरुषस्य बन्धुः॥ ५८
बुभुक्षितैर्व्याकरणं नभुज्यते पिपासितैः काव्यरसो न पीयते।
न च्छन्दसा केनचिदुद्धृतं कुलं हिरण्यमेवार्जय निष्फला गुणाः॥५९
लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम्।
शेषे धराभरक्लान्ते शेते नारायणः सुखम् ॥ ६०
राजतः सलिलादग्नेश्चोरतः स्वजनादपि।
भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥ ६१
धनवान्बलवाँल्लोके सर्वः सर्वत्र सर्वदा।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥ ६२
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः॥ ६३
न विद्यया नैवकुलेन गौरवं जनानुरागो धनिकेषु सर्वदा।
कपालिना मौलिधृतापि जाह्नवी प्रयाति रत्नाकरमेव सत्वरम् ॥ ६४
परीक्ष्य सत्कुलं विद्यां शीलं शौर्यं सुरूपताम्।
विधिर्ददाति निपुणः कन्यामिव दरिद्रताम् ॥ ६५
वरं वनं व्याघ्रगजेन्द्रसेवितं द्रुमालयः पत्रफलाम्बुभोजनम्।
तृणानि शय्या वसनं च वल्कलं न बन्धुमध्ये धनहीनजीवनम् ॥६६
यद्ददाति यदश्नाति तदेव धनिनो धनम्।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥ ६७
शतेषु जायते शूरः सहस्रेषु च पण्डितः।
वक्ता दशसहस्रेषु दाता भवति वा न वा ॥ ६८

अयं निजः परोवेति गणना लघुचेतसां ।
उदारचरितानां तु वसुधैव कुटम्बकम् ॥ ६९
कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ।
ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनां ॥ ७०
कृपणेन समो दाता न भूतो न भविष्यति ।
अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति ॥ ७१
त्यगभोगविहीनेन धनेन धनिनो यदि ।
भवामः किं न तेनैव धनेन धनिनो वयम् ॥ ७२
दृढतरनिबद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य ।
कृपणस्य कृपाणस्य च केवलमाकारतो भेदः ॥ ७३
वदनाच्च बहिर्यान्ति प्राणा याच्ञाक्षरैः सह ।
ददामीत्यक्षरैर्दातुः पुनः कर्णाद्विशन्ति हि ॥ ७४
नीचतामनवलम्ब्य जनः को याचनादवचिनोति फलानि ।
हन्त वामनपदं प्रतिपेदे भिक्षुतामुपगतो जगदीशः ॥ ७५
तावत्सर्वगुणालयः पटुमतिः साधुः सतां वल्लभः ।
शूरः सच्चरितः कलङ्करहितो मानी कृतज्ञः कविः ।
दक्षो धर्मरतः सुशीलगुणवांस्तावत्प्रतिष्ठान्वितो
यावन्निष्ठुरवज्रपातसदृशं देहीति नो भाषते ॥ ७६
तृणं चाहं वरं मन्ये नरादनुपकारिणः ।
घासो भूत्वा पशून्पाति भीरून्पाति रणाङ्गणे ॥ ७७
भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्भूरिविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥
सर्पाः पिबन्ति पवनं न च दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवराः क्षपयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम् ॥ ७९

वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या
सम इह परितोषो निर्विशेषो विशेषः।
स हि भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः॥ ८०
इच्छति शती सहस्रं ससहस्रः कोटिमीहते कर्तुं।
कोटियुतोऽपि नृपत्वं नृपोऽपि बत चक्रवर्तित्वम्॥ ८१
निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेच्छम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥ ८२
हस्ती स्थूलतनुः स चाङ्कुशवशः किं हस्तिमात्रोऽङ्कुशो
वज्रेणाभिहताः पतन्ति गिरयः किं शैलमात्रः पविः।
दीपे प्रज्वलिते विनश्यति तमः किं दीपमात्रं तम
स्तेजो यस्य विराजते स बलवान्स्थूलेषु कः प्रत्ययः॥ ८३
स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधः शान्तये।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलं॥ ८४
यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम्।
न हि कस्तूरिकामोदः शपथेन निवार्यते॥ ८५
उद्यमं साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत्॥ ८६
उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥ ८७
पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते
तस्मात्पुरुषकारेण विना दैवं न सिध्यति॥ ८८

यथाह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिध्यति ॥ ८९
आलस्यं हि मनुष्याणां शरीरस्थो महान्रिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥ ९०
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी
र्दैवं हि दैवमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ ९१
विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥ ९२
संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वात्यां सागरशुक्तिसंपुटगतं तज्जायते मौक्तिकं
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते ॥ ९३
उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ९४
सबन्धुर्यो विपन्नानामापदुद्धरणे क्षमः ।
न तु भीतपरित्राणवस्तूपालम्भपण्डितः ॥ ९५
मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत्सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभम् ।
येचान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुलाः
ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावातु तेषां विपत् ॥ ९६
भवितव्यं भवत्येव नारिकेलफलाम्बुवत् ।
गन्तव्यं गतमित्याहुर्गजभुक्तकपित्थवत् ॥ ९७
न हि भवति यन्न भाव्यं भवति च भाव्यं विनापि यत्नेन
करतलगतमपि नश्यति यस्य हि भवितव्यता नास्ति ॥ ९८

स्वयं महेशः श्वशुरो नगेशः सखा धनेशस्तनयो गणेशः।
तथापि भिक्षाटनमेव शंभोः बलीयसी केवलमीश्वरेच्छा ॥ ९९
जातः सूर्यकुले पिता दशरथः क्षोणिभुजामग्रणीः
सीता सत्यपरायणा प्रणयिनी यस्यानुजो लक्ष्मणः।
दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयम्
रामो येन विडम्बितोऽपि विधिना चान्ये जने काकथा ॥ १००
गीतं कोकिल ते मुदा रसविदः शृण्वन्ति कर्णामृतं
नो किंचिद्वितरन्ति ते तरुदलैरेव स्वयं जीवसि।
कर्णायुर्हरमुद्गिरन्ति विरुतं काकास्तु तेभ्यो बलिं
प्राज्ञा एव दिशन्ति हन्त धिगिदं वक्रं विधेः क्रीडितम् ॥१०१
रामे प्रव्रजनं बलेर्नियमनं पाण्डोः सुतानां वनं
वृष्णीनां निधनं नलस्य नृपते राज्यात्परिभ्रंशनम्।
कारागारनिषेवणं च मरणं संचिन्त्य लङ्केश्वरे
सर्वः कालवशेन नश्यति नरः को वा परित्रायते ॥ १०२
भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
लोकाः पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥१०३
पञ्चैते पाण्डुपुत्राः क्षितिपतितनया धर्मभीमार्जुनाद्याः
शूराः सत्यप्रतिज्ञा दृढतरवपुषः केशवेनापि गूढाः।
ते वीराः पाणिपात्रे कृपणजनगृहे भिक्षुचर्यां प्रवृत्ताः
को वा कार्ये समर्थो भवति विधिवशाद्भाविनी कर्मरेखा ॥
प्रत्यहं प्रत्यवेक्षेत नरश्चारितमात्मनः।
किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ॥ १०५
पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम्।
मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः ॥ १०६

यो यमर्थं प्रार्थयते यदर्थं घटतेऽपि च।
अवश्यं तदवाप्नोति नचेच्छ्रान्तो निवर्तते॥ १०७
वरं दारिद्र्यमन्यायप्रभवाद्विभवादिह।
कृशताभिमता देहे पीनता न तु शोफतः॥ १०८
अतिदानाद्बलिर्बद्धो ह्यतिमानात्सुयोधनः।
विनष्टो रावणो लौल्यादति सर्वत्र वर्जयेत्॥ १०९
गीतशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा॥ ११०
सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते॥ १११
प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता॥ ११२
निःसारस्य पदार्थस्य प्रायेणाडम्बरो महान्।
न सुवर्णे ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते॥ ११३
वनानि दहतो वह्नेः सखा भवति मारुतः।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम्॥ ११४
कृतार्थः स्वामिनं द्वेष्टि कृतदारस्तु मातरं।
जातापत्या पतिं द्वेष्टि गतरोगश्चिकित्सकम्॥ ११५
चक्षुःपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्।
सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत्॥ ११६
सौवर्णानि सरोजानि निर्मातुं सन्ति शिल्पिनः।
तत्र सौरभनिर्माणे चतुरश्चतुराननः॥ ११७
चत्वारो धनदायादा धर्माग्निनृपतस्कराः।
तेषां ज्येष्ठावमानेन त्रयः कुप्यन्ति बान्धवाः॥ ११८
निर्विषेणापि सर्पेण कर्तव्या महती फणा।
विषमस्तु नचाप्यस्तु फटाटोपो भयङ्करः॥ ११९

सत्यानुसारिणी लक्ष्मीः कीर्तिस्त्यागानुसारिणी ।
अभ्याससारिणी विद्या बुद्धिः कर्मानुसारिणी ॥ १२०
दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता ।
अभ्यासेन न लभ्येयुश्चत्वारः सहजा गुणाः ॥ १२१
सुखार्थी त्यजते विद्यां विद्यार्थी त्यजते सुखम् ।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ॥ १२२
अक्षराणि परीक्ष्यन्तामम्बराडम्बरेण किम् ।
शंभुरम्बरहीनोऽपि सर्वज्ञः किन्नजायते ॥ १२३
शीलं शौर्यमनालस्यं पाण्डित्यं मित्रसंग्रहः ।
अचोरहरणीयानि पञ्चैतान्यक्षयो निधिः ॥ १२४
यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥ १२५
पुस्तकेषु च या विद्या परहस्तेषु यद्धनम् ।
सङ्ग्रामे च गृहे सैन्यं तिस्रः पुंसां विडम्बनाः ॥ १२६
हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणे किं प्रयोजनम् ॥ १२७
लालने बहवो दोषास्ताडने बहवो गुणाः ।
तस्मात्पुत्रं च शिष्यं च ताडयेन्न तु लालयेत् ॥ १२८
न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः ।
कारणेन हि जायन्ते मित्राणि रिपवस्तथा ॥ १२९
अतिदाक्षिण्ययुक्तानां शङ्कितानां पदे पदे ।
परापवादभीरूणां दूरतो यान्ति संपदः ॥ १३०
आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥ १३१
मनसा चिन्तितं कर्म वचसा न प्रकाशयेत् ।
अन्यलक्षितकार्यस्य यतः सिद्धिर्नजायते ॥ १३२

युद्धं च प्रातरुत्थानं भोजनं सहबन्धुभिः।
स्त्रियमापद्गतां रक्षेच्चतुः शिक्षेत कुक्कुटात् ॥ १३३

कोऽतिभारः समर्थानां किं दूरं व्यवसायिनां।
को विदेशः सविद्यानां कः परः प्रियवादिनां ॥ १३४

अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तयेत्।
गृहीतइव केशेषु मृत्युना धर्ममाचरेत् ॥ १३५

षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ १३६

परिच्छेदो हि पाण्डित्यं यदापन्ना विपत्तयः।
अपरिच्छेदकर्तॄणां विपदः स्युः पदे पदे ॥ १३७

अधोऽधः पश्यतः कस्य महिमा नोपचीयते।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ॥ १३८

किमप्यास्ति स्वभावेन सुन्दरं वाप्यसुन्दरम्।
यदेव रोचते यस्मै भवेत्तत्तस्य सुन्दरम् ॥ १३९

यस्य यस्य हि यो भावः तेन तेन हि तं नरं।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥ १४०

बलवानपि निस्तेजाः कस्य नाभिभवास्पदम्।
निःशङ्कं दीयते लोकैः पश्य भस्मचये पदम् ॥ १४१

क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम्।
अपराधिषु सत्त्वेषु नृपाणां सैव दूषणम् ॥ १४२

महानप्यल्पतां याति निर्गुणे गुणविस्तरः।
आधाराधेयभावेन गजेन्द्रइव दर्पणे ॥ १४३

तावद्भयाद्धि भेतव्यं यावद्भयमनागतम्।
आगतं तु भयं वीक्ष्य प्रहर्तव्यमभीतवत् ॥ १४४

व्यसनं प्राप्य यो मोहात्केवलं परिदेवयेत्।
क्रन्दनं वर्धयत्येव तस्यान्तं नाधिगच्छति ॥ १४५

कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्॥ १४६
बहुभिर्न विरोद्धव्यं दुर्जनैः स्वजनैरपि।
स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः॥ १४७
यदपथ्यवतामायुर्यदनीतिमतां श्रियः।
तदेतत्काकतालीयं तदेतच्च घुणाक्षरम्॥ १४८
क्षमातुल्यं तपो नास्ति न संतोषात्परं सुखम्।
न तृष्णायाः परो व्याधिर्न च धर्मो दयापरः॥ १४९
गौर्गौः कामदुघा सम्यक्प्रयुक्ता स्मर्यते बुधैः।
दुःप्रयुक्तापुनर्गोत्वं प्रयोक्तुः सैव शंसति॥ १५०
नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः।
जानन्नपि हि मेधावी जडवल्लोक आचरेत्॥ १५१
सर्वेषामेव शौचानामर्थशौचं परं स्मृतम्।
योऽर्थे शुचिः स हि शुचिर्न मृद्वारिशुचिः शुचिः॥ १५२
भवत्येकस्थले जन्म गन्धस्तेषां पृथक्पृथक्।
उत्पलस्य मृणालस्य मत्स्यस्य कुमुदस्यच॥ १५३
अर्थानामार्जनं कार्यं वर्धनं रक्षणं तथा।
भक्ष्यमाणो निरादायः सुमेरुरपि हीयते॥ १५४
देवे तीर्थे द्विजे मन्त्रे दैवज्ञे भेषजे गुरौ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी॥ १५५
स्वभावसुन्दरं वस्तु न संस्कारमपेक्षते।
मुक्तारत्नस्य शाणाश्मघर्षणं नोपयुज्यते॥ १५६
ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते।
प्रायः स्वं महिमानं क्षोभात्प्रतिपद्यते जन्तुः॥ १५७
आरोग्यं विद्वत्ता सज्जनमैत्री महाकुले जन्म।
स्वाधीनता च पुंसां महदैश्वर्यं विनाप्यर्थैः॥ १५८

दधि मधुरं मधु मधुरं द्राक्षा मधुरा सुधापि मधुरैव।
तस्य तदेव हि मधुरं यस्य मनो यत्र संलग्नम्॥ १५९
रोगी चिरप्रवासी परान्नभोजी परावसथशायी।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः॥ १६०
को धर्मो भूतदया किं सौख्यमरोगिता जगति।
कः स्नेहः सद्भावः किं पाण्डित्यं परिच्छेदः॥ १६१
सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः।
यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि॥ १६२
न स्वल्पमप्यध्यवसायभीरोः करोति विज्ञानविधिर्गुणं हि।
अन्धस्य किं हस्ततलस्थितोऽपि प्रकाशयत्यर्थमिह प्रदीपः॥
दारेषु किंचित्स्वजनेषु किंचिद्गोप्यं वयस्येषु सुतेषु किंचित्।
युक्तं न वा युक्तमिदं विचिन्त्य वदेद्विपश्चिन्महतोऽनुरोधात्॥
गन्धः सुवर्णे फलमिक्षुदण्डे नाकारि पुष्पं खलु चन्दनेषु।
विद्वान्धनाढ्यो न तु दीर्घजीवी धातुः पुरा कोऽपि न बुद्धिदोऽभूत्॥
श्रुतिर्विभिन्ना स्मृतयश्च भिन्ना नैकोमुनिर्यस्य वचः प्रमाणं।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः॥
संपूर्णकुम्भो न करोति शब्दमर्धो घटो घोषमुपैति नूनम्।
विद्वान्कुलीनो न करोति गर्वं गुणैर्विहीना बहुजल्पयन्ति॥१६७
पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः॥ १६८
मनीषिणः सन्ति न ते हितैषिणो हितैषिणः सन्ति न ते मनीषिणः।
सुहृच्च विद्वानपि दुर्लभो नृणां यथौषधं स्वादु हितं च दुर्लभम्॥
दरिद्रता धीरतया विराजते कुरूपता शीलतया विराजते।
कुभोजनं चोष्णतया विराजते कुवस्त्रता शुभ्रतया विराजते॥
यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन कुलेन कर्मणा॥

गुणी गुणं वेत्ति नवेत्ति निर्गुणो बली बलं वेत्ति नवेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषकः॥
यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः॥ १७३
क्षान्तिश्चेद्वचनेन किं किमारिभिः क्रोधोऽस्तिचेद्देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम्।
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्यानवद्या यदि
व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम्॥ १७४
सिंहो व्याकरणस्य कर्तुरहरत्प्राणान्प्रियान्पाणिने
र्मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिं।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गल-
मज्ञानावृतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः॥ १७५
क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनु-
र्नरः संसाराङ्के विशति यमधानीजवनिकाम्॥ १७६
विदुषां वदनाद्वाचः सहसा यान्ति नो बहिः।
याताश्चेन्न पराञ्चन्ति द्विरदानां रदा इव॥ १७७
विद्या विनयोपेता हरति न चेतांसि कस्य मनुजस्य।
काञ्चनमणिसंयोगो नो जनयति कस्य लोचनानन्दम्॥ १७८
सत्यं तपो ज्ञानमहिंसता च विद्वत्प्रणामं च सुशीलता च।
एतानि यो धारयते स विद्वान्नकेवलं यः पठते स विद्वान्॥
येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति॥ १८०

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति॥ १८१
संपदो महतामेव महतामेव चापदः।
वर्धते क्षीयते चन्द्रो न तु तारागणः कचित्॥ १८२
स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः।
हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः॥ १८३
व्रजत्यधः प्रत्युयाच्चैर्नरः स्वैरेव चेष्टितैः
अधः कूपस्य खनक ऊर्ध्वे प्रासादकारकः॥ १८४
लक्ष्मीर्वसति जिह्वाग्रे जिह्वाग्रे मित्रबान्धवाः।
जिह्वाग्रे बन्धनं प्राप्तं जिह्वाग्रे मरणं ध्रुवम्॥ १८५
सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥ १८६
साक्षरा विपरीताश्चेद्राक्षसा एव केवलम्।
सरसो विपरीतश्चेत्सरसत्वं न मुञ्चति॥ १८७
एकस्तपो द्विरध्यायी त्रिभिर्गीतं चतुःपथम्।
सप्त पञ्चकृषीणां च सङ्ग्रामो बहुभिर्जनैः॥ १८८
नानृषिः कुरुते काव्यं नारुद्रः क्रमपाठकः।
नादेवांशो ददात्यन्नं नाविष्णुः पृथिवीपतिः॥ १८९
लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता।
पञ्च यत्र न विद्यन्ते नकुर्यात्तत्र संस्थितिम्॥ १९०
कृते प्रतिकृतिं कुर्याद्धिंसिते प्रतिहिंसितम्।
न तत्र दोषं पश्यामि दुष्टे दुष्टं समाचरेत्॥ १९१
रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा मूलतः कमलिनीं गज उज्जहार॥ १९२

गिरिर्महान्गिरेरब्धिर्महानब्धेर्नभो महान् ।
नभसोऽपि महद्ब्रह्म ततोप्याशा गरीयसी ॥ १९३

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गबुद्बुदसमे सौख्यं कुतः प्राणिनाम् ॥ १९४

न चोरहार्यं न च राजहार्यं नभ्रातृभोज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ॥ १९५

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।
तस्माद्धि काव्यं मधुरं तस्मादपि सुभाषितम् ॥ १९६

नायं प्रयाति विकृतिं विरसो न यः स्या
न्नक्षीयते बहुजनैर्नितरां निपीतः ।
जाड्यं निहन्ति रुचिमेति करोति तृप्तिं
नूनं सुभाषितरसोऽन्यरसातिशायी ॥ १९७

धन्याः शुचीनि सुरभीणि गुणोऽम्भितानि
वाग्वीरुधः स्ववदनोपवनोद्गतायाः ।
उच्चित्य सूक्तिकुसुमानि सतां विविक्त-
वर्णानि कर्णपुलिनेष्ववतंसयन्ति ॥ १९८

किं हारैः किमु कङ्कणैः किमसमैः कर्णावतंसैरलं
केयूरैर्मणिकुण्डलैरलमलं साडम्बरैरम्बरैः ।
पुंसामेकमखण्डितं पुनरिदं मन्यामहे मण्डनं
यन्निष्पीडितपार्वणामृतकरस्यन्दोपमाः सूक्तयः ॥ १९९

खिन्नं चापि सुभाषितेन रमते स्वीयं मनः सर्वदा
श्रुत्वान्यस्य सुभाषितं खलु मनः श्रोतुं पुनर्वाञ्छति ।
अज्ञाञ्ज्ञानवतोऽप्यनेन हि वशीकर्तुं समर्थो भवे-
त्कर्तव्यो हि सुभाषितस्य मनुजैरावश्यकः संग्रहः ॥ २००

पुरुषपरीक्षा

३. युद्धवीरकथा.

कातरः शूरतां याति क्रियावानलसो भवेत्।
युद्धवीरकथां श्रुत्वा जयमाप्नोति साम्प्रतम्॥ १

आसीन्मिथिलायां कार्णाटकुलसंभवस्य नान्यदेवनाम्नो राज्ञः पुत्रो मल्लदेवनामधेयः कुमारः। स च सिंह इव स्वभावात् पराक्रमरसिकश्चिन्तयामास। यदहं युवराजोऽपि पितुरुपार्जिते राज्ये सुखमनुभवामीति न मम पौरुषम्। यतः—

सिंहाः सत्पुरुषाश्चैव निजदर्पोपजीविनः।
पराश्रयेण जीवन्ति कातराः शिशवः स्त्रियः॥ २

निजभुजोपार्जितेन वित्तेन विना पितृभक्तिरपि न संभवति। यदुक्तम्—

आर्जितं भुज्यते यस्य यस्य वाऽकर्ण्यते यशः।
पितुर्बहुसुतस्यापि तेन पुत्रेण पुत्रिता॥ ३

ततः क्काऽपि गत्वा भुजदर्पेण पौरुषमार्जयामीति परामृश्य स कुमारः कान्यकुब्जं नाम जनपदं जगाम। तत्र च श्रीजयचन्द्रनाम्नो राज्ञः काशीश्वरस्य सुभटपरिपाट्या दर्शनं चकार। स राजा तं सत्कृत्य प्रियसहचरमकरोत्। कुमारस्तु तस्य राज्ञः सेवायां वर्तमानः क्रमेणाऽधिकसन्मानपात्रतामनुभवन्नेकदा तु स्वसमाचारवैषम्यमनुबभूव। यतः—

आदरः सुलभो राज्ञां वस्तुन्यल्पगुणेऽपि च।
प्रगुणेऽपि च संप्राप्ते भवेन्नूनमनादरः॥ ४

ततः कुमारश्चिंतयामास । यतः—

धनं तृष्णावतः प्राणा वह्नेः प्राणास्तथैंधनम् ।
कामुकस्य स्त्रियः प्राणा मनःप्राणा मनस्विनाम् ॥ ५

ततो राजानमब्रवीत् "देव भवतः प्रभुधर्मं श्रुत्वाहमिहाऽगतोस्मि साम्प्रतमन्यत्र यास्यामि"। राजोवाच। "कुमार किं तव उद्वेगे कारणं येनाऽन्यत्र यास्यसि"। मल्लदेव उवाच। "देव, भवतः समादरः क्रमेण शिथिलो भवतीत्याशंकयाऽहमितोऽन्यत्र गच्छामि"। राजोवाच। "कथमवगतमिदम्"। मल्लदेव उवाच। "यतः शौर्यमूलको मादृशां समादरो भवति। शौर्यं तु वाग्युद्धेन केवलं ख्यापयितुमशक्यमद्य युद्धं तु भवतो राज्ये न दृश्यते"। राजोवाच। "आसमुद्रकरग्राहिणो मम युद्धे परिपंथी कोऽपि नास्ति तत्केनसमं युद्धं भविष्यति"। कुमार उवाच। "देव, राज्यस्य फलं विजयसुखं, विना युद्धेन कुतो विजयः, कुतो वा तत्सुखम्, यदि देवो मन्यते तदाहमितो गच्छामि यस्य च राज्यमहं गमिष्यामि स एव देवस्य युद्धपरिपंथी भविष्यति"। राजा सक्रोधमाह। "रे कुमार, कस्त्वं कुमारः? केन वा दर्पेणैवं भाषसे?। गच्छ तावद्यत्र गच्छसि यत्र त्वं यास्यसि तत्रैवाऽहं प्रयाणं करिष्यामि"। कुमार उवाच। "अयमहं गच्छामि"। ततः कुमारस्तु चीत्कारनाम्नो राज्ञो राज्यं जगाम। ततस्तं तत्र गतं श्रुत्वा काशीश्वरस्तुरगबलसहितश्चीत्कारं प्रति ययौ। कियताऽपि कालेन तं सन्निधानमागतं श्रुत्वा चीत्कारः स्वमंत्रिभिः समं मंत्रयामास। "काशीश्वरो महाराजः कोपाविष्टो मामुद्दिश्य समायाति। तदिदानीं किं विधातुमुचितं भवति"। मंत्रिण ऊचुः "देव, भवतः परिमितबलस्य तेन महाबलेन समं युद्धं नोचितम्। नवा तस्य महेच्छस्य संधानक्षमं भवतो धनमपि विद्यते। तदिदानीं दुर्गाश्रयणमुचितं दुर्गाश्रयणमुचितं"। ततः पलायितुमुद्यतं

चीत्कारराजानं दृष्ट्वा मल्लदेवोऽब्रवीत् "राजन्, किमिति पलाय्यते। भवन्तमुद्दिश्य काशीश्वरो न कदाप्यागतो नवाऽग्रेऽप्यागमिष्यति। यदि भवान् प्रत्येति तदा कथयामि तस्यागमननिमित्तम्। भवता न भेतव्यं"। चीत्कार उवाच। "किं तन्निमित्तं"? मल्लदेवः पूर्वकथां कथयामास। चीत्कार उवाच। "तर्हि किमुचितं"। मल्लदेव उवाच। "स यतः केवलं मामेवोद्दिश्य समायाति ततो भवता न पलायितव्यम्। किंच मयैकेन समं बहूनां तत्सुभटानां संग्रामकौतूहलं द्रष्टव्यम्"। चीत्कार उवाच। "कुमार, तेन महाराजेनाऽनन्तबलेन सममेकाकिनस्तव न समुचितं युद्धम्, नीतिविरुद्धमेतत्"। कुमार उवाच। "शूरः स्वकर्माणि परामर्शं न सहते"। चीत्कार उवाच। "तर्ह्यविमृश्यकारिणां विपदन्तः समारंभः"। कुमारो ब्रूते। "अलममुना विवादेन। यतः—

स्वयं करिष्ये यत् कर्म भोक्ष्ये तस्य स्वयं फलम्।
स्वाऽपराधविपन्नानां विपत्तिः केन शोच्यते"॥ ६

चीत्कार उवाच—

"युक्तं तुल्यबलं युद्धं यत्राऽस्ति जयसंशयः।
प्रबलेऽखिले वह्नौ के पतन्ति पतंगवत्"॥ ७

कुमार उवाच—

"यशश्चिचीर्षया येन मृत्युरंगीकृतो रणे।
तस्य किंवा भयस्थानं वैरिणः प्रबलादपि॥ ८

किंच—

यशःकामनया पुंसां रणे मरणमिच्छताम्।
परिपंथिमहत्त्वेन महत्त्वं यशसो भवेत्॥ ९

अपि च—

प्राणत्राणाय संग्रामात् पलायन्तेऽपि ये नराः।
मृत्युरावश्यकस्तेषां कार्पण्यमतिरिच्यते"॥ १०

चीत्कार उवाच । "कुमार, भवान् महावीरः काशीश्वरो महाराजस्ततो युवयोः संग्रामसंघर्षोऽस्माभिः श्रोतुमपि न शक्यते किं पुनर्द्रष्टुं"। कुमार उवाच । "यदि भवतो युद्धस्य दर्शनमप्यनभिमतं तदा भवान् गच्छतु क्वापि। यमपुरुषाऽनिरीक्ष्यमाणं स्थानं गत्वा च भवत्वमरः । मया च योद्धव्यमेव परं ततो मह्यं हस्तिनमेकं दत्वा गच्छतु भवान्। मया शून्यस्याऽपि भवतो नगरस्याऽवेक्षा कर्त्तव्या"। चीत्कारः कुमारस्य वचनेन तथा कृत्वा पलायितः। तदग्रिमप्रभाते भेरीभांकारैर्गगनाभोगं पूरयन् कूर्ममर्मस्पृशा तुरगखुरप्रहारेण धरणीमंडलं चपलयन् महाराजो जयचंद्रस्तन्नगरसान्निधानमाजगाम । मल्लदेवस्तमागतं ज्ञात्वा कृतसन्नाहः परिगृहीताऽस्त्रो गजारूढः पुरो गत्वा राजानं ददर्श। राजोवाच। "कस्त्वं रे, कुंजरारूढः ? संन्धानार्थिनश्चीत्कारस्य दूतो वा युद्धार्थिनो मल्लदेवस्य"? । मल्लदेव उवाच। "राजन्, न हि दूतो न संधानार्थी किंतु तव प्रतियुद्धार्थी मल्लदेवोऽस्मि"। राजा विहस्याऽह। "भद्र, मम प्रतिमल्लता सिद्धैव त्वामिदानीं समागत्याऽनुसर माम्"। मल्लदेव उवाच । "त्वमेव किन्न मामनुसरसि? संप्रति त्वं तुरगाधिरूढोऽस्यहं गजाधिरूढोऽस्मि त्वमप्यस्त्राणि धारयस्यहमप्यस्त्राणि धारयामि तदिदनीं प्रहारसमये क्व वचनवैचित्र्याणामवकाशः? " राजा साश्चर्यं सैनिकान् प्रत्याह। "रे रे सैनिका, जीवन्तं मल्लदेवं धृत्वा मे दत्त"। मल्लदेवः सर्वान् प्रत्याह—

"दिक्पालाः कृतिसाक्षिणश्च मुनयः सिद्धाः सुराः खेचराः
सर्वे पश्यत कौतुकं नृपिशितै रक्षोगणस्तृप्यतु ।
मोदं चाप्सरसः प्रयांतु सहसा वीराऽनुरागोत्सवा
एकः साहसमातनोति बहुभिः श्रीमल्लदेवो रणे"॥ ११

ततो निरोद्धुकामान् परितो भटान् बहून् मल्लदेवो नाराच-

चक्रैर्निजघान। तेन विनिहतान् निजप्रियसुभटान् भूमौ पतितान् दृष्ट्वा जयचन्द्रः सेनामादिदेश। "रे वीरपुरुषा, यद्येनं मुमूर्षुमवरोद्धुं न शक्नुथ तदा शरासारैः स्नपयत"। ततस्तां प्रभोराज्ञामासाद्य सुभटास्तं मल्लदेवं युगपदेव ज्याघोषनिर्घोषदारुणैः शरासारैरभ्यषिंचन्। शरशकलितशरीरः कुंजराद्भूमौ पपात। तथाच तत्समये कवेः कस्याऽपि श्लोकः।

अशीतिवर्षदेशीयश्चीत्कारः प्रपलायितः।
षोडशाब्दस्तु कर्णाटः सम्मुखःपतितो रणे॥ १२

तं च प्रचुरनाराचभिन्नशरीरं संग्रामभूमौ पतितं दृष्ट्वा राजोवाच। "हे सात्विकमूर्द्धन्य, कार्णाटकुलप्रतिष्ठाबीजांकुर जीविष्यसि"? मल्लदेव उवाच। "आवयोः? केन जितं युद्धं?" राजोवाच। "भवता जितम्?"। मल्लदेव उवाच। "कथमिदानीमवधारणीयम्" राजोवाच।

"अस्माभिः कृतसंग्रामो यदेको बहुभिर्हतः।
जिगीषति तथाऽप्यस्मान् कथं न विजयी भवान्"॥ १३

ततस्तेन राज्ञः प्रशंसावचनेन पुलकितबाहुमूलो मल्लदेवोऽब्रवीत् "देव जीविष्यामि"। तदनंतरम् तच्छौर्यपरितुष्टेन जयचन्द्रेण राज्ञा स कुमारः शरानुद्धृत्य स्वस्थानं नीतः पुत्रप्रेम्णाथ परिपाल्य क्षतेषु निर्वाणेषु प्रतिनिर्घोक्षितश्च। यतः।

तच्छौर्यं मल्लदेवस्य स विवेकश्च भूपतेः।
भूते भाविनि वा काले न जातो न जनिष्यति॥ १४

इति विद्यापतिविरचितायां पुरुषपरीक्षायां युद्धवीरकथा समाप्ता.

---

४. सत्यवीरकथा.

तद्यथा—

कलौ कामादिभिर्युक्तो मानवोऽनृतवागपि।
सत्यवीरकथां श्रुत्वा सर्वपापैः प्रमुच्यते॥ १

पुरा हस्तिनाम्नि नगरे महमदनामा यवनेश्वरो बभूव। तस्मिन्नासमुद्रं धरणीवलयं शासति तदुत्कर्षाऽसहिष्णुः काफरराजस्तमभियोद्धुं सकलबलसहितस्तत्राजगाम। यवनेश्वरस्तमायान्तं ज्ञात्वा कांबोजैस्तुरुष्कैश्चाश्ववारैर्बहुभिर्लक्षैः परिवृतः पुराद्बहिर्भूय तेन समं संग्राममंगीचकार। तदुभयसमारब्धे संग्रामे महीयसा काफरराजसैन्येन हन्यमाना निजबलयोधाः पराबभूवुः। ततस्तादृशं सिंहभयार्दितमिव करियूथं पलायमानं निजबलं दृष्ट्वा यवनेश्वर उवाच। "रे रे मम सैन्यसुभटा, राजानो, राजपुत्राश्च, युष्माकं मध्ये कोऽपि तथा नास्ति य इदानीं रिपुभयभग्नं मम सैन्यं स्वेन बाहुबलेन क्षणमवलम्बते?"। तच्च यवनराजवचनं श्रुत्वा कार्णाटकुलसंभवो नरसिंहदेवनामा चौवाणकुलसंभवश्चाचिकदेवनामा च राजकुमारावूचतुः। "राजन्, क इदानीं निम्नाभिमुखं पततः पयस इव रिपुत्रासभग्नस्य भवद्बलस्य परित्राता भवतु। यदि क्षणं परावृत्य भवानवलोकते तदाऽवामेव भवतो विपक्षं खड्गधाराप्रहारपरिकृत्तशिरस्कं करवाव"। यवनेश्वर उवाच। "साधु कुमारौ साधु। युवाभ्यामन्यः क एवं व्यवस्यति"। ततो नरसिंहदेवः पुलकालंकृतबाहुमूलः कुलिशपाताऽधिकेन कशाघातेन तुरगं त्वरयित्वा परावृत्याऽतर्कित एव काफरराजबलं प्रविवेश। प्रविश्य च जितारिसैन्यं प्रकाशितमायान्तं सितातपत्रपरिचितं काफरराजं शल्येन हृदि हतवान्। काफरराजस्तु गतप्राणो भूमौ निपपात। चाचिकदेवेन च भूमौ पतितस्य शिरश्छित्वा यवनराजस्य पुरो नीतं। यवनेश्वर उवाच। "कस्येदं शिरः?" चाचिकः कथयति। "काफरराजस्य"। यवनेश्वर उवाच। "केनाऽसौ हतः?"। चाचिको ब्रूते। "राजन्, तुलितपार्थेन नरसिंहदेवेन हतः। ततः पश्चाद्गामिना मया शिरश्छिन्नम्"। यवनेश्वरः पृच्छति। "नरसिंहदेवः कुत्र"।

चाचिको ब्रूते । "काफरराजसन्निधानवर्तिभिः स्वामिवधाऽमर्षितैः सुभटैर्बहुभिरेको हन्यमानो मया दृष्टः क्वगतः क्वेदानीमस्ति वा तन्न ज्ञायते"। ततो यवनराजः परसैन्यं हतनायकं पलायमानं दृष्ट्वा परमसानन्दो बभूव तदनुगामिनश्च स्वसैनिकान् प्रत्याह । "रे रे मम सैनिकाः पलायमानान् भटान् किं हथ? संप्रति मम राज्यरक्षितारं काफरराजकृतान्तं नररूपिणं सिंहमेव नरसिंहदेवं ज्ञापयत" । तदनंतरमेकत्र संग्रामप्रदेशे बहुतरनाराचभिन्नशरीरं वहद्रुधिरधारासहस्रं पुष्पितं किंशुकमिव वेदनामूर्छितम् नरसिंहदेवं यवनराजो ददर्श तुरंगादुत्तीर्य च बभाषे। "हे नरसिंहदेव, जीविष्यसि?" नरसिंहदेव उवाच। "राजन्, मया यत्कृतं तदवगतं भवता?" यवनेश्वर उवाच। "ज्ञातं मया कथितं चाचिकदेवेन त्वया मम शत्रुर्हतः" नरसिंहदेव उवाच। "तर्हि जीविष्यामि यतः।

स्वीकृतं दुष्करं कर्म मया यस्य हितेच्छया।
तेन विज्ञायमानो मे फलितः श्रमपादपः"॥ २

ततस्तस्य शरीरादापुंखनिमग्नान् नाराचनुद्धृत्य यवनराजस्तं कुमारं भेषजप्रयोगेण नियमेन च स्वल्पैरेवदिवसैर्निर्वाणक्षतमचीकरत्। तदनन्तरं सहस्रसंख्यैस्तुरगैर्लक्षसंख्यैः कांचनैश्छत्रचामरादिभिश्च तं पूजयितुमुपचक्रमे। प्रसादावसरे नरसिंहदेव उवाच। "राजपुत्राणां युद्धं स्वाभाविक एव धर्मस्तत्किमद्भुतं कृतं। यदियं मम पूजा क्रियते, यदि पूजैव कर्तव्या तदा चाचिकदेवस्य क्रियतां येन रिपुशिरोऽप्यानीय सत्यपक्षानुरोधेन भवतः पुरस्तान्मम यशः प्रकाशितं स्वपौरुषं न प्रख्यापितम्। अन्यथा नीयमानं रिपुमरणचिह्नं रिपुशिरो दृष्ट्वा कोवाऽध्वगमिष्यत् यन्मया मारितो रिपुरिति तदयमेव प्रथमं पूज्यतां" । चाचिकदेव उवाच । "कुमार नरसिंह, मैवं ब्रूहि

महं तव पराक्रमफलमादाय परोच्छिष्टजीवी भविष्यामि" ।
नरसिंहदेव उवाच । "साधु सत्यवीर साधु ।

अनेन तव सत्येन सर्वमेवोचितं तव ।
महेच्छोऽसि विदग्धोऽसि सतीपुत्रोऽसि चाचिक" ॥ ३

ततस्तयोः कुमारयोः परस्परालापमाकर्णयता समुपजातपरितोषेण यवनराजेन द्वावपि कुमारौ तुल्यमेव सत्कृतौ.

इति पुरुषपरीक्षायां सत्यवीरकथा सम्पूर्णा.

---

११. सुबुद्धिकथा.

तद्यथा—

मेधा च प्रतिभा चैव बुद्धिर्यस्य गरीयसी ।
सुबुद्धिरिति विख्यातः संदेहे निर्णयक्षमः ॥ १

आसीन्मिथिलायां कर्णाटकुलसंभवो हरसिंहदेवो नाम राजा। तस्य सांख्यसिद्धांतपारगामी दंडनीतिकुशलो गणेश्वरो नाम मंत्री बभूव । तस्य च नानाविधां सुबुद्धितां श्रुत्वा देवगिरे रामदेवो राजा परमसाश्चर्यश्चिंतयामास । 'कथं मर्त्यस्य मर्त्यलोकवासिनोऽपि बृहस्पतेरिव मनीषा श्रूयते । भवतु निरूपयामि तावत्' । तदनन्तरं स राजा हरसिंहदेवेन राज्ञा समं मैत्रीमाचरत् । यतः—

सदृशेन समं पुंसः प्रेमोदर्कसुखं भवेत् ।
स्थिरक्रियेण शूरेण कृतज्ञेन महात्मना ॥ २

अपि च ।

नष्टे कोशे हते सैन्ये भृत्ये च प्रकृतिं गते ।
कुलीनेन कृता मैत्री पुंसः कल्पलतायते ॥ ३

तदनंतरमुभयदिगुपचारेण सौहृदे समुत्पन्ने स राजा राम-

देवो हरसिंहदेवं लिखितद्वारा ययाचे 'यन्मह्यं द्वौ पुरुषौ प्रेषयितव्यौ एकः सुधीः द्वितीयो मूर्खश्चेति'। तदालोक्य लिखनं पठन् स राजा चिंतयामास 'यन्मित्रवचनमपरिहार्यम् कं सुधियं कंच मूर्खं प्रेषयिष्यामीति'। चिंताव्याकुलितं राजानं दृष्ट्वा मन्त्रिराज उवाच। "देव, किमिति चिंता कृतास्ति"। राजोवाच "मित्रनियोगाऽनिर्वाहः परमलज्जास्थानं ततस्तत्र कोवा सुधीः कोवा मूर्खः प्रेषयितव्य इति चिंतयामि"। मंत्रिराज उवाच। "न कश्चित् प्रेषायितव्यः"। राजोवाच। "आः शांतं पापं मित्रप्रार्थनाया भंगो जायते"। मंत्रिराजो ब्रूते। "मित्राऽभ्यर्थनायाः सिद्धिरेव भवति यतो रामदेवो महाराजस्तस्य देवगिरिराज्ये किंवस्तु दुर्लभम्? कति पंडिताः कति मूर्खा वा न संति? तदितः प्रहितेन मूर्खेण पंडितेन वा किं तस्य प्रयोजनम्? ततस्तर्कयामि स राजा परमविदग्धः कुतुकी च तथाविधपुरुषद्वयप्रार्थनाव्याजेन भवतो मंत्रिणं मां परीक्षते यदहं मूर्खं पंडितं च परिचिनोमि न वेति"। राजोवाच "तत् किं विधातुमुचितम्"? मंत्री ब्रूते। "देवेदमुत्तरं लिखितव्यं यत् सुधीरत्र राज्ये नास्ति। नवा भवतोऽपि राज्ये लक्ष्यते। स वाराणस्यामन्यत्र वा पुण्यतीर्थे काप्यनुसंधातव्यः। यतो बुद्धेः फलमात्महितं तदस्मिन्निन्द्रजालप्राये बुद्धिमता किमर्थं स्थातव्यम्। बुद्धिमान् काऽपि निर्जने गिरिकंदरे वा समाधिस्थो भविता। मूर्खस्तु सर्वत्राऽपि सुलभः किं तस्याऽवस्तुनः प्रस्थापनेन। चिह्नं तु तस्य परिचयाऽर्थं लिख्यत एव। तद्यथा—

> समाने हस्तपादादौ दैवाधीने च वैभवे।
> यो निंदां विंदते लोके समूर्खः कथ्यते बुधैः॥ ४

अपि। च—

> लब्ध्वाऽपि मानुषं जन्म पुण्यं येन न संचितम्।

नाऽर्जितं च यशः शुद्धं स मूर्ख इति कथ्यते ॥ ५

राजोवाच। "तर्हि तथा क्रियताम्"। ततो राजमंत्रिभ्यां परामृश्य रामदेवराज्ञि तदुत्तरं लिखितम् । ततस्तदुत्तरं प्राप्य राजा रामदेवः परमपरितुष्टो बभूव। सभासदां मध्ये तं राजानं मंत्रिणं च स्तुतवान् 'साधु भूपाल, साधु यस्याऽयं तव राजनीतिसमुद्रकर्णधारो धर्मज्ञो मंत्री विद्यते' । तथा च तत्सामयिकः कस्यापि श्लोकः—

गणेश्वरगुणग्रामं गुणिनो गणयंति ये ।
नूनमंभोनिधेरंभः कुंभैराकलयंतिते ॥ ६

तथाहि ।

लौकिकेवैदिके चैव यस्य कार्ये न निश्चयः ।
भवत्यन्यादृशस्तस्य कुतश्चन्द्रामलं यशः ॥ ७

इति पुरुषपरीक्षायां सुबुद्धिकथा सम्पूर्णा·

---

१२. वंचककथा.

द्वौ कुबुद्धिरबुद्धिश्च सुबुद्धेर्व्यतिरेकिणौ ।
संक्षेपेण कथाद्वारा कथ्येते सांप्रतं मया ॥ १

तयोः प्रथमं कुबुद्धिकथा प्रस्तूयते —

सैव बुद्धिर्भवेद्यस्य तीक्ष्णाप्यपथगामिनी ।
स कुबुद्धिरिति ख्यातः पापाऽपयशसोः पदम् ॥ २

कुबुद्धिः परिचेतव्यः कथाद्वारा पुनःपुनः ।
तत्संसर्गपरित्यागः सम्यक्परिचितेः फलम् ॥ ३

सच द्विविधः तदुक्तं—

वंचकः पिशुनश्चैव कुबुद्धिर्द्विविधो मतः ।
द्वावेतौ पापकर्माणौ जायेते मलिने कुले ॥ ४

तत्र वंचको यथा—

कूटकर्मालयो दक्षो मृदुवाग् दारुणक्रियः।
परवित्तापहर्त्ता च वंचकः स तु कीर्तितः॥ ५

आसीद्गोदावरीतीरे विशाला नाम नगरी। तस्यां च समुद्रसेनाऽभिधानो राजा बभूव। तस्यपुत्रं चन्द्रसेननामानं शुद्धहृदयं दृष्ट्वा तन्नगरवासिना वंचकेन जिनमताऽनुसारिणा वणिजा चिंतितम्। यतः—

शार्दूलस्य मृगाभक्ष्या नागा इव गरुत्मतः।
असाधोः साधवो भक्ष्याः श्येनस्येवेतरे खगाः॥ ६

'तदयं कुमारः साधुप्रकृतिर्मम निश्चितं सुखग्राह्यधनो भविष्यति तदेनमुपसर्पामीति' परामृश्य स बालकं तं राजकुमारं सिषेवे। गुंजाफलप्राया दुर्जनस्य प्रकृतिः परिणामविरसाऽप्यापातसुरसा भवति। तथा प्रकृत्या तं कुमारं सेवमानः सवया वशं नीतवान्। ततो वंचकश्चिंतयामास 'यदेनं केनाप्युपायेन देशान्तरं नीत्वाऽस्य द्वारा राजकोशसारभूतानि रत्नानि हरामि'। ततश्च विश्रंभप्रस्तावे कुतूहलप्रस्तावे च देशांतरकथां श्रवणरमणीयां मुहुर्मुहुः कथयति। तत्कथाश्रवणरसिकं कुमारं विदित्वा वणिगुवाच। "कुमार, यौवराज्येऽपि वर्तमानस्य भवतो नित्यसुलभैरप्युपभुक्तैरेव भोग्यवस्तुभिः कुतः सुखम्? सुखं तु देशान्तरे संभवति यत्प्रत्यहमदृष्टदर्शनमभुक्तभोजनमननुभूतानुभवश्च जायते। तथाहि—

नद्यः फुल्लसरोरुहा वनभुवः पुष्पानमद्वीरुधः
शैलाः कांचनरत्नचित्रकटकाः प्रोत्तुंगहर्म्याः पुरः।
नानाकेलिविचक्षणा युवतयः शूराश्च योगाहवा
दृश्यंते भुवि केन कोमलहृदा देशानगत्वा बहून्॥ ७

चंद्रसेन उवाच "सखे, महती ममोत्कंठा वर्तते। कथं

देशांतराणि दृश्यंताम् ”? वणिगुवाच “कुमार, भारलघुना गुरुमूल्येन धनेन निर्वहति देशान्तरदर्शनम् यदि मनः स्थिरं भवति। धनं तु राजकुमारस्य विद्यत एव? तदा मनः परं स्थिरीक्रियतां राजकुमारेण” कुमार उवाच “सखे, मनःस्थैर्यं कृतम्” वंचको ब्रूते “यदि कथेयमन्यकर्णपथगामिनी न भवति, परतर्कविषया च न भवति तदा निर्वहति कार्यं” कुमार उवाच “न तर्कणीयं केनाऽपि” ततस्तथा देशांतरसाभिलाषं कुमारं तथाविधधनसमेतमाखेटकव्याजेन नीत्वा चलितः स वणिक्। कियतो दूरात् सैन्यं परावर्त्य वराऽश्वारूढौ द्वावेतौ कांचिद्दिशमुद्दिश्य जग्मतुः। ततो दूरगमनपरिश्रांतौ क्षुत्पिपासापराभूतौ क्वचिदरण्ये जलाशयसन्निधाने महावृक्षमेकं ददृशतुः। तस्य छायायां द्वावपि तुरंगादवतेरतुः। कुमारस्तु कृतजलपानः परमसुखी छायामासाद्य तृणशय्यायां निद्राणो बभूव। तं निद्राणं दृष्ट्वा वंचकेन चिंतितं ‘यन्मम कृत्यस्याऽयमेवाऽवसरः’। ततः पादसंवाहनं कुर्वाणेन दुरात्मना कुमारस्य निद्रा निरूपिता। तं गाढनिद्रं विदित्वा लताभिर्बबंध। तदनन्तरं लताबद्धसर्वगात्रस्य तस्य हृदयमारुह्य शस्त्रीमादाय मनसा विचारयामास। ‘जीववधो न भवेत् हतप्रायो जीवन्मृतकः कथं स्यात् तदेनमंधं विधाय निजप्रयोजनं साधयामीति’ निश्चित्य चक्षुषी स्फोटयामास। यावत् कुमारः “सखे, परित्राहीति” वदति तावदसौ कृतकर्मा धनं तुरगौ चादाय पलायितः। कुमारस्तु तत्रारण्ये कृताऽर्त्तनादो रुरोद। रुदंश्चक्षुर्वेदनया निर्दयनिक्षिप्तहस्तपादस्त्रुटितबंधो बभूव। परिश्रान्तो निस्सहो निष्क्रियश्च भूमौ निपपात। तत्र वृक्षे दयालुर्नाम वृद्धशुकः कश्चिद्वसति। तस्य द्वौ पुत्रौ महाशुकौ संचरणाऽसमर्थस्य प्रत्यहमाहारमानीयानीय पितृभक्त्या प्रयच्छतस्तदा च तौ तं वृद्धशुकं पितरं भोज-

यित्वा कथयामासतुः। "पितः, अद्याऽऽवाभ्यां नर्मदातीरे महदपूर्वं कष्टस्थानं च दृष्टम्"। वृद्धशुक उवाच। "किं तदपूर्वं? किं वा कष्टस्थानं च दृष्टं"? महाशुकौ कथयतः। "यत्तु यूथिकापुर-नाम्नि नगरे नीलरथभूपालस्य एक एव चित्ररथनामधेयः कुमारः। स चांऽधो वैद्यजनसेव्यमानोऽप्यंधतां न मुंचति। तेन रात्रौ निर्दीपं गृहमिव तद्राज्यं महत्कष्टस्थानं दृष्टमावाभ्याम्"। वृद्ध-शुक उवाच। "पुत्रौ नष्टचक्षुषश्चक्षुर्बलाय भेषजं वर्त्तते ते भिषजो न जानंति"। तावूचतुः। "किं तद्भेषजम्"? वृद्धशुकः कथयति। "एतस्यैव तरोः कुसुमेन शुष्केणाऽऽर्द्रेण वा यद्यंजनं क्रियते तदा नष्टचक्षुश्चक्षुष्मान् भवति"। तदाकर्ण्य कुमार-श्चिंतयामास। 'अहो विधिरनुकूलो दृश्यते यद्विहगाऽऽलापनेऽपि चक्षुर्भेषजप्रस्तावना जाता। भेषजमपि सुलभमिदानीं तदस्य वृक्षस्य पुष्पेण चक्षुरञ्जनमाचारामि'। तावत्कुमारेण तथा कृतम्। ततः प्रथमांजनेन चक्षुर्वेदना शांता। द्वितीयांऽजनेन भावा जाताः। तृतीयांऽजनेन प्रकृष्टा दृष्टिर्बभूव। ततः परमहृष्टः कुमार-श्चिंतयामास। 'यदिदानीमसन्मैत्री जाता विपत्तिस्तीर्णाऽग्रे किं विधेयमस्ति। अनया दुर्दशया यदि पुनर्गृहं गम्यते तदा-न्येषामुपहासस्थानम्। आत्मनश्च कार्पण्यं मरणादपि निंदितम्। ततो गृहं न यास्यामि। वरं चोपलब्धाऽनुभावमिदमेव भेषजं नीत्वा यूथिकापुरं गच्छामि। तं चित्ररथं राजकुमारं सलोचनं करवाणि। तेनैव तस्य पिता नीलरथो मम कामनां पूरयि-ष्यतीति' परामृश्य भेषजमादाय स कुमारः पंथानं पृच्छन् कियताऽपि कालेन यूथिकापुरं जगाम। नीलरथस्य दर्शनं विधाय तत्पुत्रं चित्ररथं चक्षुष्मन्तं चकार। नीलरथस्तु परि-तुष्टः सर्वं तस्योदंतं परिपृच्छतिस्म। तस्य कथया गुणेन शीलेन च तदीयं कुलं ज्ञात्वा चित्ररथकनीयसीं चित्रसेना-

नाम्नीं स्वदुहितरं विवाहविधिना राज्यचतुर्थभागसमेतां तस्मै ददौ। ततः प्रभृति चंद्रसेनश्चंद्राननया चित्रसेनया प्रियया सह निष्कंटकं राज्यसुखमनुभवति। एकदा कस्मिन्नप्युत्सव-समये स चंद्रसेनो राज्ञो नीलरथस्य श्वशुरस्याऽगारं गच्छ-न्नकस्मात्पथि तं वंचकं वणिजमागच्छंतं ददर्श। दृष्ट्वा च तुरंगा-दवतीर्य तमालिलिंग। वंचकस्तु तं दृष्ट्वा कथमत्राऽपि स एव कुमार इति पलायांबभूव। पलायमानं तु पदातिभिरानीय कुमारस्तं वणिजमालिंग्य मित्रलाभपरितुष्टो राजकुलगमनं परि-हृत्य तेन वणिजा सह निजगृहमागत्य रहस्युपविष्टः। कुमार उवाच। "मित्र, कथय वार्ताम्। तथा लब्धधनोऽपि कथमित्थं दुरवस्थोऽसि"। वणिगुवाच। "स्वकर्मफलपरिणामेन"। कुमार उवाच। "मित्र, विस्मर तत्। अन्यत्कथय कथं दुर्बलोऽसि"। वणिगुवाच। "कुमार, वणिगहं स्वभावाल्लुब्धस्तेन भवधीयधनेन वाणिज्यार्थं वहित्रमारुह्य समुद्रपारं गतोऽस्मि तत्र बहुगुणं वाणिज्यमभूत्। तस्मादागच्छतो मम तटनिकटे समुद्रे वहित्रं निर्ममज्ज। धनानि विनष्टानि। प्राणाऽवशेषोऽहमागतोऽस्मि। तत्प्रा-णान्मम सापराधस्य गृह्णातु कुमारः"। चंद्रसेन उवाच। "मित्र, न भेतव्यं। त्वं मम मित्रमसि। यावज्जीवं हि परिपालनीया सतां मैत्री। वित्तं विनष्टमिति तत्राऽधिकां चिंतां न करिष्यसि। तद-धिकमपरं वित्तं दास्यामि"। वणिगुवाच। "कुमार नेदं प्रत्येति स्वाऽपराधमुषितं मे हृदयम् यतो मम न कोऽपि त्वयि मित्राऽनुरूपो व्यवहारः। कथं पुनः प्रसीदति भवान्? चन्द्रसेन उवाच"। मित्र, ममाऽयत्तं मत्कर्म। भवतः कृतेरहं कः। तथाहि—

भवान्धर्त्तां किंचिद्भवतु पदवी काऽपि भवतो
मया तु त्वन्मैत्रीप्रवणमनसा किं न विहितम्।

परित्यक्तं राज्यं स्वजनसहितं हंत विपुलं
स्वकृत्यं स्वायत्तं न खलु परकृत्ये प्रभुरहम् ॥ ८

एतच्च पद्यं श्रुत्वा लज्जाविदीर्णहृदयो वंचकः पंचत्वं जगाम। कुमारस्तन्मरणदुःखेन सुतरां रुरोद। रुदंतं स्वामिनं दृष्ट्वा चित्रसेनाऽब्रवीत्। " कोऽयं ? कस्मादागतः ? कस्मान्मृतः ? कुतो भवानित्थं करुणाधीनो रोदिति " ? चंद्रसेन उवाच। " पुराऽनेन महत्युदारता कृता यतो धनाऽपहारकेनाऽपि स्वहस्तपतितोऽपि मूलघातं न हतोऽस्मि "। चित्रसेनोवाच।" नाथ, सोऽस्य प्रमादो न तु ज्ञानपूर्वको व्यापारः " चन्द्रसेन उवाच। " तथाऽपि महानेवाऽयं यतो लज्जया प्राणान्परितत्याज। तथाहि ॥

सलज्जः पुरुषः श्रेष्ठः कापथेऽपि व्रजन्कचित्।
लज्जा हि जायते पुंसः कुलीनस्य च मानसे ॥ ९

ततः कुमारस्तस्य वणिजस्तत्सजातीयद्वारा संस्कारमौर्ध्वदेहिकं च कारितवान्। वंचकस्तथाऽपि निजव्यापारादैहिकमयशः पारलौकिकंच नरकमाससाद ॥

इति पुरुषपरीक्षायां वंचककथा सम्पूर्णा.

---

१६. शस्त्रविद्यकथा.

सविद्यस्य कथां श्रुत्वा विद्यासूत्कंठते मनः।
विद्याभ्यासपरस्यापि यशः पुण्यं च जायते॥ १
सविद्यो विद्यया युक्तस्ताश्च विद्याश्चतुर्दश।
प्राधान्यं च द्वयोस्तासां विद्यानां शस्त्रशास्त्रयोः॥ २
उत्तमं हि धनं विद्या दीयमानं न हीयते।
राजदायादचौराद्यैर्ग्रहीतुं नापि शक्यते॥ ३

पुरुषं साहसक्लेशाद्यर्जनाऽयासकारिणम् ।
लक्ष्मीर्विमुञ्चति क्वाऽपि विद्याभ्यस्ता न मुंचति ॥ ४
किं तस्य मानुषत्वेन बुद्धिर्यस्य न निर्मला ।
बुद्ध्याऽपे किं फलं तस्य येन विद्या न संचिता ॥ ५
सविद्यः पुरुषश्रेष्ठो यत्र कुत्राऽपि तिष्ठति ।
तत्रैव भवति श्रीमान् पूजापात्रं च भूभुजाम् ॥ ६
आसंगो धृतिरभ्यासो देवताशक्तिरेव च ।
चत्वारो मुनिभिः प्रोक्ता विद्योपायाः पुरातनैः ॥ ७
पंकिले पामरग्रामे पुरे पिशुनसेविते ।
राष्ट्रे चाऽविज्ञभूपाले सविद्यस्त्रिषु सीदति ॥ ८
शस्त्रविद्यः शास्त्रविद्यो लोकविद्यस्तथैव च ।
सोपविद्यश्च चत्वारः सविद्याः परिकीर्तिताः ॥ ९

तत्रादौ शस्त्राविद्यकथा प्रस्तूयते । यतः—

शस्त्राविद्या स्वभावेन सर्वाभ्योऽस्ति महीयसी ।
शस्त्रेण रक्षिते राष्ट्रे शास्त्रचिंता प्रवर्त्तते ॥ १०

तद्यथा—

यः समस्तेषु शस्त्रेषु कृताऽभ्यासश्च तत्त्ववित् ।
शस्त्रविद्यः समाख्यातः सोऽस्त्रव्यापारपारगैः ॥ ११

बभूव धरा नाम राजधानी । तत्र विवेकशर्मणः पुत्रो निर्विवेको नाम ब्राह्मणः प्रतिवसति । स च वेदाध्ययनपराङ्मुखः स्वाचारनिरपेक्षो व्याधप्रसंगेन मृगयारसिको बभूव । एकदा मातुरनुनयेन मृगवधार्थमरण्यं न जगाम । गृहांगणे निषण्णः पुरश्च देवालयकोटरे कूजतः पारावतान् दृष्ट्वा चिंतयामास 'यदिदं देवालयमारुह्य पारावतशावकान् पोथयामि'। तथा हि—

कामुको न विना स्त्रीभि र्न खलः खलतां विना ।
न विना हिंसया हिंस्रः सुखं कुत्राऽपि विंदति ॥ १२

ततः स ब्राह्मणः पारावतशावकार्थी देवालयमारुह्य कोटरे निक्षिप्तहस्तः कोटरस्थं सर्पं फणायां धृत्वा कपोतशावकभ्रमेणाऽचकर्ष। कोटरादाकृष्टेन तेन सरीसृपेण वेष्टितबाहुः परमत्रस्तश्चिंतयामास 'यदहं सर्पमत्यजन्नेकहस्तावलंबेन देवालयादवरोढुं न शक्नोमि; त्यजंश्च सर्पेणैव दष्टव्योऽस्मि तत्किमिदानीं करवाणि'। तदनंतरं संकटपतित उच्चैरार्तस्वरं चकार 'त्रायंतां मां लोका' इति च प्रोवाच दुर्बुद्धिः। यतः—

ज्ञातं दोषमनादृत्य व्यसनेषु प्रवर्त्तते।
कुधीः कातरतां याति लब्ध्वा व्यसनजं फलम्॥ १३

तदीयमार्तरवमाकर्ण्य लोका वर्तुलीबभूवुः। पश्चात्तां कथां श्रुत्वा राजा भोजदेवोऽपि ब्राह्मणरक्षार्थी तत्राऽजगाम। तदनंतरं सर्वैर्विचिंत्यमानोऽपि ब्राह्मणरक्षाक्षमः शीघ्रतया कश्चिदुपायो न निर्द्धारितः। तस्योच्चतरस्याऽभ्रंलिहशिरसो देवाऽलयशिखरस्यैकहस्तमात्राऽवलंबेन स्थितं संदिग्धं ब्राह्मणं दृष्ट्वा करुणार्द्रहृदयो भोजदेवो राजा सर्वानादिदेश। "रे रे लोकाः, कश्चिदस्ति युष्माकं मध्ये य एनं ब्राह्मणं त्रायते सुवर्णलक्षं च गृह्णाति यस्य प्रयुक्त्या पराक्रमेण वा ब्राह्मणोऽयं कुशली देवालयादवतरति तस्मै निश्चितमहं लक्षं सुवर्णानि दास्ये।" तदा कीर्तिसिंहनाम्ना केनाऽपि राजपुत्रेण धनुर्विद्याविचक्षणेनोक्तम्। "देव, ब्राह्मणरक्षार्थं महती प्रयुक्तिर्न कर्तव्या अहमल्पेनैवायसेन ब्राह्मणमवतारयामि ततो ब्राह्मणस्तावदिदानीं सर्पवेष्टितं बाहुं स्तब्धं कृत्वा दर्शयतु"। तथा कृतवति ब्राह्मणे स राजपुत्रः कोदंडमाकृष्य संधानं विधाय नाराचचक्रेण सर्पस्य शरीरं तथा चिच्छेद यथा छिन्नं सर्पस्य कलेवरं भूमौ पपात ब्राह्मणकरे कुशपत्रसमानाऽपि लेखा न भूता। पश्चात्करस्थितां सर्पफणां परित्यज्य लब्धस्वान्तस्वास्थ्यो ब्राह्मणो देवालया-

त्पूर्ववद्देवाऽवततार। राजा च तं राजपुत्रं स्वीकृतसुवर्णलक्षं कृत्वा परैश्च वासःप्रभृतिभिर्बहुभिर्वस्तुभिः परितोषयामास। श्लोकस्तु ॥

ब्राह्मणस्य कृता रक्षा लक्षं लब्धं च कांचनम्।
राज्ञा चाऽभ्यर्चितो बाहुर्विद्यया किं न लभ्यते ॥ १४

इति पुरुषपरीक्षायां शस्त्रविद्यकथा समाप्ता.

---

२५. हासविद्यकथा.

तद्यथा—

हासेन विद्यया यस्तु प्रभोर्भवति वल्लभः।
विकृतांगवचःकृत्यैर्हासविद्यः स उच्यते ॥ १

बभूव कांची नाम राजधानी तस्यां सुप्रतापो नाम राजा। तत्रैकदा कस्याऽपि धनिकस्य धनं चोरयंतश्चत्वारश्चौरा संधिद्वारि प्रशास्तृपुरुषैः प्राप्ताः शृंखलेन बद्धा राज्ञे निवेदिताश्च। राजा च घातकपुरुषानादिदेश। “रे रे घातकपुरुषाः, चतुरोऽपि चौरानेतान्नगराद्बहिर्नीत्वा शूलमारोप्य मारयत। तथा हि—

संवर्द्धनं च साधूनां दुष्टानां मर्दनं तथा।
राजधर्मं बुधाः प्राहुर्दंडनीतिविचक्षणाः ॥ २

ततो राजाज्ञया घातकपुरुषैस्त्रयश्चौराः शूलमारोप्य हताः। चतुर्थेन चिंतितं। यत्—

प्रत्यासन्नेऽपि मरणे रक्षोपायो विधीयते।
उपाये सफले रक्षा भवत्येव न संशयः ॥ ३

अपि च—

व्याधिना पीड्यमानोऽपि मार्यमाणोपि भूभुजा।
प्रत्यायाति यमद्वारात् प्रतीकारपरो नरः ॥ ४

चौर उवाच “रे रे घातकपुरुषाः, त्रयश्चौरा युष्माभिर्हता

एव। इदानीं राजाऽग्रे मद्वचनं श्रावयित्वा मां मारयत। यतोऽहमेकां महतीं विद्यां जानामि। मयि मृते साऽस्तं यास्यति। राजा तु तां गृहीत्वा मां मारयतु। तेन विद्या मर्त्यलोके तिष्ठेत्"। घातका उचुः। "रे चौर पुरुषाऽधम, वधस्थानमानीतोसि। किमतोऽपि जीवितुमिच्छसि। कां विद्यां जानासि। कथं वा तवाऽधमस्य विद्या भूपालेन ग्रहीतव्या"। चौर उवाच। "रे घातकाः, किं ब्रूथ राजकार्यबाधां कर्त्तुमिच्छथ। यदि राजा श्रास्यति तदाऽवश्यं तेन ग्रहीतव्या महतीयं विद्या। किं च विद्यावार्त्ताकथकेभ्यो युष्मभ्यमपि प्रभुणा प्रसादः कर्त्तव्यः"। ततस्तस्य चौरस्य वचनैः स्वामिकार्याऽनुरोधेन घातकैः सा वार्त्ता राज्ञे निवेदिता। राजा च कौतुकमाकर्ण्य चौरमाहूय पप्रच्छ। राजोवाच। "रे चौर, कां विद्यां जानासि?" चौर उवाच। "देव, सुवर्णकृषिं जानामि"। राजोवाच"। "का परिपाटी"। चौर उवाच। "देव, सर्षपपरिमाणानि सुवर्णबीजानि कृत्वा भूमावुप्यंते मासमात्रेण सर्षपसदृशा एव कंदल्यो भवंति देवः प्रत्यक्षं पश्यतु"। राजोवाच। "चौर, सत्यमेतत्?" चौर उवाच। "देवस्य पुरतः कस्याऽसत्यभाषणे शक्तिः? यदि मम वचनं व्यभिचरति तदा मासांते ममाऽप्यंतो भविष्यति। तदाऽपि देवः शास्तिकरणे प्रसादकरणे च प्रभुरेव स्थास्यति"। राजोवाच। "भद्रं वप सुवर्णम्"। ततश्चौरः सुवर्णं दाहयित्वा सर्षपमात्राणि बीजानि कृत्वा राजांऽतःपुरक्रीडासरसस्तटे परमनिगूढस्थाने भूपरिष्कारं कृत्वा बभाषे। "देव, क्षेत्रबीजे संपन्ने, वप्ता कश्चिद्दीयताम्"। राजोवाच। "त्वमेव किं न वपासि"। चौर उवाच। "यदि सुवर्णवपने ममैवाऽधिकारो भवति तदा किमहं दुःखी भवामि। किं तु सुवर्णवपने चौरस्याऽधिकारो नाऽस्ति। येन कदाऽपि किमपि न चोरितमस्ति स वपतु। देव एव किं न वपति"?

राजोवाच। "मया चारणेभ्यो दातुं तातचरणानां धनं चोरितं"। चोर उवाच। "तर्हि मंत्रिणो वपतु"। मंत्रिण ऊचुः। "वयं राजोपजीविनः कथमस्तेयिनो भवामः" चौर उवाच। "तर्हि धर्माऽधिकारी वपतु"। धर्माऽध्यक्ष उवाच। "मयाऽपि बाल्य-दशायां मातुर्मोदकाश्चोरिताः"। चोर उवाच। "यूयं सर्वेऽपि चौराः कथमहमेव मारणीयोऽस्मि?" तच्चौरवचनं श्रुत्वा सभासदः सर्वे जहसुः। राजाऽपि हास्यरसाऽपनीतक्रोधो विहस्याऽह "रे चौर, न मारणीयोऽसि। हे मंत्रिणः, कुबुद्धिरपि बुद्धिमानयं चौरः हास्यरसप्रवीणश्च ततो ममैव संनिधाने तिष्ठतु प्रस्तावे मां हासयतु मोदयतु च"। ततः स चौरो राज्ञा स्वसन्निधाने धृतः। श्लोकस्तु—

न चौरादधमः कश्चित् स हि हासेन विद्यया।
मृत्युपाशं समुच्छिद्य राज्ञो वल्लभतां गतः॥ ५

इति पुरुषपरीक्षायां हासविद्यकथा समाप्ता.

जातकमाला

व्याघ्रीजातकम्.

श्रीमन्ति सद्गुणपरिग्रहमङ्गलानि
कीर्त्यास्पदान्यनवगीतमनोहराणि ।
पूर्वप्रजन्मसु मुनेश्चरिताद्भुतानि
भक्त्या स्वकाव्यकुसुमाञ्जलिनार्चयिष्ये ॥ १

श्लाघ्यैरमीभिरभिलक्षितचिह्नभूतै-
रादेशितो भवति यत्सुगतत्वमार्गः ।
स्यादेव रूक्षमनसामपि च प्रसादो
धर्म्याः कथाश्च रमणीयतरत्वमीयुः ॥ २

लोकार्थमित्यभिसमीक्ष्य करिष्यतेऽयं
श्रुत्यार्षयुक्त्यविगुणेन पथा प्रयत्नः ।
लोकोत्तमस्य चरितातिशयप्रदेशैः
स्वं प्रातिभं गमयितुं श्रुतिवल्लभत्वम् ॥ ३

स्वार्थोद्यतैरपि परार्थचरस्य यस्य
नैवान्वगम्यत गुणप्रतिपत्तिशोभा ।
सर्वज्ञ इत्यवितथाक्षरदीप्तकीर्तिं
मूर्ध्ना नमे तमसमं सहधर्मसंघम् ॥ ४

सर्वसत्त्वेष्वकारणपरमवत्सलस्वभावः सर्वभूतात्मभूतः पूर्वजन्मस्वपि स भगवानिति बुद्धे भगवति परः प्रसादः कार्यः । तद्यथानुश्रूयते रत्नत्रयगुरुभिः प्रतिपत्तिगुणाभिराधितगुरुभिर्गुणप्रविचयगुरुभिरस्मद्गुरुभिः परिकीर्त्यमानमिदं भगवतः पूर्वजन्मा-

वदानम्। बोधिसत्त्वः किलायं भगवान्भूतः प्रतिज्ञातिशयसदृशै-र्दानप्रियवचनार्थचर्याप्रभृतिभिः प्रज्ञापरिग्रहनिरवद्यैः कारुण्य-निस्यन्दैर्लोकमनुगृह्णन् स्वधर्माभिरत्युपनतशुचिवृत्तिन्युदितोदिते महति ब्राह्मणकुले जन्मपरिग्रहं चकार॥ स कृतसंस्कारक्रमो जातकर्मादिभिरभिवर्धमानः प्रकृतिमेधावित्वात्सानाथ्यविशेषा-ज्ज्ञानकौतूहलादकौसीद्याच्च नचिरेणैवाष्टादशसु विद्यास्थानेषु स्वकुलक्रमाविरुद्धासु च सकलासु कलास्वाचार्यकं पदमवाप।

स ब्रह्मवद्ब्रह्मविदां बभूव राजेव राज्ञां बहुमानपात्रम्।
साक्षात्सहस्राक्ष इव प्रजानां ज्ञानार्थिनामर्थचरः पितेव॥ ५

तस्य भाग्यगुणातिशयसमावर्जितो महाँल्लाभसत्कारयशो-विशेषः प्रादुरभूत्। धर्माभ्यासभावितमतिः कृतप्रव्रज्यापरिचयस्तु बोधिसत्त्वो न तेनाभिरेमे।

स पूर्वचर्यापरिशुद्धबुद्धिः कामेषु दृष्ट्वा बहुदोषजातम्।
गार्हस्थ्यमस्वास्थ्यमिवावधूय कंचिद्वनप्रस्थमलंचकार॥ ६
स तत्र निःसङ्गतया तया च प्रज्ञावदातेन शमेन चैव।
प्रत्यादिदेशेव कुकार्यसङ्गाद्विश्लिष्टशिष्टोपशमं नृलोकम्॥ ७
मैत्रीमयेण प्रशमेण तस्य विस्यन्दिनेवानुपरीतचित्ताः।
परस्परद्रोहनिवृत्तभावास्तपस्विवद्व्याडमृगा विचेरुः॥ ८
आचारशुद्ध्या निभृतेन्द्रियत्वात्संतोषयोगात्करुणागुणाच्च।
असंस्तुतस्यापि जनस्य लोके सोऽभूत्प्रियस्तस्य यथैव लोकः॥
अल्पेच्छभावात्कुहनानभिज्ञस्त्यक्तस्पृहो लाभयशःसुखेषु।
स देवतानामपि मानसानि प्रसादभक्तिप्रवणानि चक्रे॥ १०
श्रुत्वाऽथ तं प्रव्रजितं मनुष्या गुणैस्तदीयैरवबद्धचित्ताः।
विहाय बन्धूंश्च परिग्रहांश्च तच्छिष्यतां सिद्धिमिवोपजग्मुः॥
शीले शुचावि‌न्द्रियभावनायां स्मृत्यप्रमोषे प्रविविक्ततायाम्।
मैत्र्यादिके चैव मनःसमाधौ यथाबलं सोऽनुशशास शिष्यान्॥

अथ कदाचित्स महात्मा परिनिष्पन्नभूयिष्ठे पृथूभूते शिष्यगणे प्रतिष्ठापितेऽस्मिन्कल्याणे वर्त्मन्यवतारिते नैष्कर्म्यसत्पथं लोके संवृतेष्विवापायद्वारेषु राजमार्गीकृतेष्विव सुगतिमार्गेषु दृष्टधर्मसुखविहारार्थं तत्कालशिष्येणाजितेनानुगम्यमानो योगानुकूलान्पर्वतदरीनिकुञ्जाननुविचचार ॥

अथात्र व्याघ्रवनितां ददर्श गिरिगह्वरे।
प्रसूतिक्लेशदोषेण गतां निस्पन्दमन्दताम् ॥ १३

परिक्षामेक्षणयुगां क्षुधा छाततरोदरीम्।
आहारमिव पश्यन्तीं बालान्स्वतनयानपि ॥ १४

स्तन्यतर्षादुपसृतान्मातृविस्रम्भनिर्व्यथान्।
रोरूयितरवैः क्रूरैर्भर्त्सयन्तीं परानिव ॥ १५

बोधिसत्त्वस्तु तां दृष्ट्वा धीरोऽपि करुणावशात्।
चकम्पे परदुःखेन महीकम्पादिवाद्रिराट् ॥ १६

महत्स्वपि स्वदुःखेषु व्यक्तधैर्याः कृपात्मकाः।
मृदुनाप्यन्यदुःखेन कम्पन्ते यत्तदद्भुतम् ॥ १७

अथ स बोधिसत्त्वः ससंभ्रमाम्रेडितपदं स्वभावातिशयव्यञ्जकं करुणाबलसमाहिताक्षरं शिष्यमुवाच। "वत्स वत्स,।

पश्य संसारनैर्गुण्यं मृग्येषा स्वसुतानपि।
लङ्घितस्नेहमर्यादा भोक्तुमन्विच्छति क्षुधा ॥ १८

अहो बतातिकष्टेयमात्मस्नेहस्य रौद्रता।
येन मातापि तनयानाहारयितुमिच्छति ॥ १९

आत्मस्नेहमयं शत्रुं को वर्धयितुमर्हति।
येन कुर्यात्पदन्यासमीदृशेष्वपि कर्मसु ॥ २०

तच्छीघ्रमन्विष्यतां तावत्कुतश्चिदस्याः क्षुद्दुःखप्रतीकारहेतुर्यावन्न तनयानात्मानं चोपहन्ति। अहमपि चैनां प्रयतिष्ये साहसादस्मान्निवारयितुम्"। स तथेत्यस्मै प्रतिश्रुत्य प्रकान्त-

स्तदाहारान्वेषणपरो बभूव ॥ अथ बोधिसत्त्वस्तं शिष्यं सव्यपदेशमतिवाह्य चिन्तामापेदे ।

संविद्यमाने सकले शरीरे कस्मात्परस्मान्मृगयामि मांसम् ।
यादृच्छिकी तस्य हि लाभसंपत् कार्यात्ययः स्याच्च तथा ममायम्॥

अपि च—

निरात्मके भेदिनि सारहीने दुःखे कृतघ्ने सततासुचौ च ।
देहे परस्मायुपयुज्यमाने न प्रीतिमान्यो न विचक्षणः सः ॥
स्वसौख्यसंङ्गेन परस्य दुःखमुपेक्ष्यते शक्तिपरिक्षयाद्वा ।
न चान्यदुःखे सति मेऽस्ति सौख्यं सत्यां च शक्तौ किमुपेक्षकः
स्याम् ॥ २३

सत्यां च शक्तौ मम यद्युपेक्षा स्यादाततायिन्यपि दुःखमग्ने ।
कृत्वेव पापं मम तेन चित्तं दह्येत कक्षं महताग्निनेव ॥ २४
तस्मात्करिष्यामि शरीरकेण तटप्रपातोद्धतजीवितेन ।
संरक्षणं पुत्रवधाच्च मृग्या मृग्याः सकाशाच्च तदात्मजानाम् ॥

किं च भूयः—

सन्दर्शनं लोकहितोत्सुकानामुत्तेजनं मन्दपराक्रमाणाम् ।
संहर्षणं त्यागविशारदानामाकर्षणं सज्जनमानसानाम् ॥ २६
विषादनं मारमहाचमूनां प्रसादनं बुद्धगुणप्रियाणाम् ।
व्रीडोदयं स्वार्थपरायणानां मात्सर्यलोभोपहतात्मनां च ॥ २७
श्रद्धापनं यानवराश्रितानां विस्मापनं त्यागकृतस्मयानाम् ।
विशोधनं स्वर्गमहापथस्य त्यागप्रियाणामनुमोदि नृणाम् ॥२८
कदा नु गात्रैरपि नाम कुर्यां हितं परेषामिति यश्च मेऽभूत् ।
मनोरथस्तत्सफलीक्रियां च संबोधिमग्र्यामपि चाविदूरे ॥

अपि च—

न स्पर्धया नैव यशोऽभिलाषान्न स्वर्गलाभान्न च राज्यहेतोः ।
नात्यन्तिकेऽप्यात्मसुखे यथायं ममादरोऽन्यत्र परार्थसिद्धेः ॥

तथा ममानने समानकालं लोकस्य दुःखं च सुखोदयं च।
हर्तुं च कर्तुं च सदास्तु शक्तिस्तमः प्रकाशं च यथैव भानोः॥
दृष्टेगुणेऽनुस्मृतिमागतो वा स्पृष्टः कथायोगमुपागतो वा।
सर्वप्रकारं जगतो हितानि कुर्यामजस्रं सुखसंहितानि॥ ३२
एवं स निश्चित्य परार्थसिद्धयै प्राणात्ययेऽप्यापतितप्रमोदः।
मनांसि धीराण्यपि देवतानां विस्मापयन्स्वां तनुमुत्ससर्ज॥

अथा सा व्याघ्री तेन बोधिसत्त्वस्य शरीरनिपातशब्देन समुत्थापितकौतूहलामर्षा विरम्य स्वतनयवैशसोद्यमात्ततो नयने विचिक्षेप। दृष्ट्वैव च बोधिसत्त्वशरीरमुद्गतप्राणं सहसाभिसृत्य भक्षयितुमुपचक्रमे॥ अथ स तस्य शिष्यो मांसमनासाद्यैव प्रतिनिवृत्तः कुत्रोपाध्याय इति विलोकयंस्तद्बोधिसत्त्वशरीरमुद्गतप्राणं तया व्याघ्रयुवत्या भक्ष्यमाणं ददर्श। स तत्कर्मातिशयविस्मयात्प्रतिव्यूढशोकदुःखावेगस्तद्गुणाश्रयबहुमानमिवोद्गिरन्निदमात्मगतं ब्रुवाणः शोभेत॥

अहो दयास्य व्यसनातुरे जने स्वसौख्यनैःसङ्ग्यमहो महात्मनः।
अहो प्रकर्षं गमिता स्थितिः सतामहो परेषां मृदिता यशःश्रियः॥
अहोपराक्रान्तमपेतसाध्वसं गुणाश्रयं प्रेम परं प्रदर्शितम्।
अहो नमस्कारविशेषपात्रतां प्रसह्य नीतास्य गुणातनुस्तनुः॥
निसर्गसौम्यस्य वसुंधराधृतेरहो परेषां व्यसनेष्वमर्षिता।
अहोमदीया गमिता प्रकाशतां खटुङ्कता विक्रमसम्पदानया॥
अनेन नाथेन सनाथतां गतं न शोचितव्यं खलु सांप्रतं जगत्।
पराजयाशङ्कितजातसंभ्रमो ध्रुवं विनिश्वासपरोऽद्य मन्मथः॥

सर्वथा नमोऽस्त्वस्मै महाभागाय सर्वभूतशरण्यायातिविपुलकारुण्यायाप्रमेयसत्त्वाय भूतार्थबोधिसत्त्वाय महासत्त्वायेति॥ अथ स तमर्थं सब्रह्मचारिभ्यो निवेदयामास।

तत्कर्मविस्मितमुखैरथ तस्य शिष्यै-
र्गन्धर्वयक्षभुजगैस्त्रिदशाधिपैश्च।

मालयाम्बराभरणचन्दनचूर्णवर्षै-

श्छन्नां तदस्थिवसुधा वसुधा बभूव ॥ ३८

तदेवं सर्वसत्त्वेष्वकारणपरमवत्सलस्वभावः सर्वभूतात्मभूतः पूर्वजन्मस्वपि स भगवानिति बुद्धे भगवति परः प्रसादः कार्यः। जातप्रसादैश्च बुद्धे भगवति परा प्रीतिरुत्पादयितव्या। एवमायतनगतो नः प्रसाद इत्येवमप्युन्नेयम्। तथा सत्कृत्य धर्मः श्रोतव्यः। एवं दुष्करशतसमुदानीतत्वात्करुणावर्णेऽपि वाच्यमेवं स्वभावातिशयस्य निष्पादिका परानुग्रहप्रवृत्तिहेतुः करुणेति ॥

इति व्याघ्रीजातकं प्रथमम्.

कुम्भजातकम्.

अनेकदोषोपसृष्टमतिकष्टं मद्यपानमिति साधवः परमप्यस्माद्वारयन्ति प्रागेवात्मानमिति॥ तद्यथानुश्रूयते। बोधिसत्त्वः किल करुणातिशयपरिभावितमतिः परहितसुखोपपादनपरः पुण्यां प्रतिपदमुद्भावयन्दानदमसंयमादिभिः कदाचिच्छक्रो देवानामिन्द्रो बभूव। स प्रकर्षिणामपि दिव्यानां विषयसुखानां निकामलाभी सन्नपि करुणावशगत्वान्नैव लोकार्थचर्यासमुद्योगशिथिलं मनश्चकार॥

प्रायेण लक्ष्मीमदिरोपयोगाज्जागर्ति नैवात्महितेऽपि लोकः।

सुरेन्द्रलक्ष्म्यापि तु निर्मदोऽसावभूत्परार्थेष्वपि जागरूकः॥

अनेकतीव्रव्यसनातुरेषु सत्त्वेषु बन्धुष्विव जातहार्दः।

धैर्यात्स्वभावज्ञतयाश्रितश्च नासौ विसस्मार परार्थचर्याम्॥

अथ कदाचित्स महात्मा मनुष्यलोकमवलोकयन्ननुकम्पासमावर्जितेन मैत्रस्निग्धेन स्वभावमहता चक्षुषा ददर्श सर्वमित्रं

नाम राजानमकल्याणमित्रसंपर्कदोषात्सपौरजानपदं मद्यपानप्रसङ्गाभिमुखम्। तत्र चास्यादोषदर्शितामवेक्ष्य महादोषतां च मद्यपानस्य स महात्मा महत्या करुणया समापीड्यमानहृदयश्चिन्तामापेदे। कष्टा बतेयमापदापतिता लोकस्य॥

प्रमुखस्वादु पानं हि दोषदर्शनविक्लवान्।
श्रेयसोऽपहरत्येव रमणीयमिवापथम्॥ ३

तत्किमत्र प्राप्तकालं स्यात्। भवतु दृष्टम्—

प्रधानभूतस्य विचेष्टितानि जनोऽनुकर्तुं नियतस्वभावः।
इत्यत्र राजैव चिकित्सनीयः शुभाशुभं तत्प्रभवं हि लोके॥

इति विनिश्चित्य स महासत्त्वस्तप्तकाञ्चनवर्णमापरुषोद्ग्रथितजटाविटपधरं वल्कलाजिनसंवीतमोजस्वि ब्राह्मं वपुरभिनिर्माय सुरापूर्णं च वामपार्श्वस्थं नातिबृहन्तं कुम्भं सर्वमित्रस्य राज्ञः परिषदि संनिषण्णस्य प्रस्तावोपनतासु प्रवृत्तासु सुरासवशीधुमैरेयमधुकथासु पुरतोऽन्तरिक्षे प्रादुरभूत्। विस्मयबहुमानावर्जितेन च प्राञ्जलिना तेन जनेनाभ्युत्थाय प्रत्यर्च्यमानः सजल इव जलधरो गम्भीरमभिनदन्नुच्चैरुवाच॥

पुष्पमालाहसत्कण्ठमिमं भरितमाकण्ठम्।
अवतंसकृताकुम्भं क्रेतुमिच्छति कः कुम्भम्॥ ५

सवलयमिव पुष्पमालया प्रविततयानिलकम्पलीलया।
किसलयरचनासमुत्कटं घटमिममिच्छति कः क्रयेण वः॥ ६

अथैनं स राजा विस्मयावर्जितकौतूहलः सबहुमानमीक्षमाणः कृताञ्जलिरुवाच॥

दीप्त्या नवार्क इव चारुतया शशीव
संलक्ष्यसे च वपुषान्यतमो मुनीनाम्।
तद्वक्तुमर्हसि यथा विदितोऽसि लोके
संभावना हि गुणतस्त्वयि नो विचित्रा॥ ७

शक्र उवाच—

पश्चादपि ज्ञास्यसि योऽहमस्मि घटं त्विदं क्रेतुमितो घटस्व।
न चेद्भयं ते परलोकदुःखादिहैव तीव्रव्यसनागमाद्वा॥ ८

राजोवाच अपूर्वः खल्वयमत्रभवतः पण्य विक्रयारम्भः—

गुणसंवर्णनं नाम दोषाणां च निगूहनम्॥
प्रसिद्ध इति लोकस्य पण्यानां विक्रयक्रमः॥ ९
युक्तो वानृतभीरूणां त्वद्विधानामयं विधिः।
नाहि कृच्छ्रेऽपि संत्यक्तुं सत्यमिच्छन्ति साधवः॥ १०
तदाचक्ष्व महाभाग पूर्णः कस्य घटो न्वयम्।
किं वा विनिमये प्राप्यमस्मत्तस्त्वादृशैरपि॥ ११

शक्र उवाच। श्रूयतां महाराज—

नायं तोयदविच्युतस्य पयसः पूर्णो न तीर्थाम्भसः।
कौअल्कस्य सुगन्धिनो न मधुनः सर्पिर्विशेषस्य वा।
न क्षीरस्य विजृम्भमाणकुमुदव्यभ्रेन्दुपादच्छवेः
पूर्णः पापमयस्य यस्य तु घटस्तस्य प्रभावं शृणु॥ १२
यत्पीत्वा मददोषविह्वलतयास्वातन्त्र्ययुक्तश्चर-
न्देशेष्वप्रपतेष्वपि प्रपतितो मन्दप्रभावस्मृतिः।
भक्ष्याभक्ष्यविचारणाविरहितस्तत्तत्समास्वादये-
त्तत्संपूर्णमिमं गतं क्रयपथं क्रीणीत कुम्भाधमम्॥ १३
अनीशः स्वे चित्ते विचरति यया संहृतमति-
र्द्विषां हासायासं समुपजनयन्गौरिव जडः।
सदोमध्ये नृत्येत्स्वमुखपटहेनापि च यया
क्रयार्हा सेयं वः शुभविरहिता कुम्भनिहिता॥ १४
पीत्वोचितामपि जहाति ययात्मलज्जां
निर्ग्रन्थवद्वसनसंयमखेदमुक्तः।

धीरं चरेत्पथिषु पौरजनाकुलेषु
सा पश्य तामुपगता निहितात्र कुम्भे ॥ १५
यत्पीत्वा वमथुसमुद्गतान्नलिप्ता
निःशङ्कैः श्वभिरवलिह्यमानवक्त्राः ।
निःसंज्ञा नृपतिपथिष्वपि स्वपन्ति
प्रक्षिप्तं क्रयसुभगं तदत्र कुम्भे ॥ १६
उपयुज्य यन्मदबलादबला विनिबन्धयेदपि तरौ पितरौ ।
गणयेच्च सा धनपतिं न पतिं तदिदं घटे विनिहितं निहितम् ॥
यां पीतवन्तो मदलुप्तसंज्ञा वृष्णयन्धका विस्मितबन्धुभावाः ।
परस्परं निष्पिपिषुर्गदाभिरुन्मादनी सा निहितेह कुम्भे ॥ १८
यत्र प्रसक्तानि कुलानि नेशुर्लक्ष्मीनिकेतान्युदितोदितानि ।
उच्छेदनी वित्तवतां कुलानां सेयं घटे क्रय्यतयाधिरूढा ॥ १९
अनियतरुदितस्थितविहसितवा-
ग्जडगुरुनयनो ग्रहवशग इव ।
परिभवभवनं भवति च नियतं
यदुपहतमतिस्तदिदमिह घटे ॥ २०
प्रवयसोऽपि यदाकुलचेतनाः स्वहितमार्गसमाश्रयकातराः ।
बहु वदन्त्यसमीक्षितनिश्चयं क्रयपथेन गतं तदिदं घटे ॥ २१
यस्या दोषात्पूर्वदेवाः प्रमत्ता लक्ष्मीमोषं देवराजादवाप्य ।
त्राणापेक्षास्तोयराशौ ममज्जुस्तस्याः पूर्णं कुम्भमेतं वृणीत ॥
ब्रूयादसत्यमपि सत्यमिव प्रतीतः
कुर्यादकार्यमपि कार्यमिव प्रहृष्टः ।
यस्या गुणेन सदसत्सदसच्च विद्या-
च्छापस्य मूर्तिरिव सा निहितेह कुम्भे ॥ २३
उन्मादविद्यां व्यसनप्रतिष्ठां साक्षादलक्ष्मीं जननीमघानाम् ।
अद्वैतसिद्धां कलिपद्धतिं तां क्रीणीत घोरां मनसस्तमिस्राम् ॥

परिमुषितमतिर्यया निहन्यादपि पितरं जननीमनागसं वा ।
अविगणितसुखायतिर्यतिं वा क्रयविधिना नृप तामितो गृहाण॥
एवंविधं मद्यमिदं नरेन्द्र सुरेति लोके प्रथितं सुराभ ।
न पक्षपातोऽस्ति गुणेषु यस्य स क्रेतुमुद्योगमिदं करोतु ॥ २६
निषेव्य यद्दुश्चरितप्रसक्ताः पतन्ति भीमान्नरकप्रपातान् ।
तिर्यग्गतिं प्रेतदरिद्रतां च को नाम तद्द्रष्टुमपि व्यवस्येत् ॥ २७
लघुरपि च विपाको मद्यपानस्य यः स्या-
न्मनुजगतिगतानां शीलदृष्टीः स हन्ति ।
ज्वलितदहनरौद्रे येन भूयोऽप्यवीचौ
निवसति पितृलोके हीनतिर्यक्षु चैव ॥ २८
शील निमीलयति हन्ति यशः प्रसह्य
लज्जां निरस्यति मतिं मलिनीकरोति ।
यन्नाम पीतमुपहन्ति गुणांश्च तांस्तां-
स्तत्पातुमर्हसि कथं नृप मद्यमद्य ॥ २९

अथ स राजा तैस्तस्य हृदयग्राहकैर्हेतुमद्भिर्वचोभिरवगामितमद्यपानदोषो मद्यप्रसङ्गादपवृत्ताभिलाषः शक्रमित्युवाच ॥

स्निग्धः पिता विनयभक्तिगुणाद्गुरुर्वा
यद्वक्तुमर्हति नयानयविन्मुनिर्वा ।
तावत्त्वया स्वभिहितं हितकाम्यया मे
तत्कर्मणा विधिवदर्चयितुं यतिष्ये ॥ ३०

इदं च तावत्सुभाषितप्रतिपूजनमर्हति नोऽत्रभवान्प्रतिग्रहीतुम्।
ददामि ते ग्रामवरांश्च पञ्च दासीशतं पञ्च गवां शतानि ।
सदश्वयुक्तांश्च रथान्दशेमान्हितस्य वक्ता हि गुरुर्ममासि ॥
यद्वा मयान्यत्करणीयं तत्संदेशादर्हत्यत्रभवान्भूयोऽपि मामनुग्रहीतुम् ॥ शक्र उवाच ।

अर्थोऽस्ति न ग्रामवरादिना मे सुराधिपं मामभिगच्छ राजन्।
संपूजनीयस्तु हितस्य वक्ता वाक्प्रग्रहेण प्रतिपन्मयेन ॥ ३२
अयं हि पन्था यशसः श्रियश्च परत्र सौख्यस्य च तस्य तस्य
अपास्य तस्मान्मदिराप्रसङ्गं धर्माश्रयान्मद्विषयं भजस्व ॥ ३३

इत्युक्त्वा शक्रस्तत्रैवान्तर्दधे। स च राजा सपौरजानपदो मद्यपानाद्विरराम ॥

तदेवमनेकदोषोपसृष्टमतिकष्टं मद्यपानमिति साधवः परमस्माद्वारयन्ति प्रागेवात्मानमिति। एवं लोकहितः पूर्वजन्मस्वपि स भगवानिति तथागतवर्णेऽपि वाच्यम् ॥

इति कुम्भजातकं सप्तदशम्.

हस्तिजातकम्.

परहितोदर्कं दुःखमपि साधवो लाभमिव बहुमन्यन्ते। तद्यथानुश्रूयते। बोधिसत्त्वः किलान्यतमस्मिन्नागवने पुष्पफलपल्लवालक्षितशिखरैरलंकृत इव तत्र तरुवरतरुणैर्विविधवीरुत्तरुतृणपिहितभूमिभागे वनरामणीयकनिबद्धहृदयैरनुत्कण्ठितमध्यास्यमान इव पर्वतस्थलैराश्रयभूते वनचराणां गम्भीरविपुलसालिलाशयसनाथे महता निर्वृक्षक्षुपसलिलेन कान्तारेण समन्ततस्तिरस्कृतजनान्ते महाकाय एकचरो हस्ती बभूव ॥

स तत्र तरुपर्णेन बिसेन सलिलेन च।
अभिरेमे तपस्वीव संतोषेण शमेन च ॥ १

अथ कदाचित्स महासत्त्वस्तस्य वनस्य पर्यन्ते विचरन्यतस्तत्कान्तारं ततो जनशब्दमुपशुश्राव। तस्य चिन्ता प्रादुरभूत्। किं नु खल्विदम्। न तावदनेन प्रदेशेन कश्चिद्देशान्तरगामी

मार्गोऽस्ति। एवं महत्कान्तारं च व्यतीत्य मृगयापि न युज्यते प्रागेव महासमारम्भपरिखेदमस्मत्सयूथ्यग्रहणम्।

व्यक्तं त्वेते परिभ्रष्टा मार्गाद्वा मूढदैशिकाः।
निर्वासिता वा क्रुद्धेन राज्ञा स्वेनानयेन वा॥ २
तथा ह्ययमनोजस्को नष्टहर्षोद्धवद्रवः।
केवलार्तिबलः शब्दः श्रूयते रुदतामिव॥ ३

तज्ज्ञास्यामि तावदेनमिति स महासत्त्वः करुणया समाकृष्यमाणो यतः स जननिर्घोषो बभूव ततः प्रससार। विस्पष्टतरविलापं च विषाददैन्यविरसं तमाक्रन्दितशब्दमुपशृण्वन्कारुण्यपर्युत्सुकमनाः स महात्मा द्रुततरं ततोऽभ्यगच्छत्। निर्गम्य च तस्माद्वनगहनान्निर्वृक्षक्षुपत्वात्तस्य देशस्य दूर एवावलोकयन्ददर्श सप्तमात्राणि पुरुषशतानि क्षुत्तर्षपरिश्रममन्दानि तद्वनमभिमुखानि प्रार्थयमानानि। तेऽपि च पुरुषास्तं महासत्त्वं ददृशुर्जङ्गममिव हिमगिरिशिखरं नीहारपुञ्जमिव शरद्बलाहकमिव पवनबलावर्जितमभिमुखमायान्तं दृष्ट्वा च विषाददैन्यपरीता हन्तेदानीं नष्टा वयमिति भयग्रस्तमनसोऽपि क्षुत्तर्षपरिश्रमाविहतोत्साहा नापयानप्रयत्नपरा बभूवुः॥

ते विषादपरीतत्वात्क्षुत्तर्षश्रमविह्वलाः।
नापयानसमुद्योगं भयेऽपि प्रतिपेदिरे॥ ४

अथ बोधिसत्त्वो भीतानवेत्यैतान् 'मा भैष्ट मा भैष्ट। न वो भयमस्ति मत्त' इति समुच्छ्रितेन स्निग्धाभिताम्रपृथुपुष्करेण करेण समाश्वासयन्नभिगम्य करुणायमाणः पप्रच्छ। केऽत्रभवन्तः केन चेमां दशामनुप्राप्ताः स्थ॥

रजःसूर्यांशुसंपर्काद्विवर्णाकृतयः कृशाः।
शोकक्लमार्ताः के यूयमिह चाभिगताः कुतः॥ ५

अथ ते पुरुषास्तस्य तेन मानुषेणाभिव्याहारेणाभयप्रदाना-

भिव्यञ्जकेन चाभ्युपपत्तिसौमुख्येन प्रत्यागतहृदयाः समभिप्रणम्यैनमूचुः ॥

कोपोत्पातानिलेनेह क्षिप्ताः क्षितिपतेर्वयम् ।
पश्यतां शोकदीनानां बन्धूनां द्विरदाधिप ॥ ६
अस्ति नो भाग्यशेषस्तु लक्ष्मीश्चाभिमुखी ध्रुवम् ।
सुहृद्वन्धुविशिष्टेन यद्दृष्टा भवता वयम् ॥ ७
निस्तीर्णामापदं चेमां विद्मस्त्वद्दर्शनोत्सवात् ।
स्वप्नेऽपि त्वाद्विधं दृष्ट्वा को हि नापदमुत्तरेत् ॥ ८

अथैनान्स द्विरदवर उवाच । अथ कियन्तोऽत्रभवन्त इति ॥ मनुष्या ऊचुः ।

सहस्रमेतद्वसुधाधिपेन त्यक्तं नृणामत्र मनोज्ञगात्र ।
अदृष्टदुःखा बहवस्ततस्तु क्षुत्तर्षशोकाभिभवाद्विनष्टाः ॥ ९
एतानि तु स्युर्द्विरदप्रधान सप्तावशेषाणि नृणां शतानि ।
निमज्जतां मृत्युमुखे तु येषां मूर्तस्त्वमाश्वास इवाभ्युपेतः ॥

तच्छ्रुत्वा तस्य महासत्त्वस्य कारुण्यपरिचयादश्रूणि प्रावर्तन्त समनुशोचंश्चैनान्नियतमीदृशं किंचिदुवाच । कष्टं भोः ।

घृणाविमुक्ता बत निर्व्यपत्रपा नृपस्य बुद्धिः परलोकनिर्व्यथा।
अहो तडिच्चञ्चलया नृपश्रिया हृतेन्द्रियाणां स्वहितानवेक्षिता॥
अवैति मन्ये न स मृत्युमग्रतः शृणोति पापस्य न वा दुरन्तताम्।
अहो बतानाथतमा नराधिपा विमर्शमान्द्याद्वचनक्षमा न ये ॥

देहस्यैकस्य नामार्थे रोगभूतस्य नाशिनः ।
इदं सत्त्वेषु नैर्घृण्यं धिगहो बत मूढताम् ॥ १२

अथ तस्य द्विरदपतेस्तान्पुरुषान्करुणास्निग्धमवेक्षमाणस्य चिन्ता प्रादुरभूत् । एवममी क्षुत्तर्षश्रमपीडिताः परिदुर्बलशरीरा निरुदकमप्रच्छायमनेकयोजनायामं कान्तारमपथ्यादनाः कथं व्यतियास्यन्ति । नागवनेऽपि च किं तदस्ति येनैषामेका-

हमपि तावदपरिक्लेशेन वार्त्ता स्यात्। शक्येयुः पुनरेते मदीयानि मांसानि पाथेयतामुपनीय दृतिभिरिव च ममान्त्रैः सलिलमादाय कान्तारमेतन्निस्तरितुं नान्यथा।

करोमि तदिदं देहं बहुरोगशतालयम्।
एषां दुःखपरीतानामापदुत्तरणप्लवम्॥ १४
स्वर्गमोक्षसुखप्राप्तिसमर्थं जन्म मानुषम्।
दुर्लभं च तदेतेषां मैवं विलयमागमत्॥ १५

स्वगोचरस्थस्य ममाभ्युपेता धर्मेण चेमेऽतिथयो भवन्ति।
आपद्गता बन्धुविवर्जिताश्च मया विशेषेण यतोऽनुकम्प्याः॥
चिरस्य तावद्बहुरोगभाजनं सदातुरत्वाद्विविधश्रमाश्रयः।
शरीरसंज्ञोऽयमनर्थविस्तरः परार्थकृत्ये विनियोगमेष्यति॥ १७

अथैनमन्ये क्षुत्तर्षश्रमघर्मदुःखातुरशरीराः कृताञ्जलयः साश्रुनयनाः समभिप्रणम्यार्ततया हस्तसंज्ञाभिः पनीयमयाचन्त।

त्वं नो बन्धुरबन्धूनां त्वं गतिः शरणं च नः।
यथा वेत्सि महाभाग तथा नस्त्रातुमर्हसि॥ १८

इत्येनमन्ये सकरुणमूचुः। अपरे त्वेनं धीरतरमनसः सलिलप्रदेशं कान्तारदुर्गोत्तारणाय च मार्गं पप्रच्छुः।

जलाशयः शीतजला सरिद्वा यद्यत्र वा नैर्मलमस्ति तायम्।
छायाद्रुमः शाद्वलमण्डलं वा तन्नो द्विपानामधिप प्रचक्ष्व॥
कान्तारं शक्यमेतच्च निस्तर्तुं मन्यसे यतः।
अनुकम्पां पुरस्कृत्य तां दिशं साधु निर्दिश॥ २०

संबहुलानि हि दिनान्यत्र नः कान्तारे परिभ्रमताम्। तदहास नः स्वामिन्निस्तारयितुमिति॥ अथ स महात्मा तैः करुणैः प्रयाचितैस्तेषां भृशतरमाक्लेदितहृदयो यतस्तत्कान्तारं शक्यं निस्तर्तुं बभूव तत एषां पर्वतस्थलं संदर्शयन्नभ्युच्छ्रितेन भुजगवरभोगपीवरेण करेणोवाच। अस्य पर्वतस्थलस्याधस्तात्पद्मोत्पलालं-

कृतविमलसलिलमस्ति महत्सरः। तदनेन मार्गेण गच्छत। तत्र-च व्यपनीतघर्मतर्षक्लमास्तस्यैव नातिदूरेऽस्मात्पर्वतस्थलात्पतितस्य हस्तिनः शरीरं द्रक्ष्यथ। तस्य मांसानि पाथेयतामानीय दृतिभिरिव तस्यान्त्रैः सलिलमुपगृह्यानयैव दिशा यातव्यम्। एवमल्पकृच्छ्रेण कान्तारमिदं व्यतियास्यथ। इति स महात्मा तान्पुरुषान्समाश्वासनपूर्वकं ततः प्रस्थाप्य ततो द्रुततरमन्येन मार्गेण तद्गिरिशिखरमारुह्य तस्य जनकायस्य निस्तारणापेक्षया स्वशरीरं ततो मुमुक्षुर्नियतमिति प्रणिधिमुपबृंहयामास॥

नायं प्रयत्नः सुगतिं ममाप्तुं नैकातपत्रां मनुजेन्द्रलक्ष्मीम्।
सुखप्रकर्षैकरसां न च द्यां ब्राह्मीं श्रियं नैव न मोक्षसौख्यम्॥
यत्त्वस्ति पुण्यं मम किंचिदेवं कान्तारमग्नं जनमुज्जिहीर्षोः।
संसारकान्तारगतस्य तेन लोकस्य निस्तारयिता भवेयम्॥

इति विनिश्चित्य स महात्मा प्रमोदादगणितप्रपातनिष्पेषमरणदुःखं स्वशरीरं तस्माद्गिरितटाद्यथोद्देशं मुमोच।

रेजे ततः स निपतञ्छरदीव मेघः
पर्यस्तबिम्ब इव चास्तगिरेः शशाङ्कः।
तार्क्ष्यस्य पक्षपवनोग्रजवापविद्धं
शृङ्गं गिरेरिव च तस्य हिमोत्तरीयम्॥ २३

आकम्पयन्नथ धरां धरणीधरांश्च
मारस्य च प्रभुमदाध्युषितं च चेतः।
निर्घातपिण्डितरवं निपपात भूमा-
वावर्जयन्वनलता वनदेवताश्च॥ २४

असंशयं तद्वनसंश्रयास्तदा मनस्सु विस्फारितविस्मयाः सुराः।
विचिक्षिपुर्व्योम्नि मुदोत्तनूरुहाः समुच्छ्रितैकाङ्गुलिपल्लवान्भुजान्॥
सुगन्धिभिश्चन्दनचूर्णरञ्जितैः प्रसक्तमन्ये कुसुमैरवाकिरन्।
अतान्तवैः काञ्चनभक्तिराजितैस्तमुत्तरीयैरपरे विभूषणैः॥ २५

स्तवैः प्रसादग्रथितैस्तथापरे समुद्यतैश्चाञ्जलिपद्मकुण्डलैः ।
शिरोभिरावर्जितचारुमौलिभिर्नमस्क्रियाभिश्च तमभ्यपूजयन् ॥
सुगन्धिना पुष्परजोविकर्षणात्तरंगमालारचनेन वायुना ।
तमभ्यजन्केचिदथाम्बरेऽपरे वितानमस्योपदधुर्घनैर्घनैः ॥ २८
तमर्चितुं भक्तिवशेन केचन व्यरासयन्द्यां सुरदुन्दुभिस्वनैः ।
अकालजैः पुष्पफलैः सपल्लवैर्व्यभूषयंस्तत्र तरूनथापरे ॥ २९
दिशः शरत्कान्तिमयीं दधुः श्रियं रवेः कराः प्रांशुतरा इवाभवन् ।
मुदाभिगन्तुं तमिवास चार्णवः कुतूहलोत्कम्पितवीचिविभ्रमः॥३०

अथ ते पुरुषाः क्रमेण तत्सरः समुपेत्य तस्मिन्विनीतधर्मतर्षक्लमा यथाकथितं तेन महात्मना तदविदूरे हस्तिशरीरं नचिरमृतं ददृशुः । तेषां बुद्धिरभवत् । अहो यथार्थं सदृशस्तस्य द्विरदपतेर्हस्ती ।

भ्राता नु तस्यैष महाद्विपस्य स्याद्बान्धवो वान्यतमः सुतो वा ।
तस्यैव खल्वस्य सिताद्रिशोभं संचूर्णितस्यापि विभाति रूपम् ॥
कुमुदश्रीरिवैकस्था ज्योत्स्ना पुञ्जीकृतेव च ।
छायेव खलु तस्येयमादर्शतलसंश्रिता ॥ ३२

अथ तत्रैकेषां निपुणतरमनुपश्यतां बुद्धिरभवत् । यथा पश्यामः स एव खल्वयं दिग्वारणेन्द्रप्रतिस्पर्धिरूपातिशयः कुञ्जरवर आपद्गतानामबन्धुसुहृदामस्माकं निस्तारणापेक्षया गिरितटादस्मान्निपतित इति ।

यः स निर्घातवद्भूत्कम्पयन्निव मेदिनीम् ।
व्यक्तमस्यैव पततः स चास्माभिर्ध्वनिः श्रुतः ॥ ३३

एतद्वपुः खलु तदेव मृणालगौरं
चन्द्रांशुशुक्लतनुजं तनुबिन्दुचित्रम् ।
कूर्मोपमाः सितनखाश्चरणास्त एते
वंशः स एव च धनुर्मधुरानतोऽयम् ॥ ३४

तदेव चेदं मदराजिराजितं सुगन्धिवाग्घ्रायतपीनमाननम् ।
समुन्नतं श्रीमदनर्पिताङ्कुशं शिरस्तदेतच्च बृहच्छिरोधरम् ॥३५
विषाणयुग्मं तदिदं मधुप्रभं सदर्पचिह्नं तटरेणुनारुणम् ।
आदेशयन्मार्गमिमं च येन नः स एष दीर्घाङ्गुलिपुष्करः करः॥
आश्चर्यमत्यद्भुतरूपं बत खल्विदम् ।
अदृष्टपूर्वान्वयशीलभक्तिषु क्षतेषु भाग्यैरपरिश्रुतेष्वपि ।
सुहृत्त्वमस्मासु बतेदमीदृशं सुहृत्सु वा बन्धुषु वास्य कीदृशम्॥
सर्वथा नमोऽस्त्वस्मै महाभागाय ।
आपत्परीतान्भयशोकदीनानस्मद्विधानभ्युपपद्यमानः ।
कोऽप्येष मन्ये द्विरदावभासः सिषत्सतामुद्वहतीव वृत्तम् ॥ ३८
क्व शिक्षितोऽसावतिभद्रतामिमामुपासितः को न्वमुना गुरुर्वने ।
न रूपशोभा रमते विना गुणैर्जनो यदित्याह तदेतदीक्ष्यते ॥ ३९
अहो स्वभावातिशयस्य संपदा विदर्शितानेन यथार्हभद्रता ।
हिमाद्रिशोभेन मृतोऽपि खल्वयं कृतात्मतुष्टिर्हसतीव वर्ष्मणा ॥

तत्क इदानीमस्य स्निग्धबान्धवसुहृत्प्रतिविशिष्टवात्सल्यस्यैवमभ्युपपत्तिसुमुखस्य स्वैः प्राणैरप्यस्मदर्थमुपकर्तुमभिप्रवृत्तस्यातिसाधुवृत्तस्य मांसमुपभोक्तुं शक्ष्यति। युक्तं त्वस्माभिः पूजाविधिपूर्वकमग्निसत्कारेणास्यानृण्यमुपगन्तुमिति ॥ अथ तान्बन्धुव्यसन इव शोकानुवृत्तिप्रवणहृदयान्साश्रुनयनान्गद्गदायमानकण्ठानवेक्ष्य कार्यान्तरमवेक्षमाणा धीरतरमनस ऊचुरन्ये। न खल्वेवमस्माभिरयं द्विरदवरः संपूजितः सत्कृतो वा स्यात्। अभिप्रायसंपादनेन त्वयमस्माभिर्युक्तः पूजयितुमिति पश्यामः ॥

अस्मन्निस्तारणापेक्षी स ह्यसंस्तुतबान्धवः ।
शरीरं त्यक्तवानेवमिष्टमिष्टतरातिथिः ॥ ४१
अभिप्रायमतस्त्वस्य युक्तं समनुवर्तितुम् ।
अन्यथा हि भवेद्व्यर्थो ननु तस्यायमुद्यमः ॥ ४२

स्नेहादुद्यतमातिथ्यं सर्वस्वं तेन खल्विदम्।
अप्रतिग्रहणाद्व्यर्थां कुर्यात्को न्वस्य सत्क्रियाम्॥ ४३
गुरोरिव यतस्तस्य वचसः संप्रतिग्रहात्।
सत्क्रियां कर्तुमर्हामः क्षेममात्मन एव च॥ ४४

निस्तीर्य चेदं व्यसनं समग्रैः प्रत्येकशो वा पुनरस्य पूजा।
करिष्यते नागवरस्य सर्वं बन्धोरतीतस्य यथैव कृत्यम्॥ ४५

अथ ते पुरुषाः कान्तारनिस्तारणापेक्षया तस्य द्विरदपतेरभिप्रायमनुस्मरन्तस्तद्वचनमप्रतिक्षिप्य तस्य महासत्त्वस्य मांसान्यादाय दृतिभिरिव च तदन्त्रैः सलिलं तत्प्रदर्शितया दिशा स्वस्ति तस्मात्कान्ताराद्विनिर्ययुः॥

तदेवं परहितोदर्कं दुःखमपि साधवो लाभमिव बहुमन्यन्ते। इति साधुजनप्रशंसायां वाच्यम॥ तथागतवर्णेऽपि सत्कृत्य धर्मश्रवणे च भद्रप्रकृतिनिष्पादनवर्णेऽपि वाच्यम्। एवं भद्रा प्रकृतिरभ्यस्ता जन्मान्तरेष्वनुवर्तत इति॥ त्यागपरिचयगुणनिदर्शनेऽपि वाच्यम्। एवं द्रव्यत्यागपरिचयादात्मस्नेहपरित्यागमप्यकृच्छ्रेण करोतीति। यच्चोक्तं भगवता परिनिर्वाणसमये समुपस्थितेषु दिव्यकुसुमवादित्रादिषु न खलु पुनरानन्दैतावता तथागतः सत्कृतो भवतीति। तच्चैवं निदर्शयितव्यम्। एवमभिप्रायसंपादनात्पूजा कृता भवति न गन्धमाल्याद्यभिहारेणेति॥

इति हस्तिजातकं त्रिंशत्तमम्.

नलचरित्रम्

आसीत् पुरा निषधेषु विश्वविख्यातकीर्तिर्वीरसेनस्य राज्ञस्सुत स्सत्यवादी वदान्यो हयविद्याकोविदो निजसौन्दर्य-निर्जितकन्दर्पो नलोनाम नरपतिः। तदैव विदर्भेषु भीमपराक्रम स्सकलसद्गुणनिलयो भीमोनाम भूपतिरभूत्। तमनपत्यं सन्तानार्थिनं पृथिवीपतिमेकदा दमनोनाम महर्षिरभ्यगच्छत्। भीमस्तमागतं महर्षिं महिष्यासह सत्कारादिना भृशमतोषयत्। तुष्टस्समुनिस्तस्मै सुतार्थिने वरमदात्। तस्माद्वरात्तस्य भीमस्य कालेन दमोदमनोदान्तश्चेति त्रयस्तनयाः, दमयन्तीत्येका तनयाचाजायन्त। दमयन्तीतु रूपेण गुणेन शीलेनच त्रिभुवनवनिताजनभूषणायिता बभूव। नलस्य दमयन्त्याश्च सौन्दर्यौदार्यादिकं वीक्ष्य जनाः नलस्य समीपे दमयन्त्येव तव सदृशीभार्या सा अतीव रूपवती त्रिभुवनेपि तत्सदृशी नारी नास्तीति दमयन्तीं, दमयन्त्यास्सविधे नल एव तव योग्यो वरः मन्मथोपि नतत्सम इति नलंच प्रशशंसुः। ततस्तयोरन्योन्यरूपाकर्णनेनानुरागो हृद्यंकुरितोबभूव॥

अथोत्कंठितो नलो मनोविनोदार्थमन्तपुरोपान्तगतं रम्यमुद्यानंगतः कांञ्चनमनोहरान् राजहंसान् विलोक्य कौतुकात्तेषामेकमग्रहीत्। तेनगृहीतस्सखेचरो मानुषगिरा तं व्याजहार, "राजन्नाहं हन्तव्यः, मुंचमां, तव प्रियं करिष्यामि, त्वां दमयन्त्याः पुरतस्तथा कीर्तयिष्यामि यथा सा त्वदन्यं पुरुषं स्वप्नेपि नमंस्यते" इति। तच्छ्रुत्वा स महीपतिस्तं हंसं व्यसृजत्।

ततस्तेविहङ्गमा विदर्भानभ्येत्य प्रमदावने वयस्याभिस्सह विहरन्त्या दमयन्त्याः समीपं जग्मुः। सखीगणसमन्विता सा तानद्भुताकृतीन् हंसान्वीक्ष्य सस्मेष्ट। ततस्ताः कन्यकाः कुतूहलात्तान् विहगान् ग्रहीतुं समुपाद्रवन्। दमयन्तीतु यं राजहंसं जिघृक्षुरधावत् स हंसो व्यक्तया वाचा तामवोचत्, "राजपुत्रि, किं मया गृहीतेन तव प्रयोजनं? अलमायासेन? अहं त्वदुपकारार्थमिहागतः; अस्ति निषधेषु नलो नाम महीपतिः, रूपे कन्दर्पमप्यतिक्रान्तः, यदि त्वं तस्य भार्या भवेस्तदा इदं तवजन्म रूपंच सफलंभवेत्। वयं देवगन्धर्वयक्षराक्षसमानुषादीन् दृष्टवन्तः, नचास्माभिस्तथाविधो रूपादिसंपन्नो दृष्टपूर्वः; त्वमपि रत्नं सुन्दरीणां, तद्युवयोस्सदृशयोस्समागमो रमणीयो भवेदिति"। तच्छुत्वा दमयन्ती तं दिव्यहंसं सत्यभाषिणं मत्वा त्वं नलमप्येवं वदेत्युक्त्वा सखीगणसमीपमगमत्। ततस्सहंसो निषधान् पुनरागत्य सर्वं नलाय निवेद्य यथाकाममगात्॥

अथ दमयन्ती हंसवचश्श्रवणात्प्रभृति पुष्पशरविशिखविद्धा नस्वस्था बभूव। सदा तं राजचन्द्रं चिन्तयन्ती विवर्णवदना, क्रीडामण्डनाहारादिष्वप्यलब्धरतिः पांडुवर्णा कृशा बभूव। तां तदाकारामस्वस्थां सखीगणो विदर्भनाथाय भीमाय न्यवेदयत्। तच्छुत्वा स नृपति र्दमयन्त्यास्समीपमागत्य तां सम्प्राप्तयौवनां नातिस्वस्थां विलोक्य तस्याः स्वयंवरं चिकीर्षुः सर्वेषां महीपालानां सविधे दूतान्व्यसृजत्। तेच पार्थिवा दमयन्त्याः स्वयंवरं तेभ्यः श्रुत्वा विचित्रवस्त्राभरणाद्यलंकृताः हस्त्यश्वरथघोषेण दिशः पूरयन्तो विदर्भानभिजग्मुः॥

अथैतस्मिन्नेव समये देवर्षिसत्तमौ महात्मानौ नारदपर्वतावटन्तौ देवलोकंगत्वा देवराजभवनं प्राविशतां। मघवा तौ दृष्ट्वा यथाविध्यर्चयित्वा कुशलमपृच्छत्। ततोनारदस्तमवदत्,

"मघवन् कुशलमावयोरिति"। तदनु दिवस्पतिः पुनरपृच्छत्। "ब्रह्मन्, ये धर्मज्ञाः पृथ्वीपालाः युद्धे अपराङ्मुखाः शस्त्रेण निधनं गच्छन्ति तेषामयमक्षयो लोको वर्तते यथा मम, क ते शूराः क्षत्रियाः न हि तान् दयितानतिथीनागच्छतश्चिरात्पश्यामीति"। नारदोऽवदत्, "सुनासीर, शृणु तत्कारणं येनात्र नागच्छन्ति महीपालाः; अस्तिविदर्भभूपतेः सुता दमयन्तीति, या विश्वंभरारम्भा सुरैरपि स्पृहणीया; अचिरात्तस्याः स्वयंवरो भविता, तां लोकलोचनचकोरचन्द्रिकां कांक्षन्तः क्षोणीपालाः सवाहना विदर्भान् गच्छन्तीति"। एवं नारदे कथयत्येव पावकधर्मराजाऽपांपतयो लोकपाला देवराजसमीपमाजग्मुः। ते सर्वेपि नारदवचश्श्रुत्वा कौतुकाकृष्टचित्ता वयमपि गच्छाम इत्यवोचन्। एवमुक्त्वा निर्गते पर्वतेन सह नारदे शक्राद्या लोकपाला दिव्यविमानेन वियन्मार्गेण विदर्भान् ययुः। नलोप्युन्मना दमयन्तीमुपलिप्सू रथारूढो विदर्भानगच्छत्॥

अथेन्द्राद्या लोकपाला विदर्भान् प्रति प्रस्थितं मूर्तिमन्तं मन्मथमिव स्थितं नलं पथि दृष्ट्वा, तस्य रूपसम्पदा विस्मिता मन्दसंकल्पा बभूवुः। ततस्ते लोकपाला नभस्थलादवतीर्य नलसमीपमागत्य तमवोचन्, "भो निषधाधिपते, अस्त्यस्माकं कोप्यर्थः साधनीयः, तत्कृते त्वं दूतो भवितुमर्हसीति"। तच्छ्रुत्वा याञ्चाभंगेष्वशिक्षितो नैषधो 'भविष्यामीति' तेभ्यः प्रतिज्ञाय तानपृच्छत्, "केभवन्तः? कोसावर्थः? यस्य कृतेऽहं दूत ईप्सित?" इति। पाकशासनोऽभाषत, "अस्मान् दमयन्त्यर्थमागतानमरान् जानीहि, अहमिन्द्रः, अयमग्निः, अयमपांपतिः, असौ नराणामन्तकृद्यमः। त्वमितोगत्वाऽस्मद्वचनाद्दमयन्तीमिदं वचनं ब्रूहि, महेन्द्राद्या लोकपालास्त्वां प्रेप्सवः स्वयंवरसभामायान्ति तेषामन्यतमं पतिं वृणुष्वेति"। तच्छ्रुत्वा विषण्णो नैषधः साञ्जलिरभाषत, "भो

लोकपालाः युष्माभिरेकार्थसमुपेतं मां यूयं प्रेषयितुं नार्हथ, यो यस्यां जाताभिलाषः स पुमान् परार्थं तामेव स्त्रियं कथमीदृशं वक्तुमुत्सहेत, तत् क्षमन्तां भवन्त" इति। ततो "दूतो भविष्यामीति प्रतिश्रुत्य कस्मात् त्वमेवं वदसि? तदिदं तव सत्याभिसन्धस्य नसदृशं, तद्व्रजेति" देवैस्सनिर्बंधमुक्तस्स नैषधस्तान् पुनरब्रवीत्। "सुरक्षितानि राजभवनानि कथं मया प्रवेष्टुं शक्यानीति"। "अस्मत्प्रभावात्केनाऽप्यलक्षितस्तस्याः पार्श्वंप्रवेक्ष्यसी"ति शक्रेणाभिहितो नलस्तथेति प्रतिपद्य, दमयन्त्या वासभवनं केनाऽप्यलक्षित एव प्रविश्य, विश्वातिशायिसौंदर्यशालिनीं, पूर्णचन्द्रमुखीं दासीगणसमावृतां तां दमयन्तीं विलोक्य विस्मयाविष्टश्चलितधृतिरनिमिषलोचनः पश्यन् क्षणं निष्पन्दस्तस्थौ। दृष्ट्वैव तां हरिणरमणीनयनां नलस्य तस्यामवर्धतानुरागः। ततः स देवसंदेशं स्मरन् कामाधीनं मनः कथंचिन्न्यवर्तयत। अथ दमयन्त्याश्चेट्यस्तं नैषधंदृष्ट्वा तस्य तेजसा धर्षितास्सम्भ्रान्तास्सत्वरमासनेभ्यस्समुत्थाय तूष्णीमेव तस्थुः न तं भाषितुं शेकुः। दमयन्तीतु नलं विलोक्य, 'किमयंदेवः, आहोस्वित गंधर्वः, किंवामूर्तिमान्मदन एवेति' शङ्कमाना, स्मयमानं तं सस्मितमवादीत्, "हे सर्वानवद्याङ्ग, कोभवान्, सुरक्षितमिदं भवनं कथं केनाप्यलक्षितः प्रविष्टोसि, किमत्रागमनप्रयोजनमिति"। नलस्तामवोचत्, "कल्याणि, मां देवदूतं नलं विद्धि। शक्राद्या दिक्पालास्त्वां प्राप्तुमिच्छन्ति, तेषामन्यतमं पतिं वृणुष्व तेषां प्रभावादेव प्रविशन्तं मामिह कोपि नापश्यत् नाप्यवारयदिति"। सा तच्छ्रुत्वा स्मितमुखी लज्जावनतवदना नलमवोचत् "राजन्, किमिदं मम-चित्तस्य परीक्षणं यदेवंभाषसे, यदा स हंसो मामवादीत् तदैव त्वं मया मनसा पतिः कल्पित। तच्चिरकृतं ममेमं संकल्पं नवृथाकर्तुमर्हसीति"। तच्छ्रुत्वा नलस्तामवोचत्, "शोभनाङ्गि, तिष्ठत्सु

शक्रादिषु लोकपालेषु, कथं मानुषमिच्छसि? येषां महात्मनां पादरजसाप्यहं न तुल्यः, तेषां मम चाजगजयोरिव महदन्तरमस्ति, य इदं कृत्स्नं जगत् क्षिप्रमेव भस्मीकर्तुं शक्नोति तं हुताशनं, यद्दण्डभयात् भूतग्रामो धर्ममेवानुरुध्यते तं धर्मराजं, योयं दैत्यदानवमर्दनः सर्वदेवानामधिपतिस्तं महेन्द्रं वा कावा स्त्री न वरयेत्। अपिच कोमलत्वेन प्रसिद्धा निशा यथा सूर्यादीन् परित्यज्य शीतांशुमेव वृणुतेस्म तथा शिरीषकुसुमकोमला त्वत्सदृशी कावा नारी मृदुस्वभावानामपांपतिं नवृणीत? तत्त्वं तान् देवान् प्राप्य पुण्यप्राप्यान् दिव्यान् भोगान् भुङ्क्ष्वेति"। एवंनलेनाभिहिता दमयन्ती साश्रुलोचना सगद्गदं तमवादीत्, "हे पृथ्वीपते, अहं देवान्नमस्कृत्य त्वामेव पतिं वृणे, सत्यमेतद्वदामि, यदिमां भजमानां प्रत्याख्यास्यसि, तर्हि विषमग्निं जलं रज्जुंवा समाश्रयिष्ये" इति। तच्छ्रुत्वा नलस्तामब्रवीत् "कल्याणि, कथमहं परार्थं दौत्येनागत्य स्वार्थं करोमि" इति। दमयन्त्यब्रवीत्, "राजन्नमया त्वं साम्प्रतमेव वरणीय इत्युच्यते, येन दोषस्तव भवेत्? किन्त्वायान्त्विन्द्राद्या दिक्पालास्त्वया सह मम स्वयंवरमण्डपं, अहं त्वां तेषां समक्षमेव वरिष्ये, एवंचेन्नदोषो भविष्यति" इति। नलस्तस्यास्तं निश्चलं संकल्पं बुध्वा हृष्टो दिक्पालान् प्रति प्रययौ। इन्द्राद्यास्ते नलमागतं दृष्ट्वाऽपृच्छन्। "राजन्, कच्चिद्दृष्टा त्वया दमयन्ती? श्राविताबाऽस्मत्संदेशं? श्रुत्वा सा किमब्रवीदिति"। नलस्तानब्रवीत् "भवद्भिरादिष्टो भवत्प्रभावात् केनाप्यलक्षितो दमयन्तीभवनं प्राविक्षं, प्रविष्टेन मया श्राविता तं यो भवद्भिस्सन्दिष्टः तच्छ्रुत्वा सा कृतसंकल्पा त्वामेव वरिष्ये इत्यवोचदिति"। एवमुक्त्वा तदनुज्ञातो नलो विदर्भानयासीत्॥

अथ शुभे तिथौ लग्नेच प्राप्ते भीमभूपतिरखिलानपि

महीपालान् स्वयंवरसभां समागन्तुमाह्वयत्। तच्छ्रुत्वा सर्वेऽपि नृपतयस्सत्वरं विविधवस्त्रभूषणाद्यलङ्कृताः कनकस्तंभतोरणादि विराजितं सुन्दरं स्वयंवरमन्दिरं प्रविश्य नानाविधस्वर्णमयासनेष्वासीना दमयन्तीं कांक्षन्तो दमयन्त्यागमनं प्रतीक्षमाणास्तस्थुः। पुण्यश्लोको नलोऽपि भूपालभूषणभासुरं स्वयंवरसदः प्रविश्य एकं कनकमयासनमभजत। ते नृपा मन्मथमिव मनोज्ञाकृतिं नलमालोक्य भीमसुतालाभे श्लथमनोरथा बभूवुः। तदा सुरेशाद्या लोकपाला दमयन्तीं वञ्चयितुं नलरूपं धृत्वा स्वयंवर सभामागत्य नलान्तिके समुपाविशन्। ततश्च विविधरत्नाभरणभूषिता भैमी राज्ञां चक्षूंषि मनांसिच मुष्णती स्वयंवरमण्टपं प्राविक्षत्। तस्याः प्रवेशमात्रेण तदंगे युगपत्पतिता महीपतीनां दृष्टिश्चिरं तत्रैव सक्ता बभूव। तत एकैकशो वन्दिवर्ण्यमानवंशनामपराक्रमान् नृपानुज्झन्ती क्रमान्नलान्तिकं प्राप्य पञ्च नलतुल्याकृतीन पुरुषान् दृष्ट्वा एतेषु नलं विविच्य ज्ञातुमसमर्था किमेतदिति सम्भ्रान्ता बभूव। तेषां यंयमपश्यत् तंतंनलममन्यत। ततस्सा मनस्यचिन्तयत्, इयं दिक्पालानां माया। त एव धृतनलरूपा मां प्रतारयितुमिहागताः; तत्कथमहं नलं जानीयां, कथंवा दिक्पालान् विद्यां, यानि देवानां चिह्नानि निर्निमेषत्वच्छायाविरहितत्वादीनि स्थविरेभ्यः श्रुतानि तानीह तिष्ठतामेकस्यापि न लक्षयामीति। एवं विचिन्त्य सा देवानामेव शरणं समयोचितममन्यत। अथ सा बद्धांजलिपुटा लोकपालान् सप्रणाममभाणीत्, "भो! देवाः, पूर्वमेव मया नलः पतित्वे वृतः, तत् पूर्ववृताद्वरादन्ये कन्यकायाः परपुरुषा इति विदितमेव भवतां, किंच स्वप्नेऽपि न नलादन्यत्र मम मनः प्रवर्तते। सत्यमिदं वदामि। तत् स्वस्वरूपंप्रादर्शयत, यथाहं पुण्यश्लोकं नलं लक्षयामीति"। एवं ते दमयन्त्या वचश्श्रुत्वा तस्याश्च नले तथ्यं दृढतरमनुरागं च विदित्वा यथोक्तं

चक्रिरे। ततस्सा दिक्पालान् स्तब्धलोचनान् अस्वेदान् पृथिवी-मस्पृशतश्चापश्यत्, नलंच निजच्छायाद्वितीयं म्लानस्रजं स्वेद-युक्तं भूमिष्ठं निमेषयुतं। अथ सा तान् देवांस्त्यक्त्वा लज्जावनत-वदना वरणस्रजं नलस्य कंठे न्यधात्। ततोनराधिपैर्देवैर्मह-र्षिभिश्च नलं प्रशंसद्भिः साधुसाध्विति साधुवादस्समुदीरितः। ततस्ते दिक्पालाः प्रहृष्टा नलाय वरान् प्रददुः। शचीपतिश्शक्रो यज्ञे प्रत्यक्षदर्शनं। यत्र नलो वाञ्छति तत्राग्निरात्मन आविर्भावं। अप्पतिरपि तत्रैवापां सत्तांच। यमस्तु यादृशे तादृशेप्यन्ने विशिष्ट-रसवत्तांचेति। एवं वरान् दत्वा यातेषु त्रिदिवं देवेषु पार्थिवाश्च विस्मयान्विता दमयन्त्या विवाहोत्सवदर्शनसुखमनुभूय मुदिताः स्वां स्वां पुरींप्रतिजग्मुः। निर्वृत्तेच विवाहोत्सवे नलस्तत्र यथा-कामं कतिपयादिवसानुषित्वा भीमिनानुज्ञातो दमयन्त्या सह निजं नगरं जगाम। गत्वाच तत्र मुदितस्तया भैम्या सह अरंस्त। धर्मेण पालयन् अरञ्जयत् प्रजाः। अश्वमेधादिभिरनेकैः क्रतुभि-श्चायाक्षीद्देवान्। अथ कालेन दमयन्त्यामिन्द्रसेनं सुतमिन्द्र-सेनांच कन्यकां जनयामास। एवं स वसुधाधिपो यजमानो विहरन् सम्पूर्णां वसुधां रक्षंश्च सुखमवर्तिष्ट॥

अत्रान्तरे शक्राद्या लोकपालास्त्रिदिवं यान्तो द्वापरेण सहा-यान्तं कलिं विलोक्य अपृच्छन्, 'कले, द्वापरेण सह क यास्यसीति'। "दमयन्त्याः स्वयंवरं गच्छामि, यतस्तस्यामासक्तं मे मन" इति कलिना कथितः पुरन्दरस्तमब्रवीत्, "कले न गन्तव्यं, तत एव वयमागताः। निर्वृत्तः स स्वयंवरः। वृतस्तया नृपो नलोऽस्मत्समक्ष-मिति"। तच्छ्रुत्वा कोपाविष्टः कलिस्तान् देवानवोचत्, "सा दमय-न्त्यतीव दंड्या यया अमर्त्यास्त्यक्त्वा मर्त्यो वृतः, नलश्च शप्तव्य" इति। ततश्शक्रस्तमशंसत्, अस्मदनुमत्यैव दमयन्त्या नलो वृतः। कावा स्त्रीगुणमणिप्रकरपयोनिधिं निखिलललनाजनविलोचन-

शीतरश्मिं नलं न वृणुयात्। यो निखिलधर्माणां वेत्ता, यथावच्च-रितधर्मः समधीतवेदवेदाङ्गकलापः, यस्य यज्ञेषु भृशं देवास्तृप्यन्ति, यस्मिन् सत्यं, धृति, ज्ञानं, दमश्शमश्च नित्यं सन्ति, एतादृशं नलं कोवा शप्तुमिच्छेत्। य एवंरूपं नलं शप्तुमिच्छति स घोरे नरके मज्जेदित्येवमुक्त्वा गतेषु तेषु, कलिर्द्वापरमब्रवीत्। "द्वापर, शक्रेणैवमभिहिताप्यहं कोपं संहर्तुं नोत्सहे, नले वत्स्यामि, राज्यात्तं भ्रंशयिष्यामि, नलदमयन्त्योर्वियोगंच कारिष्यामि, त्वम-प्यक्षान् समाविश्य मम साहाय्यं कर्तुमर्हसी"ति॥

एवं द्वापरेण सह कलिस्समयं कृत्वा निषधान् गत्वा तत्र प्रतिज्ञातार्थनिर्वाहाय शास्त्रीयमार्गानुवर्तिनो नलस्य छिद्रं दिवा-निशं दत्तदृष्टिश्चिन्वंश्चिरं न्यवसत्। एवं छिद्रं विचिन्वतः कले-र्द्वादशसमास्समतीताः। अथैकदा नलः कृत्वा मूत्रोत्सर्गमुप-स्पृश्य अकृतपादशौचः सन्ध्यामुपास्त। कलिश्चिरकांक्षितं तदेत-च्छिद्रं लब्ध्वा तं नलमविशत्। ततः कलिः पुष्करसमीपं गत्वाऽ-वदत्, "पुष्कर, एहि साम्प्रतं, नलेन सह द्वापराविष्टैरक्षैर्दीव्य, मत्साहाय्यात् त्वं द्यूते नलं जेष्यसि, नलं जित्वा निषधान् प्रति-पद्यस्वेति"। तच्छ्रुत्वा हृष्टः पुष्करस्तथेति नलसमीपमगच्छत्. कलिरपि वृषोभूत्वा पुष्करमन्वगच्छत्। पुष्करो मानिनमनि-वर्तिनं नलमासाद्य दीव्यावेत्यसकृदाह्वयत्। नलो मोहात्तथेति तत्प्रत्यपद्यत। ततस्तयोर्भ्रात्रोः परस्परं द्यूतं प्रावर्तत। पुष्करस्य स वृषभः पण आसीत्, नलस्य गजादयः। पुष्कर एवाजैषीत्। दमयन्त्याः पश्यन्त्याः नल एव मुहुरजीयत। एवं द्वित्रैर्दिनैः कोशे-बलेच हारितोपि नलः कल्याविष्टो दुरोदरान्नाचलत्। ततः पौरा मन्त्रिणश्च राज्ञो व्यसनमसहमानास्तस्मात्तं निवारयितुमिच्छवो राजभवनमभ्युपेत्य सूतमुखेन दमयन्त्यै न्यवेदयन्। तयाच विष-ण्णया, "राजन्, पौरजनो मन्त्रिसमेतः कार्यार्थी त्वांदिदृक्षुर्द्वारि-

तिष्ठतीति" पुनःपुनरभिहितोपि कलिविप्लुतो नलस्तां किंचिदपि-नैक्षिष्ट। तद्बुद्ध्वा मन्त्रिणः पौराश्च व्रीडिताश्शोचन्तो न्यवर्तिषत। एवं बहून् दिवसान् पुष्करस्य नलस्यच द्यूतमभवत्॥

ततः पतिं त्यक्तनृपकृत्यं देवनैकासक्तचित्तं हृतनिखिलवित्तं विलोक्य भृशं दुःखिता दमयन्ती तत्प्रियं चिकीर्षन्ती वार्ष्णेयं सूतमानाय्यावोचत्, "वार्ष्णेय, जानीषे त्वं यथा राजा त्वयि सदा सम्यग्वृत्त इति। तस्य त्वं साम्प्रतं साहाय्यं कर्तुमर्हसि। पश्य विधिविलसितं, यथा यथा पुष्करेण राजा जीयते, तथा तथास्य दुरोदरे रागोऽभिवर्धते। यथायथा पुष्करस्याक्षावशवर्तिनः पतन्ति, तथातथा नलस्य विपर्यस्ताः पतन्ति। सुहृद्बन्धुवाक्यानि यथा-पूर्वं न शृणोति। ममापि वाक्यं मोहितो नाभिनन्दति। तन्नमे भावश्शुध्यति। कदाचिदहितमापतेत्। तन्नलस्य दयितान्मनोज-वानश्वान् रथे संयोज्य इमौ दारकौ रथमारोप्य कुण्डिनपुरं गत्वा मम पितृसदने निक्षिप्य, स्यन्दनमश्वांश्च तत्रैव विसृज्य, तत्रैववा निवस, अन्यत्रवा यथाकामं गच्छेति"। तच्छ्रुत्वा नलसारथि-स्तत्सर्वममात्येभ्यो निवेद्य तैरनुज्ञातो राजदारकौ स्यन्दनमारोप्य कुंडिनपुरं गत्वा तौदारकौ स्यन्दनं तुरङ्गमांश्च तत्रैवावस्थाप्य, भीमनरपतिमामन्त्र्य, राजानं नलं शोचन् इतस्ततोऽटन्नयोध्या-मासाद्य, दुःखितस्तत्र ऋतुपर्णस्य राज्ञस्सारथ्येन भृतिमुपाययौ॥

अत्रान्तरे दीव्यतो नलस्य समस्तमपि राज्यं पुष्करेण-हृतं। हृतराज्यं नलं विलोक्य पुष्करः प्रहसन्नब्रवीत्, "राजन्, किं भूयः प्रवर्ततां द्यूतं? कः प्रतिपणस्तवास्ति? दमयन्त्येकैवा-वशिष्टा, अन्यत्सर्वं मया जितं, यदि मन्यसे, दमयन्तीपणः क्रिय-तामिति"। तच्छ्रुत्वा कोपाग्निना ज्वलन्नलो नैनं किंचिदब्रवीत्, किन्तु स्वाङ्गेभ्यो भूषणानि निखिलान्युन्मुच्य, एकवासास्तस्मा न्नगरान्निरगात्। दमयन्त्यपि निर्गच्छन्तं पतिं पृष्ठतोन्वगच्छत्।

सगत्वा नगराद्बहिस्तयासार्धं त्रिरात्रं यावद्वसत्, तावत्पुष्करो 'यो नलस्यातिथ्यं कुरुते, स वध्यो भवेदि'ति पुरे घोषयामास। पुष्कराज्ञया भीताः पौरा नलस्य सत्कारे यदा शिथिलादरा बभूवुस्तदा नलो दमयन्त्या सह ततः प्रातिष्ठत ॥

अथ निराहारो दमयन्त्या दर्भभिन्नकोमलपादया सह व्रजन्, पथि हेमरुचिरच्छदान् शकुन्तान्वीक्ष्याहारार्थं तेषां ग्रहणाय निजं वासस्तदुपर्याक्षिपत्। ततस्ते खगास्तद्वस्त्रं हृत्वा विहायसि समुत्पतन्तस्तमिदमवोचन्। "राजन्, वयमक्षास्तव वासो जिहीर्षवो धृतविहङ्गमरूपास्त्वन्निकटमागताः, वयं त्वयि वासोपि न सहामहे, तत्तव वस्त्रं हृत्वा यामो वयमि" ति। एवमुक्त्वा ते जग्मुः। अथ दुःखविवशो नलो भुव्युपविश्य दमयन्तीं पितृगृहं प्रेषयितुं व्याजेन पितृगृहगामिनं पन्थानमदर्शयत्। "प्रिये, एतेहि पन्थानोऽवन्तीमृक्षवन्तं च पर्वतमतिक्रम्य दक्षिणापथं गच्छन्ति। एष विन्ध्यनामा शैलः, एषा पयोष्णी समुद्रगामिनी नदी, एतन्मार्गाभ्याशे महर्षीणामाश्रमाः मूलफलबहुला बहवस्सन्ति। एष पन्था विदर्भगामी, अयं च कोसलमार्ग" इति। तच्छ्रुत्वा दमयन्ती बाष्पकलुषितलोचना नलमवोचत्। "नाथ! तव मनोगतं चिन्तयन्त्या मम हृदयं भृशमुद्विग्नं। सीदन्ति च मे गात्राणि। हृतराज्यं हृतसर्वस्वं हृतवस्त्रं च त्वामुत्सृज्य कथमहमेकाकिनी निर्जने वने गच्छेयं? त्वामनुगच्छन्ती घोरेस्मिन् कान्तारे श्रान्तस्य क्षुधार्तस्य तव श्रमं नाशयिष्यामि। 'विपत्सु भार्यासममुत्तममौषधं किञ्चिन्नविद्यत" इति। एवं कथयन्तीं दमयन्तीं नलो जगाद। "प्रिये! नरस्यार्तस्य भार्यासमं भेषजं नास्तीति यत्त्वमवोचस्तत्सत्यं। नाहं त्वां त्यक्तुमिच्छामि, तदलं भीरु शंकित्वा, त्यजेयमहमात्मानं वा नकदाचिदपि त्वामि" ति। तच्छ्रुत्वा दमयन्ती तमब्रवीत्, "नाथ, यदि मां न हातुमिच्छसि,

तर्हि किमर्थं विदर्भगामी मार्गोऽसकृदुपदिष्टः? मार्गस्यासकृदुपदेशादहमवैमि त्वं मां त्यजेरिति, यदि मया पितृसदनं गन्तव्यमिति तवेच्छा, तर्हि सहितावेव विदर्भान् गच्छ वः, धन्योस्मीति हृष्टो विदर्भराजस्त्वां पूजयिष्यति, तेन पूजितस्सुखं तत्रवत्स्यसी" ति। तच्छ्रुत्वा नलस्तामवदत्, "प्रिये। यथा तद्राज्यं तवपितुस्तथा ममापि, नात्रसंशयः, तथापि विषमस्थस्तत्र नगामिष्यामि। पूर्वं समृद्धो गत्वा कथमिदानीं राज्यच्युतो निर्धनो गमिष्यामी" ति। एवं सल्लपंतौ शोकार्तावेकवस्त्रसंवीतावितस्ततो भ्रमन्तौ फलमूलाशनौ श्रान्तौ तौ दम्पती निशागमे तत्र वने समं कंचित् भूप्रदेशं प्राप्योपाविशतां। ततो नलस्तृणपल्लवैर्भुवमास्तीर्य दमयन्त्या सह शयिष्ट॥

अथ क्षणादध्वखिन्ना दमयन्ती निद्रामगच्छत्? सुप्तायां दमयन्त्यां नलश्शोकोन्मथितचित्तश्श्रान्तोऽपि निद्रां नाध्यगच्छत्। किन्तु चिन्तास्तिमितो व्यचिन्तयत्। 'इयमक्लेशार्हा बाला मदनुयायिनी क्षुत्पिपासादिक्लिष्टा शोच्यामेव दशामियात्, मत्परित्यक्ताच मद्विरहेणातीव दुःखमाप्नुयात्। यत इयं मयि दृढमनुरक्ता, तत्किमत्र कर्तव्यमि' ति। एवंबहु विचिन्त्यान्ततस्तस्या उत्सर्गमेव वरममन्यत। 'मत्परित्यक्ताचेयमवश्यं स्वजनं यास्यति, कालेन सुखमपि प्राप्स्यति। नचैषा पतिव्रता केनापि पथि धर्षयितुं शक्या' इति। एवंतस्य कलिमोहितस्य दमयन्त्या विसर्जने मतिरुदभूत्। ततः स्वस्यावस्त्रत्वं तस्याश्चैकवस्त्रत्वमवलोक्य तस्या वस्त्रं हस्तेनावकर्तितुमयातिष्ट। अथ कथं वस्त्रं कृन्तेयं, कर्तनकाले प्रबुद्धा भवेद्यदि, तदा किं कुर्यामिति क्षणं विचिन्त्य, इतस्ततो गच्छन्नेकं विकोशं खड्गमाससाद। तेन खड्गेन निभृतं वस्त्रार्धं छित्वा, खड्गं निरस्य दयितावदनन्यस्तलोचनः क्षणं संशोच्य, सुप्तां प्रियामुत्सृज्य प्रययौ। कतिचित्पदानि गत्वा

दुःखितः पुनरागत्य, दमयन्तीं दृष्ट्वा साश्रुलोचनो व्यलपत्। 'या मे प्रिया पूर्वं राजसद्मनि मणिमयप्रदीपप्रभाभास्वरे रत्नखचितस्वर्णमयपर्यंकेहंसतूलशयने सुष्वाप, शिरीषकुसुमसुकुमारी सेयमद्य घोरे विपिने अतिकठिनस्पर्शे महीतले स्वपिति। कथमियं बाला प्रबुद्धा मद्विरहिता सिंहव्याघ्रनिषेविते घोरे वने चरिष्यति? धिङ्मां निष्करुणं पापं यत्कृते इयं कुवलयेक्षणा क्षणात्प्राण संशयमवाप्स्यति। हा! हतोस्मि मन्दभाग्यः! महाभागे, एष नृशंसो नलस्त्वां जहाति, त्वामादित्या रुद्रा वसवो वनदेवताश्च रक्षन्त्वि'ति। एवमुक्त्वा कल्यपहृतज्ञानोऽगच्छत्। गत्वागत्वा स्नेहान्धः पुनः पुनराययौ। एवं कलिना दमयन्तीस्नेहेनचेतस्तत आकृष्यमाणं तच्चित्तं दोलायितमभूत्। ततः कल्याविष्टो नष्टात्मातां प्रियां भार्यां बहु विलप्य कथंचिदुत्सृज्य दुःखितः शून्यमेकं वनमगमत्॥

अथापक्रान्ते नले भैमी गतक्लमा प्रबुध्य, समीपे प्रियमपश्यन्ती विजने वने सन्त्रस्ता, 'भो महाराजे' ति नलमुच्चैराक्रोशत्। तस्य प्रतिवचनं सा यदा नाश्रौषीत्, तदा 'हा नाथ! हा स्वामिन्! किं मां जहासि विजने वने? भीतास्मि। विनष्टास्मि। नाथ, न त्वां त्यजामीत्युक्त्वा सत्यवाक् त्वं कथं मां कानने परित्यज्य गतोसि? हा मन्ये नाकाले मृत्युर्मर्त्यानां भविष्यतीति, यदहं त्वत्परित्यक्ता जीवामि। जाने परिहासार्थं यत्रकुत्र वा तिरोहितस्तिष्ठसीति। अलं परिहासेन, यतोऽहमतीव भीतास्मि। राजन् इतो दृश्यसे गुल्मावृतगात्रः किं मां न प्रतिभाषसे? किमपराद्धं मया यन्मां विपिने विलपन्तीमुपगम्य नाश्वासयसि? अथवा सत्यमेव गतोसि, हा! त्वयापि कृपापर मद्वत्स ऽ केनैवं निष्करुणीकृतासि? उत्पलकोमलाङ्ग, कथं पद्भ्यां कण्टकाकीर्णे कानने यास्यसि? श्रमापनोदनाय कस्ते परिचर्यां करिष्यति? हा प्राणनाथ! किं मम बालेन पुत्रेण, किं दुहित्रा, किं वात्मना? कथंवा त्वम-

ध्वश्रान्तस्तृषितः क्षुधितो मामपश्यन् भविष्यसी' त्यादि विलपन्ती तीव्रशोकार्ता ततश्चेतश्च भ्रमन्ती विह्वला मुहुरपतत्। उत्थायोत्थाय भीता गुल्मेषु मुहुर्न्यलीयत, मुहुराक्रोशत्, मुहुररोदीत्। ततः सा दीर्घं निश्वस्य रुदत्यशपत्, 'यस्याभिशापाद्‌दुःखार्हो नैषधो दुःखमलभत, यः पापः पापमिदं कृतवान्, सोऽप्यधिकं दुःखं प्राप्य जीवत्वि' ति। एवमुक्त्वा विलपन्तीं दमयन्तीं श्वापदसंकुले वने प्रियमन्विष्यन्तीं मार्गाभ्यासवर्तीं क्षुधितः कश्चनाजगरो जग्राह। तेनाजगरेण मूर्तिमता शोकेनेव ग्रस्यमाना सा आत्मानं तथा नान्वशोचत् यथा नलं। तथा भूतां तां दृष्ट्वा वने विचरन् कश्चन व्याधस्सत्वरमभ्येत्य तमजगरं निशितेन शस्त्रेण मुखे पाटयामास। ततस्तामजगरमुक्तां प्रक्षाळितशरीरां समाश्वस्तां कृताहारामपृच्छत्, "हारेणाक्षि, का त्वं? कुत एतदरण्यमेकाकिनी प्राप्तासी'' ति! सर्वं यथावृत्तं स्ववृत्तान्तं कथितवतीं कठिनपीनस्तनोज्वलां हरिणनयनां पूर्णचन्द्रमुखीं तां विलोक्य कामार्तः स व्याधस्तां सान्त्वयितुमारभत। ततस्सा तन्मनोगतं ज्ञात्वा तीव्ररोषाग्निना जज्वाल। तेन प्रकुपितः स पापमतिः प्रधर्षयितुं यावदारभत, तावत्पतिव्रता दमयन्ती तं सकोपमशपत्, 'गतजीवितः पतत्वयं क्षुद्रो व्याध' इति। ततः क्षणादेव स लुब्धको गतासुच्छिन्नमूलो द्रुमइव भुवि पपात॥

ततः सा पतिं गवेषयमाणा, सिंहव्याघ्रमहिषर्क्षसमाकुलं सालवेणुधवखदिरादि वृक्षषण्डसञ्छन्नं नानाविधपतत्रिगणसंकीर्णं भीषणमेकमरण्यं प्राविक्षत्। सा तस्मिन्नदीः सरांसि वनमहिषान् वराहान् ऋक्षादींश्च पश्यन्ती दुस्सहशोकसन्तप्ता सुदूरं गत्वा, शिलातलं किञ्चिदासाद्य तत्रोपविष्टा विलपितुं प्रारभत। 'हे प्राणनाथ! कथं त्वं मां विजने वने परित्यज्य गतोसि? कथमश्वमेधादिभिः क्रतुभिरिष्ट्वा मां मिथ्याऽवादीः? मत्समक्षं यत्त्वयोक्तं

तत्कथं त्वया विस्मृतं? अस्यामटव्यां विलपन्तीं मां कुतो नरक्षसि? 'हे सत्यवादिन्, न मे त्वदन्या कापि प्रियतमास्ती'त्यसकृत्त्वं मामवादीः। तां वाचमृतां कुरु। हे नाथ! त्वच्छोकार्ता कच्चित्त्वयास्मिन्नरण्ये नलोदृष्ट इति जनशून्येस्मिन्वने कमहं पृच्छामि? महात्मा महाराजो नलो मया दृष्ट इति कस्य वा मधुरां गिरमद्य श्रोष्यामी'त्यादि विलप्य, गुरुतरशोकविमोहिता कंचन शार्दूलमभिमुखमायान्तं वीक्ष्याशंकिताऽवदत्, "हे शार्दूल, त्वमस्मिन् कानने मृगाणामधिपः, मां विदर्भराजतनयां निषधाधिपते र्नलस्य भार्यां पतिं विचिन्वन्तीं विद्धि। कृपणां शोकपीडितां मामाश्वासय! ब्रूहि किं दृष्टस्त्वया नलः? अथवा नलं यदि न शंससि, तदा मां खाद, मोचय मां दुःखादस्मादि"ति। एवमुक्तवतीं पतिव्रतां तां दृष्ट्वा भीतः शार्दूलः कुत्रचित् पलायिष्ट। एवं दृढव्यसनमोहिता सा, 'अपिदृष्टो नल'? इति गिरिं हरिणं गजादिकं च पृच्छन्ती त्रीण्यहानि तस्मिन्नरण्ये बभ्राम। ततः सा वसिष्ठभृग्वत्रिसमैस्संयतेन्द्रियैस्तापसैरुषितं नदीतीरस्थं रम्यमेकं तपोवनं दृष्ट्वा, समाश्वस्यैकमाश्रमपदं प्रविश्य, तत्रस्थान् तपोवृद्धानभिवाद्य कुशलमपृच्छत्। तां सौन्दर्यशालिनीं दृष्ट्वा स्वागतोक्तिपुरस्सरं, "कल्याणि, का त्वं? कस्मादिदमरण्यं प्रविष्टासी"ति तैः पृष्टा सा प्रत्यवोचत्, "हे तपोधनाः! अस्ति विदर्भेषु भीमो नाम नृपतिः, तस्याहं सुता, निषधाधिपतेर्नलस्य सत्यसन्धस्य कान्ता दमयन्तीनाम; कैश्चिदनार्यैर्देवन आहूतेन तेन नैषधेन राज्यं वित्तं च सर्वं हारितं। ततः स त्यक्तराज्यः परित्यज्य मां कुत्रचिदगात्। अहं तमन्विष्यन्ती भवतां रम्यमिदं तपोवनं प्राप्तास्मि। यदिकतिपयैरेवाहोभिरहं नलं नासादयेयं, तदात्मानं देहविमोचनेन वियोजयिष्ये अस्माद्दुःखात्। कोनाम मम जीवितेनार्थः ऋतेतस्माद्वल्लभादि"ति। एवं सरुदितमुक्तवतीं तां ते तापसा अवोचन्। "कल्याणि, तवोदर्कं शुभं भविता,

वयं तपसा पश्यामः क्षिप्रं द्रक्ष्यसि नैषधं निर्मुक्तकिल्बिषं तदेव नगरं शासतमि"ति। एवमुक्त्वा सर्वे ते तापसाः साश्रमास्तिरोहिताः। अंतर्हिते साश्रमे मुनिगणे, दमयन्ती विस्मयाविष्टचित्ता व्यचिन्तयत्, 'क ते तापसाः? क तदाश्रममण्डलं? क सा मुनिजन निषेविता पुण्यजला नदी? किमयं स्वप्नः? अथवा कृपासागरश्शंकरो दयया तापसरूपेणागत्य मामाश्वासयदिति। एवं विचिन्त्य विवर्ण वदना दुःखाकुला सुदूरमध्वानं गत्वा महासार्थमेकं हस्त्यश्वादियुतं नदीमुत्तरंतमपश्यत्। दृष्ट्वा सा वस्त्रार्धसंवृता विकीर्णशिरोरुहा मलिनोन्मत्तरूपा जनमध्यमविशत्। तां तथाविधां दृष्ट्वा दयायत्तचित्ताः केचिदूचुः, "कल्याणि कासि त्वं? कुत इदमरण्यमधिगता? किं त्वमस्यारण्यस्याधिदेवता? किं वा यक्षी? उत राक्षसी? अथवा काचिद्वरांगनासि? सर्वथा नः स्वस्ति कुरु, यथायं सार्थः कुशली शीघ्रमितोव्रजेत् तथाविधत्स्वे"ति। तच्छ्रुत्वा सा प्रत्यवोचत्, "हे साधवः, मां मनुजाधिपतेस्सुतां महीपतिभार्यां भर्तृदर्शनलालसां मानुषीं जानीत। पिता मे वैदर्भः, भर्ता मे राजा नैषधो नलो नाम। तमहं मृगये। यदि भवद्भिर्दृष्टस्तर्हि सत्वरं शंसत" इति। तच्छ्रुत्वा सार्थवाहस्तामवदत् "हे अनवद्यांगि। अहमस्य सार्थस्य नेता। नाहंनलमपश्यं। वनेस्मिन् कृत्स्नेपि मनुष्येतरनिषेविते त्वदृतेऽन्यं मर्त्यं कमपि नापश्यमि"ति। ततस्तया कुत्रायं सार्थो यास्यतीति पृष्टः, स सार्थवाहः प्रत्यवदत्, "सार्थोयं सुबाहोश्चेदिराजस्य जनपदं गंते"ति। तच्छ्रुत्वा सा तेन सार्थेन सह गंतुं प्रावर्तत।

अथ गच्छन् स सार्थः परिश्रांतवाहः क्षीणेह्नि रम्यनिर्मलस्वादुशीतलसलिलमेकं तटाकं प्रचुरयवसेन्धनं बहुपुष्पफलभरितपादपसंकुलं तत्तीरप्रदेशंच दृष्ट्वा विशाले तत्तीरे स्थितिमकरोत्। अथाश्ववहारादिकं निवर्त्य श्रान्त्या सुप्ते तस्मिन् सार्थे निश्शब्दस्तिमिते चार्धरात्रसमये, मेघसंघातसन्निभो गजयूथः

पानीयार्थं तं जलाशयमुपागमत्। ततस्ते गजास्तं सार्थं सार्थमध्यस्थितान् ग्राम्यगजांश्च दृष्ट्वा तान् जिघांसन्तस्तत्समीपं प्राद्रवन्। पर्वताग्राद्भूमौ पततां शीर्णशृंगाणामिव तेषां करिणामापततां वेगो दुस्सहो बभूव। तेन तटाकमार्गं संरुध्य सुप्ता जनास्तैर्मदेभैर्मृदिता महीतले विचेष्टमाना हाहाकारममुचन्। तं हाहाकारं श्रुत्वा केचन निद्रान्धा भयाद्वनगुल्मानधावन्। केचन गजैर्दंताभ्यां हताः, केचन करेण, केचन चरणैः। केचन भयाकुला धावंतः परस्परहता भूमौ न्यपतन्। केचन धावन्तोऽन्धकारेणानिरूप्यमाणसमविषमभूभागाः पदेपदे चस्खलुः। केचन वृक्षानारोहन्तः स्खलंतो भुवि न्यपतन्। एवं बहुभिः प्रकारैः स सार्थः प्रायशो निहतोभूत्। 'एष रत्नराशिर्विशीर्णस्तिष्ठति गृह्णीध्वं किं धावत? एषा दीनारभस्त्रिका मम नष्टा। तां विचिनुत। मम सुतो हतः। मम भ्रातुः पादौ भग्नौ'। इत्येवं विलपतां हतावशिष्टानां जनानामारावस्सुमहान् प्रादुरभूत्। तस्मिंस्तथा वर्तमाने दारुणे जनक्षये, दमयन्ती प्रबुध्य भयङ्करं तद्वैशसं विलोक्य भयसंत्रस्ता बभूव। तदा तत्र सार्थाद्विनिर्गताः केचिदक्षतशरीराः परस्परमवोचन्, 'कस्येदं कर्मणः फलं? नूनं, पूजितोस्माभिर्मणिभद्रः, तथा यक्षाधिपः श्रीमान् वैश्रवणः, किंचास्माकं ग्रहाः न विपरीताः, अशुभानि शकुनानि न विलोकितानि। एवं स्थिते कस्मादिदमागतं अथवा विघ्नेश्वरस्य पूजा प्रथमं नकृता भवेत्? आहोस्वित् यासावुन्मत्तदर्शना विकृताकारा नारी महासार्थेऽप्रविष्टा सा राक्षसी यक्षी भयङ्करी पिशाचिवा भवेत्, तयेयं दारुणा माया विहिता भवेत्, अथवा मानुषी भवेदपि तस्या एव सर्वमिदं पापं; यतस्तदागमनानंतरमेवेदृशी विपत् संप्राप्ता, नात्र संशयः कार्यः। यदि तां पापां सार्थघ्नीं दुःखदां पश्यामस्तदा लोष्टैर्लगुडैर्मुष्टिभिर्वा

हन्म' इति। एवं तेषां दारुणं वचश्श्रुत्वा ह्रीता भीताच दमयन्ती सत्वरं काननं प्राद्रवत्, पर्यदेवयतच्च। 'अहो! विधेर्ममोपरि महान् दारुणस्संरंभः, न स्मराम्यणवप्यहितं मनसा वाचा, कर्मणावा कस्यचिन्मयाकृतं, पापं, तत्कस्येदं कर्मणःफलं? नूनं जन्मांतरकृतं सुमहत्पापमापतितं, तत एव कष्टामिमामापदं प्राप्तवत्यस्मि। योयं पत्यू राज्याद्भ्रंशः, स्वजनात्पराजयश्च, योयं ममच भर्तृपुत्रादिवियोगः, दुष्टमृगसंकुले वने वासः, निर्नाथताच, एतत्सर्वं तस्यैव फलं मन्ये। योयं मे जनविहीने वने सार्थस्सहायः प्राप्तः, सोपि मम मन्दभाग्यतया हस्तियूथेन मथितो हतः। नूनं सुचिरं दुःखं मयानुभवितव्यं, 'नाकाले जंतुर्म्रीयत' इति सत्यं यदहमद्यदुःखिता गजयूथेन न मृदिता। अथवा मन्ये स्वयंवरे समागतानां लोकपालानां मया प्रत्याख्यातानां प्रभावेनाहं वियोगजं दुःखमीदृशं प्राप्तवती, नह्यदैवकृतं नराणां किंचिद्विद्यते' इति। एवमादीनि बहूनि विलप्य, हतशेषैः सार्थजनैस्सह गच्छन्ती सायाह्ने चेदिराजस्य सुबाहोः पुरमासादयत्॥

तां पुरीं प्रविश्य गच्छन्तीमुन्मत्तामिव कृशां विह्वलां तां बालाः कुतूहलादनुजग्मुः। सा तैः परिवृता राजमंदिरसमीपमगमत्। जनैर्वृतां तां प्रासादस्थिता राजमाता विलोक्य धात्रीमवोचत्। "धात्रि, दुःखिता शरणार्थिनी एषा बाला बालकैः क्लिश्यते। त्वं गत्वा बालानेतान्वारयित्वा एनां ममांतिकमानये"ति। तया तथैवानीतां दमयन्तीं विलोक्य विस्मिता राजमाता तामपृच्छत्। "सुन्दरि, त्वमसुखाविष्टापि सुंदरं शरीरं बिभर्षि। भासिच विद्युदिव। भूषणवर्जितमपि तव रूपं मानुषदुर्लभं पश्यामि। तत्कथय कासि? कस्यवा कांतेति। तच्छ्रुत्वा दमयन्ती तामवोचत्, "मातः, जातिसंपन्नाम्मां मानुषीं सैरन्ध्रीं विजानीहि। असंख्येयगुणो भर्ता मयि दृढमनुरक्तः, अहमपि तं वीरं छायेवानुगता। तस्य दैवा-

द्देवने अतिमात्रमासक्तिरुदभूत्। द्यूते निर्जितश्च वनमुपेयिवान्। तमेकवसनं विह्वलमाश्वासयन्ती अहमपि वनमगमं। अनुव्रजंती बहुळा निशाः नास्वपं। ततः कदाचिदध्वश्रांतां सुप्तां मामनागसमुत्सृज्य कुत्रचिद्गतः। तमहं दिवानिशं मार्गयमाणा वियोगानलदह्यमाना प्रियं तमद्यापि न विंदामी"ति। एवं विलपंतीमश्रुपूर्णमुखीं राजमाताऽब्रवीत्। "कल्याणि, इहैव वस। त्वयि प्रीतिर्महती ममोत्पन्ना। तव भर्तारमन्विष्यन्ति मम सेवकजनाः। अथवा इतस्ततस्सञ्चरन् स्वयमेवात्रागच्छेत्। इहैव वसंती त्वं भर्तारं प्राप्स्यसी"ति। तच्छ्रुत्वा दमयन्ती तामभाषत। "मातः, समयेनाहं त्वत्समीपे वत्स्यामि, परेषामुच्छिष्टं न भुंज्यां, नकुर्यांच पादधावनं, नचाहमन्यान् पुरुषान् भाषेय, यदि कश्चिन्मामभिलषेत्, स त्वया दंड्यो भवेत्। भर्तुरन्वेषणार्थं ब्राह्मणान् केवलं पश्येयमिति मया व्रतमाहितं। यद्येवं वस्तुं मामभिमन्यसे, तर्हि वत्स्यामि त्वत्सकाशे नान्यथे"ति। तच्छ्रुत्वा हृष्टा सा सर्वमेतदेवमेव भवत्वित्युक्त्वा सुनंदां नाम तनयामाहूयावदत्। "सुनंदे, दिव्यरूपामेतां सैरंध्रीमेवहि, तवेयं तुल्यवयस्का सखी भवत्वि"ति। तच्छ्रुत्वा प्रहृष्टा सुनन्दा दमयन्तीमादाय स्वावासमगमत्। दमयन्ती तत्र पूज्यमाना सदा आगंतून्विचिन्वती तस्थौ॥

अत्रांतरे नलश्छिन्नवस्त्रार्धप्रावृतगात्रो दमयंतीमुत्सृज्य दुःखार्तो व्रजन् सुदूरं गत्वा गहनं कानने ज्वलंतं दावाग्निमग्रतो ददर्श। अथ क्षणात् "भो नल पुण्यश्लोक, मां त्रायस्वे"ति तन्मध्ये कस्याचिद्भूतस्य वचः श्रुत्वा माभैषीरित्युक्त्वा नलोऽग्निमध्यं सत्वरं प्रविश्यदत्तदृष्टिः कञ्चन गजकराकारं कुंडलीकृतगात्रं नागमद्राक्षीत्। दावानलवलयितस्सनागो नलमवोचत्। "नैषध, मांनागं कार्कोटकं विद्धि। एकदा मया महातपा महर्षिर्नारदो लब्धः। तेन कोपाकुलितचेतसा शप्तोस्मि 'स्थावर इव तिष्ठत्वमत्रैव।

यावन्नलस्त्वामितो नेता तदा त्वं मत्कृताच्छापान्मोक्ष्यसे ' इति। तच्छापान्नशक्नोमि पदादस्माच्चलितुं । उपदिशामि ते श्रेयः भवामिच ते सखा लघुशरीरश्च। तद्यावद्दावाग्निना नधक्ष्ये, तावदितो मामादाय गच्छे' 'ति। एवमुक्त्वा स नागोऽगुष्ठमात्रो बभूव। नलस्तंगृहीत्वा दाववार्जितं देशं नीत्वा यावत्त्यक्तुमैच्छत्तावत्स नागस्तमब्रवीत्। राजन्, गणयन् दशान्यानि पदानि मामितो नये' 'ति। ततः स नलः एकं द्वे त्रीणीत्येवं पदानि गणयन् प्रयातुमारेभे। यदा दशेत्युक्तवांस्तदैवोक्तिछलेन स्कंधस्थितो नागस्तं ललाटतटे अदशत्। दष्टवतस्तस्य नागस्य तद्रूपं तत्क्षणमेव तिरोभूतं। नलस्तु तेन दंशनेन कृष्णवर्णो ह्रस्वबाहुर्विरूपश्चाभूत्। तद्दृष्ट्वा विस्मितं नलं स नागो निजरूपं धृत्वा सांत्वयन्नब्रवीत्। "भूपते, वैरूप्याच्छुचं माकृथाः, जनास्त्वद्रूपं नविद्युरिति मया तत् प्रच्छादितं, यतो गूढवासे महतां वैरुप्यं कार्यसिद्धये भवति। येन त्वं त्वच्छरीरप्रविष्टेन निकृतो महति दुःखसागरे पातितः, स खलस्त्वां यावन्नाविमोक्ष्यति तावन्मद्विषानलाक्रांतस्त्वयि दुःखं निवत्स्यति तन्मयायं दंशस्तवरक्षार्थं दत्तः, नते विषनिमित्ता पीडा भविष्यति। नते दंष्ट्रिभ्यः शत्रुभ्योवा भयं भविष्यति। त्वमितो नृपस्येक्ष्वाकुवंशजस्य अक्षनिपुणस्य ऋतुपर्णस्य समीपं बाहुकनामा सूतोहमिति ब्रुवन् गच्छ। सच नगरीमयोध्यामधिवसति, स सुहृद्भूत्वा तवाश्वहृदयज्ञस्य विद्याविनिमयादक्षहृदयं दास्यति। यदा त्वमक्षज्ञो भविष्यसि, तदा त्वं श्रेयसा राज्येन दारैस्तनयाभ्यांच योक्ष्यसे। गृहाणचेदं दिव्यं वस्त्रयुगं, यदा निजं रूपं लब्धुमिच्छसि तदाहं स्मर्तव्यः, अनयोश्चवाससोरेकं परिधानीयं अपरंच प्रावरणीयं परिहितेन प्रावृतेन चैतद्वासोयुगेन स्वंरूपं प्रतिपत्स्यसे" इति। एवमुक्त्वा दत्तवस्त्रयुग्मः कार्कोटकस्तत्रैवांतरधात्॥

तस्मिन्नन्तर्हिते कार्कोटके, शोकानलाकुलो नलः ऋतुपर्णगत्वा तेन सत्कृतस्सूदसारथिकर्मणा तत्रावास। तेन नृपेण वार्ष्णेयजीवलाभिधौ द्वौ सूदौ नलस्यानुचरौ निर्दिष्टौ। स ताभ्यामनुचराभ्यां सह तद्गृहे वसन् सदा निशायां दमयन्तीं स्मरन् ध्याननिश्चललोचनो बाष्पसंरुद्धकंठो दीर्घं निश्वस्य सगद्गदाक्षरमेवमभ्यधात्। 'अहो! मंदभाग्येन दुरात्मना परित्यक्ता सा तपस्विनी क्षुत्पिपासार्ता श्रान्ता तं पुण्यहीनं स्मरंती क्वा भ्रमति, कुत्रवा तिष्ठति, क्ववा शेते, कंवा श्रयत' इति। एवं विलपन्नलो जीवलेनैकदा कामेतां नित्यं शोचसीतिपृष्टोऽभाषिष्ट। "मंदभाग्यस्य मंदबुद्धेः कस्यचिदासीत् बहुमता काचन वनिता, स दैवोपहतः केनचिन्निमित्तेन तयाव्ययुज्यत। तयाविप्रयुक्तः स मंदात्मा दिवानिशं शोकदहनदह्यमानस्तां स्मरन्निशासमये पर्यदेवयत। तस्येदं परिदेवनमित्युक्त्वा विरहक्षामविग्रहो विपुलाः क्षपाः स्वोच्छ्वासमनिद्रो निनाय॥

एवंनले सभार्ये प्रेष्यभावंगते, विदर्भभूपतिर्भीमः पुष्करेण निष्कासितं नैषधं श्रुत्वा दत्त्वाच भूरिधनं नलं दमयन्तींचान्वेष्टुं द्विजान् दिक्षु प्राहिणोत्। तेषु सुदेवो नाम द्विजस्सविपिनां वसुंधरां विचिन्वन् चेदिराजसदनमासाद्य तत्र सुनंदासहितां, कृशां मलिनां, शोकविह्वलां, परित्यक्तभूषणामपरिस्फुटानुपमरूपां, धूमजालसमावृतां प्रभामिव विभावसोः, नीलाभ्रसंवृतामिव चन्द्रलेखां, पौर्णमासीनिशामिव राहुग्रस्तनिशाकरां, विध्वस्त कमलां वित्रासितविहंगमां शुष्कस्रोतसामिवनदीं, उद्धृतामर्ककरदह्यमानामिवकमलिनीं, तां प्रियबन्धुविप्रयुक्तां भर्तृदिदृक्षया शरीरं धारयंतीं दमयन्तीमाशङ्क्य कृतार्थोस्मीत्यहृष्यत्। अचिंतयच्च, पतिर्नाम नारीणां परं भूषणं। यदेषा स्वभावसुंदर्यपि पतिं विना नशोभते। यदीमां नलः पश्येत्तन्नियतं दुःखमनुभवति। यदीमामसितकेशां शतपत्रायतेक्षणां दुःखितां दृष्ट्वा ममापि मनो-

व्यथते। कदानुखल्वियं शोभनांगी दुःखस्य पारं यास्यति? कदावा सुधांशुसमागमेन रोहिणीवेयं साध्वी प्रियसमागमात्सुखं विंदेत्? कदावा अस्याः पुनर्लाभान्नैषधस्तोषमियात्? मयाचेयमवश्यं पतिदर्शनलालसा समाश्वासनीया' इत्येवं विचिंत्य तामुपगम्याब्रवीत्। "वैदर्भि, भ्रातुस्तव सखा सुदेवोनामाहं ब्राह्मणः। पितुस्तव भीमस्य भूपतेर्वचनात्त्वामन्वेष्टुमिहागतः। कुशलिनौ तव पितरौ। कुशलिनश्च ते भ्रातरः। कुशलिनौचायुष्मन्तौ तत्रस्थौ तव दारकौ। त्वत्कृते बंधुवर्गो गतसत्त्व इवास्ते। अन्वेष्टारश्च ब्राह्मणाश्शतशो महीं भ्रमंती"ति। तच्छ्रुत्वा दमयन्ती तं सुदेवं प्रत्यभिज्ञाय स्वीयान् सुहृदश्च क्रमेण तं पृच्छंती शोकपीडिता भृशमरोदीत्। ततो रुदतीं तां दृष्ट्वा सुनंदा गत्वा जनयित्र्यै जगाद। साचागत्य ब्राह्मणेन सह सल्लपन्तीं दमयन्तीं दृष्ट्वा सुदेवमपृच्छत्। "ब्राह्मण कस्येयं सुता? कस्यवाभार्या? कथंच ज्ञातिभ्यो भर्तुश्चवियुक्ता त्वयाच कथमेवंभूता विदिते"ति। एवं तया पृष्टस्सुदेवोऽभाषिष्ट। "विदर्भाधिपतेर्भीमस्य दमयंतीति विश्वाविश्रुता सुता, विश्वविख्यातस्य नलस्य भूपतेर्भार्या, स नलो द्यूते भ्रात्रा जितो हृतराज्यो दमयन्त्यासह क्वापिगतः। तयोरन्वेषणार्थं भीमेनादिष्टा द्विजाः पृथ्वीं चरंति। तेष्वहमप्येकतमो भुवंभ्रमन्निहागतः। मयाचेयं बालात्र समासादिता। अस्त्यस्या भ्रूमध्ये सहजः पद्मसदृशः पिप्लुः पितामहेन विभूत्यर्थं निर्मितः सचाद्याभ्रच्छन्नश्चंद्र इव मलसंवृतस्तिष्ठति। अनेन चिह्नेनानितरसाधारणया आकृत्याचेयं मया लक्षिता" इति। तच्छ्रुत्वा सुनंदा सत्वरं जलमादाय तस्याः पिप्लुच्छादकं मलमशोधयत्। अपगतेच मले तस्याः पिप्लुर्व्यभ्रे विहायासि विधुरिव व्यराजत। पिप्लुं दृष्ट्वा राजमाता दमयंतीं परिष्वज्य सुचिरमरोदीत्। मुहूर्तं तूष्णीं रुदित्वा बाष्पगद्गदकंठा तामब्रवीत्। "चारुदर्शने, त्वं मम भगिन्याः

सुता, मयातु दशार्णेषु पितुर्गृहे शैशवावस्थायां दृष्टा, अतः कालविलंबाद्विस्मृता अद्यानेन चिह्नेन प्रत्यभिज्ञापिता, तत्पुत्रि, यथा ते पितुर्गृहादिकं तथैव ममापि गृहादिकं जानीही" ति। एवं वदंतीं दमयंती प्राह, "मातः, त्वद्गृहे अहमेवंविधेत्यज्ञायमानापि सदा त्वया रक्ष्यमाणा सुखमुषितास्मि किमुतैवंविधेति विज्ञायमाना, तथापि चिरविप्रयुक्तां मां पितृगृहगमनायानुमंतुं अर्हसि। यतो मेदारकौ पितृगृहं प्रेषितौ पित्रा मात्रा च विरहितौ शोकार्तौ स्तिष्ठतः। तद्यदि मम प्रियं कंचित्कर्तुमिच्छसि तन्मां विदर्भान् प्रेषयेति"। तच्छुत्वा सा बाढमित्युक्त्वा पुत्रानुमत्या दमयंतीं बलेन महता गुप्तां नरवाह्येन यानेन विदर्भान् प्रास्थापयत्। दमयंत्यप्यचिरादेव विदर्भानयासीत्। प्राप्तां तां सुतां दृष्ट्वा तस्या माता भर्त्रासह दुःखपीडिता सुचिरं विललाप। अथ भीमः प्रीतो सुदेवं ब्राह्मणं ग्रामेण धनादिनाचापूजयत्। दमयंतीतु तां निशां पितृवेश्मन्यनयत्॥

विश्रांता सा मातुःसदनमासाद्य मातरमब्रवीत्। "मातः, सत्यमहं ब्रवीमि, यदि मां जीवंतीमिच्छसि तर्हि नराधिपस्य नलस्य वल्लभस्यानयने यतस्व। यत्तेन विना नमे मनःकामपि प्रीतिमुत्पादयती" ति। तच्छुत्वा सा राज्ञी भृशं दुःखिता बाष्पपिहितलोचना नोत्तरं किंचिदवोचत्। तद्दृष्ट्वा सर्वं तदंतःपुरमरुदत्। ततस्सा भीमभूपतिमुपेत्यावोचत्। "नाथ, पतिवियुक्ता दमयंती पितृवेश्मन्यपि प्रीतिं नलभते, यतः सा बाला पूर्वेद्युरस्मद्गृहमागत्य कथंचिदेकां रजनीं नीत्वा प्रातरेव पतिमनुशोचंती लज्जां विहाय स्वयमेव दयितानयनाय यतस्वेति मामवोचत्। तत्तव प्रेष्याः पुण्यश्लोकस्य नलस्य मार्गणे प्रयतंतामि" ति। तच्छुत्वा तथेति भीमो दिक्षु नैषधं विचेतुं ब्राह्मणान् प्राहिणोत्। ततस्ते ब्राह्मणाः प्रस्थिताः संदेशप्रेप्सवो दमयंतीसकाशमगमन्।

दमयंती तानवादीत्। तत्र तत्रनगरे जनसंसदि युष्माभिः पुनरेवं वक्तव्यं, "कितव, सुप्तामनुरक्तां प्रियां विजने विपिने विसृज्य तद्वस्त्रार्धं छित्वा क्व प्रस्थितोसि। सा बाला वस्त्रार्धसंवृता शोकेन दह्यमाना त्वां प्रतीक्षमाणा तिष्ठति। सततं रुदत्यास्तस्याः प्रति वचनं ब्रूहि। किंच पत्या पत्नी सदा रक्षणीया भर्तव्याच। तत्त्वया धर्मज्ञेनापि सता नकृतं। प्राज्ञः कुलीनः सानुक्रोशश्च भवान् मद्भाग्यक्षयादेव विपरीतस्संवृत्त इति शंके। 'आनृशस्यं परो धर्म' इति त्वत्तएवाधिगतं सर्वैरपि, तत्कथं मयि निर्दयो जात इति। यश्चैतद्वचनं श्रुत्वा प्रतिब्रूयात् सोवश्यं ज्ञेयः कोसौ क्व वर्तत इति। स यद्वदिष्यति तदपि मह्यमावेदनीयमि"ति। एवं दमयन्त्याऽभिहितास्ते ब्राह्मणा नलं मृगयितुं गताः पुराणि नगराणि ग्रामान् घोषानाश्रमांश्चाऽन्विष्यंतस्तत्रतत्र दमयंत्योक्तं वचश्श्रावयंतोपि नलमनासाद्यैव प्रतिनिवृत्ताः॥

अथ दीर्घेण कालेन पर्णादोनाम द्विजो महीं निखिलां भ्रांत्वा विदर्भानभ्येत्य भैमीमिदमभ्यधात्। "दमयंति, मया नैषधं गवेषयमाणेनायोध्यां गत्वा आस्थाननिकेतनस्थऋतुपर्णस्तत्रस्था जनाश्च श्राविताास्त्वदुक्तंवचः; उन्मत्तवाक्यतुल्यं तच्छ्रुत्वा ते प्रामवजज्ञिरे। अंततो गंतुं राज्ञानुज्ञातं प्रस्थितं मामाहूय कश्चिदृतुपर्णस्य पुरुषो ह्रस्वबाहुस्सूदरथविद्याकुशलः बाहुकोनाम साश्रुलोचनो दीर्घं निश्वस्य प्रथमं कुशलं पृष्ट्वा पश्चादाचष्ट, 'भर्तृविरहिता विपत्प्राप्ता अपि सच्चारित्रकवचाः कुलस्त्रिय आत्मानमात्मना गोपायन्ति। यत्सा राज्यभ्रष्टेन श्रिया हीनेन विषमस्थेन विहगापहृतप्रावारकेण प्राणयात्रां प्रेप्सुना मूढेन परित्यक्ता तत्स्मा न कोपितुमर्हती'ति। तच्छ्रुत्वाऽहंसत्वरमिहागत" इति। तदाकर्ण्याश्रुपूर्णाक्षी दमयन्ती क्षणं विचिंत्य रहोमातरमभ्येत्य पर्णादोक्तं कथयित्वाऽभ्यधात्। मातः, नूनं स एव मम वल्लभ इत्यहं प्रत्येमि, यदि मम

प्रियमिच्छसि, तर्हि त्वत्समक्षं वल्लभानयनाय युक्त्या मया क्रियमाणमिदं पित्रे नावेदनीयं। अहं त्वत्सन्निधौ सुदेवं द्विजोत्तमं तदानयनाय नियोक्ष्ये, यत्तेनैवाहं बन्धुसमीपं समानीता, तत्स एव यात्वयोध्यामितः, स तत्र प्राप्तमात्रस्तं नृपतिमेवंब्रवीतु, 'नलोराजा क्वापि गतः तस्य प्रवृत्तिर्नबुद्ध्यते तद्भूयोपि दमयन्ती स्वयंवरं प्रातःकुरुते तदद्यैव विदर्भान् शीघ्रं गम्यतामि' ति। श्रुत्वैतद्वार्तस्सनृपती रथज्ञानिना आर्यपुत्रेण साकमेकाहेन ध्रुवमिहैष्यती' ति। एवं दमयन्ती मात्रासह रहस्सम्मन्त्र्य सुदेवमानाय्य तस्मै पूर्वोक्तमभिधाय कोसलान् प्राहिणोत्॥

ततस्सुदेवेन गत्वा तथैवाभिहितो राजा ऋतुपर्णः समुत्सुको नलमाहूय सादरमब्रवीत्। "बाहुक, 'अहं रथविद्याकोविद' इति भवानब्रवीत्, दमयंत्याः पुनःस्वयंवरः श्वो भविता, अहं तत्स्वयंवरं यातुमिच्छामि, यदिशक्यं मन्यसे तर्ह्येकाहेनैव तां पुरीमहं नेतव्यः; ममतु तत्पुरमेकाहेनाऽगम्यं प्रतिभाती" ति। नलस्तदाकर्ण्य दुःखविदीर्णहृदयस्समचिंतयत्, 'किं दमयन्त्या वियोगाद्विगतसौहार्द्रया नैराश्यात्कदाचिदेवं कृतोभवेत्? यतोऽत्यन्तचपलः स्त्रीस्वभावः? किंवा तया मदानयनायायं कृत्रिम उपायो विहितो भवेत्? यतस्सा मयिदृढमनुरक्ता पतिव्रता विशेषतः सापत्याच, तत्त्रैवगत्वा वेत्स्यामी' ति। एवं विचिंत्य राजानमवोचत्, "राजन् एकाहेनैव त्वां विदर्भान् प्रापयिष्यामी" ति। ततस्सनृपाज्ञयाऽश्वशालां गत्वा बहुष्वश्वेषु पुष्टेषु सत्स्वपि कृशान् दुष्टलक्षणवर्जितान् पृथुप्रोथान् तेजोबलयुक्तांश्चतुरोऽश्वान् निपुणंनिरूप्य रथे योजयितुं बाहिरनयत्। तान् हयान् दृष्ट्वा राजा बाहुकमब्रवीत्। "बाहुक, किमिदं त्वयाकृतं! कथमल्पबलाः कृशा इमेहया रथंवहेयुः? कथंवा महान्तमध्वानगच्छेयुरि" ति। तच्छ्रुत्वा नलः प्रत्यवोचत्, "राजन् एकाहेनैवते अश्वा विदर्भानभ्येतुं शक्ता"

इति विदित्वैवाहमेतानानीतवान्। यदि मद्वचने नप्रत्ययस्तर्हि यानन्यान् योग्यान् भवान् मन्यते, तान् दर्शय रथे योजयिष्यामी" ति। तच्छ्रुत्वा ऋतुपर्णस्तमवोचत् "बाहुक, त्वमेव हयतत्त्वज्ञः कुशलश्च, यानेव समर्थान्मन्यसे तानेव क्षिप्रंरथे संयोजये" ति। अथ नलस्तानेव वराश्वान् रथे संयोज्य सज्जंरथं राज्ञस्समीपमनयत्। सत्वरो राजा क्षिप्रमेव रथमारुक्षत्। आरूढेच तस्मिन् तेहयोत्तमाः पर्यपतन्। नलस्तानश्वान् रश्मिभिस्संयम्य सांत्वयामास। ततः सूतं वार्ष्णेयमारोप्य स्वयमप्यारुह्य तानश्वान् समचोदयत्। तेन चोद्यमानास्ते तुरङ्गमा दिनकरतुरगविद्वेषादिवाकाशं समुत्पेतुः। वाताधिकरंहसो वहतस्तान्वराश्वान्वीक्ष्यायोध्याधिपतिः परंविस्मयं ययौ। वार्ष्णेयो बाहुकस्य हयतत्त्वज्ञतां तं रथघोषं तद्धयनिग्रहादिकंच विलोक्य विस्मयाविष्टो व्यचिंतयत्, किमयं देवेन्द्रसारथिर्मातलिः ? किंवा तुरगतत्त्वज्ञो गृहीतमानुषशरीरश्शालिहोत्रोवा? अहोस्विदस्मत्स्वामी नलस्समायातः ? यतो यां विद्यांनलो वेत्ति बाहुकोपि तां वेत्ति, नलस्य यादृशी वयोवस्था बाहुकेपि तांलक्षये; यद्यप्यस्मिन् बाहुके विज्ञानेन वयसाच नलतुलना विद्यते, तथापि रूपे विपर्ययान्नायंनलः किंतु तत्सदृशःकोपी' ति॥

स रथो नदीः सरांसि पर्वतान् वनानि नगराणिच गरुत्मानिवाचिरेणैवातिचक्राम। एवं प्रयाति रथे राजा ऋतुपर्णः स्वोत्तरीयमधो भ्रष्टं दृष्ट्वा नलमब्रवीत्, "बाहुक, क्षणं निगृह्णीष्वहयान् यावद्वार्ष्णेयो भ्रष्टं मम पटमानयती' ति तच्छ्रुत्वा नलस्तंप्रत्यवोचत्। राजन्, दूरे तवोत्तरीयं परिभ्रष्टं, साम्प्रतं तस्मात्प्रदेशात् योजनपरिमितोध्वातिक्रान्तः। तन्नाहर्तुं शक्यत" इति। तेनैवमभिहितो विस्मितो नृपतिः फलवंतं विभीतकं वृक्षं दृष्ट्वा नलमाचष्ट, "बाहुक, तवेयं विस्मयकारिणो विद्यामया विदिता, जानीहि ममापि संख्याविज्ञानं, नहिसर्वः सर्वं जानाति, नवा एकस्मिन्नेव पुरुषे ज्ञान-

स्य परिनिष्ठास्ति, अग्रे योयंविभीतकस्तरुर्दृश्यते तस्य फलपर्णानां संख्यां दृशैव ज्ञात्वा वक्तुं शक्नुयामि" ति। तच्छ्रुत्वा "बाहुको, रथमवस्थाप्य राजानमब्रवीत्, "राजन्नत्र मे संशयः तदहं प्रत्यक्षीकर्तुमिच्छामि, अहमस्य द्वे शाखे शातयिष्ये, तयोः फलपर्णानां संख्या भवतोच्यतां, अहं गणयित्वा पश्यामि, तावद्वार्ष्णेयो वाजिनां रश्मीन् यच्छत्वि" ति। ततो नायं कालो विलंबितुं पश्चाद्द्रक्ष्यसीति राज्ञाभिहितो बाहुकस्तमब्रवीत्, "राजन् प्रतीक्षस्व क्षणं अहं त्वामस्मिन्नेवनिशामुखे विदर्भान् प्रापयामि; यदि भवान् कालहरणाक्षमस्त्वरते तर्हि याहि सारथिना वार्ष्णेयेन सह, शिवस्तेऽस्तुपऽथाः, अहं यामी" ति। तच्छ्रुत्वा राजा नलं सांत्वयन्नब्रवीत्, "बाहुक, लोके नान्यस्त्वत्सदृशो यंता अतस्त्वत्साहाय्येनैव मया विदर्भा गन्तव्याः, न तस्यांतरायं कर्तुमर्हसि, तदहमस्यां शाखायां विद्यमानानां फलपत्राणां संख्यां वदामि, तां सत्वरं गणयित्वा जानीही" ति। एवमुक्त्वा तेषां सख्यामवोचत्। तच्छ्रुत्वा नलस्तूर्णं रथादवतीर्य तां शाखां शातयित्वा तस्यां राज्ञा यावंत्यभिहितानि तावंत्येव फलपत्राणि गणनया बुध्वा भृशं व्यस्मेष्ट। विस्मयाविष्टं तं राजाऽब्रवीत्, "बाहुक नकेवलं मां संख्याविशारदं विद्धि, किंतु अक्षहृदयज्ञमपि, गमने मम मनस्त्वरते, तत्तूर्णमश्वान् चोदये" ति। अथ बाहुकस्तमवोचत्, "नृपवर, देहि मह्यामिमामक्षविद्यां, मत्तोऽप्यश्वविद्यां गृहाणे" ति। तच्छ्रुत्वा राजा कार्यगौरवात् हयज्ञानलोभाच्च तथेत्युक्त्वाऽक्षविद्यां तस्मायदात्, तस्माच्चाश्वविद्यां जग्राह। ततः प्राप्ताक्षविद्यस्य बाहुकस्य शरीरात्कार्कोटकविषज्वालामूर्छितः कलिर्निरगात्। प्रत्यक्षावग्रहं तं दृष्ट्वा कुपितो नैषधस्तं शप्तुं यावदैच्छत्, तावत्तं दृष्ट्वा भीतः कलिः कम्पमानः कृतांजलिस्तमवोचत्, "क्षोणीपते, क्षमस्व इमं ममापराधं कोपं संयच्छ, पूर्वमेव कुपितया दमयन्त्या शप्तोऽस्मि, तच्छापाग्निना तीव्रेण कार्कोटकविषाग्निनाच

सततं दह्यमानस्त्वयि सदुःखएव न्यवसं तन्मां माशाप्सीः, अद्य-प्रभृति ये त्वां कीर्तयिष्यंति तेषां कदाचिदपि मत्कृतमशुभं नभाविष्यती" ति। एवं वादिनं कलिं कृपालुर्नलो नाशपत्। ततोभीतः कलिरन्यैरदृश्यः सत्वरं विभीतकं प्राविक्षत्। तदाप्रभृति स विभीतकः कलिसंश्रयादप्रशस्तः सवृत्तः। ततः कलिमुक्तो नलः प्रसन्न-हृदयस्तेजसा मुदाच युक्तः स्यंदनमारुह्य पुनरपि विदर्भान् प्रत्यश्वानचोदयत्। अतिक्रांते नले, कलिरपि निजनिलयंप्रति पलायिष्ट॥

अथ नलस्सर्वा दिशो रथघोषेण नादयन् तस्मिन्नेवाहनि सायाह्ने सहसा कुण्डिनपुरं प्राविशत्। तं रथनिर्घोषं तत्रस्था नलाश्वाः श्रुत्वा पुरा नलसन्निधौ यथा तथाऽहृष्यन्। जलागमे नदतो जलधरस्येव तद्रथस्य स्वनंश्रुत्वा प्रासादस्थाश्शिखिनः शालास्था वारणाश्च मेघस्वनं मत्वा उन्मुखा हर्षेण प्रणेदुः। पुरा नले रथंवाहयति यादृशोरथघोषश्श्रुत, तादृशं विचित्रं रथनिर्घोषं श्रुत्वा दमयन्ती नलागमं संभाव्य मनस्यचिंतयत्, 'रथस्वनेन दिशःपूरयन्नेष नलो वल्लभो मामाह्लादयते, यदि तं गुणमणिनिकरनीरनिधिं नलं नपश्यामि, यदिचायं मद्विलोचनशीतमयूखो मां नोपगच्छति, यदिचैतस्य त्रिभुवनप्रख्यातपराक्रमस्य वीरस्य सुखस्पर्शं बाह्वोरन्तरमद्य नप्रविशामि, तन्नूनं विनङ्क्ष्यामि। नाह स्मरामि तदुक्तं किंचिदप्यप्रियमनृतं नीरसं वा वाचः, नापि कस्यापि तत्कृतमपकारं। किंच क्षमावान् प्रियदर्शनः प्रियवादी वदान्यः सकलाहितमर्दनश्च। स मम वल्लभः, एतादृशेन प्रियेण वियुक्ताया मम हृदयं शोकाद्विदीर्णमिवे' ति। एवं विलपन्ती सा नष्टसंज्ञेव निश्चेष्टा क्षणमवस्थाय नैषधदिदृक्षया महांतं प्रासादमारुह्य मध्यमकक्ष्यायां स्थित्वा गवाक्षमार्गेण पुरतोवस्थितं रथं रथावतीर्णं महीपालमृतुपर्णं बाहुकं वार्ष्णेयंच ददर्श। अथ ऋतुपर्णो राजा रथादव-

तीर्य महाराजं भीमं द्रष्टुमगच्छत्। अकस्मात्प्राप्तं श्रीमंतमृतुपर्णं दृष्ट्वा अज्ञातदमयन्तीकपटतया स्वसुतार्थं समागतमजानन् स्वागतोक्तिपुरस्सरं कुशलं पृष्ट्वा सत्कृत्य चागमनकारणमपृच्छत्। तच्छ्रुत्वा बुद्धिमानृतुपर्णो राज्ञां राजपुत्राणां ब्राह्मणानां वा समागमं स्वयंवरसूचकं किमप्यदृष्ट्वा ब्राह्मणेन विप्रलब्धोस्मीति मनसि विचिन्त्य, भवंतमभिवादयितुमागतोस्मीत्यवोचत्। तच्छ्रुत्वा भूपतिर्भीमः स्मयमानो मनस्यचिंतयत्, 'शतयोजनाधिकमध्वानमतिक्रम्यायमिहागतः, अत्यल्पमनेनागमनकारणं निर्दिष्टं, इयदूरागमनस्य नैतत्कारणंभवेत्, भवतु पश्चात् ज्ञास्यामी'ति विचिंत्य, श्रान्तो भवान् विश्राम्यतु, इत्युक्त्वा तं व्यसर्जयत्। भीमेन सत्कृतः स पार्थिवः प्रेष्यैस्सुन्दरमन्दिरमनीयत। बाहुकोप्यश्वान् विश्रमय्य यथाशास्त्रं तानुपचर्य रथोपस्थे समुपाविशत्॥

दमयंतीतु तथाविरूपं बाहुकमृतुपर्णवार्ष्णेयौच केवलं विलोक्य शोकपीडिता व्यचिंतयत्, 'कस्यैष रथघोषः योनलस्येवासीत्? नाहमत्र नलं विलोकयामि किंवा या नलेन शिक्षिता विद्या सा वार्ष्णेयेनापि शिक्षिता भवेत्? आहोस्विन्नल इव ऋतुपर्णोपि रथविज्ञानकुशलः? किंवा यः कृष्णवर्णो ह्रस्वबाहुर्विरूपो रथोपस्थे सारथिरिवोपविष्टस्तिष्ठति, स एव नल इवाश्वविद्याकुशलः? यतो रथस्वनो नलस्येव लक्षितः; अथवा निगूहितनिजरूपो नल एवायं, यतोऽस्य दर्शनेन मम मनस्तुष्टिर्हृदयनिर्वृतिश्चभवतीति'। एवमादि विचिंत्य केशिनींनामदूतीमाहूयावदत्। "केशिनि, त्वं गत्वा जानीहि योयं ह्रस्वबाहुर्विकृतो रथे समुपाविष्टस्तिष्ठति सक इति, ब्रूहिच तस्य पुरतः पुनस्तद्वाक्यं यत्पर्णादेन पूर्वमुक्तं, यत्तस्य प्रतिवाक्यमनेनोक्तं तदप्यद्य तन्मुखाद्बुद्ध्यस्वेति। सा दूती गत्वा कुशलप्रश्नानतरं बाहुकमवोचत्,

"नरोत्तम, दमयंती ज्ञातुमिच्छाति कदा यूयंप्रस्थिताः?किमर्थमिहागता"? इति। बाहुकस्तां प्रत्यवोचत्, द्वितीयो दमयंत्याः स्वयंवरः श्वोभवितेति द्विजमुखाच्छ्रुत्वा कोसलाधिपतिः स्वनगरात्प्रातः प्रस्थाय प्रतिदिनं शतयोजनयायिभिर्हयोत्तमैस्सायमिहागत"इति। 'योयंवस्तृतीयः स कः? त्वं चकः? कथंचेदंकर्म त्वया प्राप्तं' इति तयापुनः पृष्टोबाहुकः प्राह, "योयं तृतीयः स पुण्यश्लोकस्य नलस्य वार्ष्णेय इति विश्रुतः सूतः, स नले विद्रुते, ऋतुपर्णमुपातिष्ठत। अहमपि कुशलस्सूदाश्वविद्यायामृतुपर्णेन स्वयंवृतः सूदत्वे सूतत्वेच प्रतिष्ठापित"इति। सा पुनस्तमपृच्छत्, "बाहुक, अपिवार्ष्णेयो जानाति क नलोगतः? इति, यतस्तेन त्वं कथितो भवेरिति"। स प्रत्यवोचत्, पुत्राविहैव निक्षिप्य नलः क्वापिगतः, नैव वार्ष्णेयस्तं जानाति नवान्यः, यदसावस्मिन् लोके नष्टरूपो गूढश्चरति, नवा स्वलिंगैः स्वैर्ज्ञातुंशक्यः, नल एवात्मानंवेत्तीति"। सा भूयोप्यपृच्छत्, "बाहुक, योसौ ब्राह्मणः प्रथममयोध्यामागतः तेनोक्तस्य कस्याश्चिदबलाया विप्रयुक्ताया वाक्यस्य त्वया यत् प्रतिवचनं दत्तं तत्पुनरपि भवान् कथयतु, यत्त्वन्मुखादेव पुनरपि दमयंती श्रोतुमिच्छती"ति। तच्छ्रुत्वा नलोभृशमव्यथिष्ट, तस्यलोचने अश्रुपूर्णे बभूवतुः, स दुःखं निगृह्य बाष्पगद्गदया गिरा पूर्वोक्तमेव प्रतिवचनमवोचत्। स तत् ब्रुवाणो बाष्पे रोद्धुमशक्नुवन्नश्रूणि व्यमुंचत्। ततः केशिनी गत्वा दमयंत्यै तदुक्तं सर्वं हृदयव्यथाश्रुपातादिकंच न्यवेदयत्॥

तच्छ्रुत्वा बाहुकं नलं संभावयंती दमयंती केशिनीमब्रवीत्, "केशिनि, भूयस्त्वं गच्छ परीक्षस्व, तत्समीपस्था किमप्यब्रुवाणा तस्य चारित्राणि जानीहि, याचितयापि तस्मै जलं नदेयं नवाग्निः, जलमग्निंच विना स कथंपचतीति लक्षय। यच्चान्यत् द्रक्ष्यसि तत्सर्वं मह्यमावेदनीयमिति"। एवं तयाभिहिता केशिनी पुनरपि

नलसमीपंगत्वा तस्य निखिलानि चेष्टितानि वीक्ष्य दमयंतीमुपेत्यावोचत् "भर्तृदारिके, बाहुकः स्थलपात्रशुद्ध्यादिपरो मया विलोकितः, न मया कुत्रापि तथाविधः पुरुषो दृष्टपूर्वः श्रुतपूर्वो वा, स ह्रस्वं द्वारमासाद्य नविनमति, किंतु आसन्नं तं दृष्ट्वा तदेव द्वारमुत्सर्पति, संकुचितं द्वारं विशालंभवति । किंच ऋतुपर्णार्थं राज्ञा पशुसंबंधि मांसं प्रेषितं तत्क्षाळनार्थं बहिर्गतस्य तस्य वीक्षणमात्रादेव बहिस्थापिता जलरहिताः कुम्भा जलपूर्णा बभूवुः । ततस्तेन पाकार्थं चुल्ल्यामिंधनानि निक्षिप्तानि, निक्षेपमात्रादेव तेष्वग्निरुदभूत् । तदेतान्यद्भुतानि मया दृष्टानि । किंचान्यदप्याश्चर्यं मया लक्षितं, यदग्निस्पर्शान्नासौ दह्यते । किंच पुष्पाणि तस्य पाणिभ्यां मृद्यमानान्यपि यथापूर्वं भूयः सुगंधीनि विकासितान्येव बभूवुः । विस्मयनीयान्येतानि दृष्ट्वा विस्मयापन्नाहमिहागते" ति । सातु तच्छ्रुत्वा चेष्टाप्रभावादिना नलमेव प्राप्तममन्यत । तथाप्याकारवैपरीत्यात्संदिहाना सा पुनः केशिनीमादिशत्, "पुनस्तदंतिकं गत्वा तेन संस्कृतं मांसं किंचिदाहरेति" तथैव तया गत्वा आनीतमुष्णं मांसं प्राश्य प्रागसकृदास्वादितनलसंस्कृताऽमिषा दमयंती बाहुकं नलं निश्चित्य पुनरेकवारं परीक्षिष्ये इत्यालोच्य भ्रात्रासममिन्द्रसेनां केशिन्यासह बाहुकांतिकं प्रैषयत् । बाहुकस्तु सुतौ दृष्ट्वा सत्वरं तावंकमारोप्य परिष्वज्य बद्धधारमश्रूणि मुंचंश्चिरं तूष्णीमरुदत् । अथाऽसकृन्मया आत्मनो विकारो दर्शित इति विलक्षोनलस्सहसा सुतावंकादवरोप्य केशिनीमवदत्, "ईदृशावेव मम बालकौ मातामहगृहे तिष्ठतः, अद्यैतयोर्दर्शनात्तयोः स्मरणेन मम दुःखमुत्पन्नं, सततं मत्समीपमायांतीं त्वां जनः शंकेत तद्गच्छेति" । ततः केशिनी शिशुभ्यां सहागत्य दमयंत्यै तत्सर्वमशंसत् ॥

अथ दमयंती मातुस्समीपं गत्वा तामवादीत्, "मातः,

नलशंकया मया केशिन्या बाहुको बहुशः परीक्षितः, स नल एवेति मे निश्चयः, किंतु रूपे परं संशयोस्ति तत्स्वयमेवाहं वेदितुमिच्छामि; तस्मात्स एववात्र प्रवेश्यतां अथवा मां वा तत्र गंतुमनुजानीहीति"। एवं सुतयाऽभिहिता देवी भीमायस्वभर्त्रे दुहितुस्तमभिप्रायं न्यवेदयत् । सोपि विचिंत्य बाहुकमंतःपुरं प्रवेष्टुमन्वजानात्। एवं पित्रा मात्राचानुज्ञाता सा बाहुकं स्वप्रतिश्रयं प्रावेशयत्। दमयंत्या दर्शनमात्रेण समुत्पन्नदुस्सहदुःखो बाहुकस्सहसा साश्रुलोचनो बभूव । तथाविधं तं विलोक्य दमयंती तीव्रशोकसमाविष्टा चेलांचलेन मुखं पिधाय रोदितुमारभत । ततः काषायवसना, मलावृतगात्रा, जटिला विरहपांडुकपोलपतितालका, सा बाष्पगद्गदकंठा, बाहुकमब्रवीत्, "बाहुक, अपिदृष्टश्श्रुतोवा त्वया कश्चित्पुरुषो नलादन्यः यःप्रियां श्रममोहितां विजने विपिने सुप्तामनागसमुत्सृज्य गतः, बाल्यात्प्रभृति किंतस्य महीपतेरपराद्धं मया, येन स महात्मा मां निद्रार्दितां कानने त्यक्त्वा गतः। पूर्वं यः साक्षादागतान्निंद्रादीनपहाय यया तत्समक्षं वृतः स कथं सानुरागां सपुत्रां तां मां त्यक्त्वा गत?" इति। एवं ब्रुवती दमयंती बाष्परुद्धकंठा वक्तुमसमर्था पुनर्भृशं रुरोद । तथाविधां तां दृष्ट्वा साश्रुलोचनो बाहुकोऽब्रवीत्, "भीरु, मामेव नलमवेहि, यत् त्वामत्यजं तन्नाहं स्वयमेव बुद्धिपूर्वकं कृतवान्, किंतु पापीयान् कलिः कारितवान् । स त्वया वनस्थया शोचंत्या शप्तः शापदहनदह्यमानो मच्छरीरे वसन् मम व्यवसायेन पूर्वतपसाच निर्जितः पापो मां विमुच्य गतः, ततोहं त्वदर्थमिहागतः, नहीह ममान्यत् प्रयोजनं, तन्नास्त्यत्र ममापराधः कियानपि; किंतु ब्रूहि कावा नारी त्वमिवानुरक्तं भर्तारमुत्सृज्याऽन्यं पतिं वृणुयात्? यत् भैमी स्वैरवृत्ता आत्मनोऽनुरूपमन्यं पतिं वरयिष्यतीति ब्रुवाणा दूताः पृथ्वीपतिशासनात्पृथ्वीं कृत्स्नां चरंती"ति। तच्छ्रुत्वा

भयकंपिता दमयंती प्रांजलिरेवमभाषत । " कल्याण, न मां दोषेण शंकितुमर्हसि, त्वदभिज्ञानार्थं मदुक्तानि तानि वाक्यानि ब्रुवाणा ब्राह्मणाः सर्वतोगताः, तेषु पर्णादोनाम ब्राह्मणः अयोध्यायामृतुपर्ण- सद्मनि तानि वाक्यान्यवोचत् । ततस्तेषां वाक्यानां त्वदुक्ते प्रति- वाक्ये तेनाहृते, त्वदृते नकोऽप्यन्यः शक्त एकेनाह्ना योजनशतमध्वा- नमश्वैर्गन्तुमिति त्वदानयनाय मयायमुपायः कृतः, नायं पित्रे भीमायाप्यावेदितः । स्पृशेयं तवैतौ पादौ नाहं दुष्कृतं किंचिन्मन- साप्याचरम् । यद्यहंमनसापि पापमाचरेयम्, तर्ह्येते भूतसाक्षिणः सदागतिस्तिग्मांशुश्चंद्रमाश्चेत्येते मम प्राणमोक्षणं कुर्युः, ब्रुवं- त्वेतेदेवाः इदं मदुक्तं सत्यं नवेति । एवमुक्तवत्यां तस्यां, अंत- रिक्षवर्ती वायुरभाषत, "राजन्, नैषा कृतवती पापमल्पमपि, सत्यमहं ब्रवीमि, एनया दमयंत्या स्फीतः शीलनिधिः सुरक्षितः, साक्षिणो रक्षिणश्चास्या वयं, त्वदानयनार्थैवानयायमुपायो विहितः, नात्र त्वया शंका कार्या, तत्संगच्छस्व निर्दोषया प्रिययाऽनया स हे"ति । एवमभिहितवति पवने पुष्पवृष्टिरंतरिक्षादपतत्, देव- दुंदुभिरनदत्, तदद्भुतं दृष्ट्वा विगताशंको नलः कार्कोटक दत्तयो- ररजसोर्वस्त्रयोरेकंपारधायापरं प्रावृत्यच स्वं रुचिरं रूपं प्रत्यपद्यत । नलमवाप्तनिजसुंदररूपं दृष्ट्वा दमयंती, 'हा! मम प्राणनाथे'तिब्रुवतीसरभसं प्रधाव्य दृढं तमालिंग्य उच्चैः प्राक्रोशत्। नलोपि यथापूर्वं भ्राजमानो भैमीं सस्वजे । सापि नलोरसि मुखं विन्यस्य तंपश्यंती शोकविकला चिराद्दृष्टोसीतिदीर्घं निशश्वास । नलोपि मललिप्तांगीं तन्वंगीं तां परिष्वज्य सुचिरं दुःखपरिप्लुत- स्तस्थौ । ततः सर्वं वृत्तांतं वैदर्भीजननी भीमायाकथयत् । भीमस्तां प्रत्यवादीत्, अहं कृतशौचं साध्वलंकृतं सुखोषितं दमयन्त्या स- हितं नलं श्वोद्रक्ष्यामीति । ततस्तौमुदितौ दम्पती वियोगात्प्रभृति कृतानिस्वस्वचेष्टितानि परस्परं कथयंतावेव तां निशां निन्यतुः ॥

प्रातश्च नलः स्नातः स्वलंकृतो दमयन्त्या स्नातालंकृतया सह गत्वा श्वशुरमभ्यवंदत। भीमभूपतिः प्रहृष्टस्तं यथावदभ्यर्च्याभ्यनन्दत्। अथ नगरे नलदर्शनेन हृष्टानां जनानां प्रहर्षजः स्वनः सुमहानभूत्। पताकाभिर्मालातोरणादिभिर्नगरमशोभत। राजमार्गाः सुसिक्तसम्मृष्टाः पौराणां द्वारिद्वारि कपिशफलभृतो रम्भास्तम्भा निबद्धाः। सर्वाणि दैवतान्यभ्यार्चितानि। वीणावेणुमृदङ्गादिविविधवाद्यघोषैः नगरं सर्वत्र पूरितं। ऋतुपर्णो राजा नलं दमयन्त्या संगतं श्रुत्वा भृशमहृष्यत्। स नलमानाय्य स्मयमानः, "राजन्, भवान् दिष्ट्या दारैःस्वैः समेत इत्यभिनंद्यावोचत्, राजन्, जाने मद्गृहे अज्ञातनिजस्वरूपं वसतस्तव न मया किंचिदप्यपराद्धमिति। यदि कदाचिदज्ञानेन यत्किंचिद्विप्रियं कृतमपि तत् क्षन्तुमर्हसी"ति। तच्छ्रुत्वा नलस्तं प्रत्यवोचत्, "नराधिप न मे त्वं स्वल्पमप्यपराधं कृतवानासि कदाचित्। कृतेपि तस्मिन्नमेकोपः, यतःक्षन्तव्य एव स मया; किंच यथा मद्गृहे तथैव त्वद्गृहे सुखमुषितोस्मी"ति। एवमभिहितो ऋतुपर्णः स्वनगरमयासीत्॥

गते तस्मिन् नलो न दीर्घं कालं कुण्डिने नगरे न्यवसत्। स मासमात्रमुषित्वा भीममामंत्र्याल्पपरिवारो रथैकेन पुरात्तस्मान्निषधान् प्रतिजगाम। ततः सहसैव निषधान् प्रविश्य पुष्करमासाद्यावाचत्, "पुष्कर, पुनर्दीव्याव यन्मया बहुवित्तमर्जितमस्ति। मम च दमयन्ती अर्जितंधनंचेत्येतत्सर्वं पणः, तवतुसराज्यं सपरिच्छदं जीवितं प्रतिपणः; यदित्वं द्यूतं नेच्छसि, तर्ह्यावयोर्युद्धं प्रवर्ततां, येनकेनाप्युपायेन वंशभोज्यं राज्यमार्जितव्यमितिहि वृद्धानां शासनं। तत् द्वयोरेकतरेबुद्धिः क्रियतामि"ति तच्छ्रुत्वा पुरेव ध्रुवमात्मजयं मन्वानः पुष्करस्सोपहासं नलमवदत्, 'राजन्, दिष्ट्या त्वया वित्तमर्जितं, दिष्ट्या च दमयन्त्या दुष्कृतमद्य क्षयंगतं, यद्धनेनानेनसह जिता वस्त्रभूषणाद्यलंकृता दमयन्तीमामुप-

स्थास्यते, सा मम हृदि सदा तिष्ठति, तत्तामद्य जित्वा कृतकृत्यो भवामी"ति। तच्छ्रुत्वा कोपारुणितनयनो नलस्तमभाषत, "किंवृथा जल्पसि, जित्वा व्याहरे"ति। ततः पुष्करस्य नलस्यच द्यूतं प्रावर्तत। ततो नलेन पुष्करः राज्यरत्नकोशादिभिस्सह पराजितो बभूव। पुष्करं जित्वा नलो हसन्नुवाच, "राजापशद, समग्रमिदं राज्यं निष्कंटकं मया जितं वैदर्भींतु त्वया वीक्षितुमपि नशक्या, तस्यास्त्वं सपरिवारस्सांप्रतं दासस्संवृत्तः। किंच मूढ, न त्वया तत्कर्म कृतं यदहं पूर्वं त्वया विजितः, कलिनातु तत्कृतं, अज्ञस्त्वं तन्नबुद्ध्यसे नाहं परकृतदोषं त्वय्यादधे अतोहं तव प्राणानवसृजामि, तथा ते स्वमंशं वितरामि, त्वं हि मे भ्राता, सौहार्दमपि मे त्वय्यस्ति, तद्गच्छ सुखं जीवे"ति। तच्छ्रुत्वा पुष्करो नलं प्रणम्य कृतांजलिरवोचत् "राजन् अक्षया तवकीर्तिरस्तु वर्षायुतं सुखी जीव, यस्त्वं ममप्राणान् अधिष्ठानं च वितरसी"ति। ततः पुष्करो राज्ञा सत्कृतः स्वजनैर्युक्तः प्रहृष्टः स्वं पुरं प्रययौ॥

अथ राजा हृष्टैरमात्यैः पौरैश्चाभिनंदितः स्वमंदिरं प्राविशत्। हृष्टे पुरजने प्रवृत्तेच महोत्सवे नलो महत्या सेनया दयितां दमयंतीं सपुत्रां स्वनगरीमानयत्। आगतायांच सपुत्राथां तस्यां प्रहृष्टो नलस्तया सह सुचिरं राज्यं शासत् सुखमवर्तिष्ट॥

श्रीशङ्कराचार्यचरित्रम्

पुरैकदा सर्वे देवाः कैलासमुपेत्य शिवं प्रणिपत्योचुः—"भो देवेदानीं बुद्धादिप्रणीतागमालम्बैर्जनैर्वसुन्धरा व्याप्ताम्नायदूषकैः। तदधुना श्रौतस्मार्तकर्मशून्या भारतभूरभूदिति श्रौतमार्गप्रवर्तनाय विना त्वया नान्यः शरणामि"ति। तदा शम्भुस्तानब्रवीत्—"भुवि मानुषीं तनुमाश्रित्य परमहंसपदधरोहं शङ्कराख्यया चतुर्भिः शिष्यैः सह वो मनोरथान्पूरयिष्ये, तद्भवन्तोपि मत्सहायार्थं मानुषीस्तनूर्धृत्वा मदीयागमनं प्रतिपालयन्तु, कुमारस्तु सुब्रह्मण्याख्यया भूतले मानुषो भूत्वा कर्मकाण्डमुद्धरतु, तत्सहायार्थं ब्रह्मापि मण्डनो नाम भूसुरः स्यात्, महेन्द्रोऽपि सुधन्वाख्यो भूपतिर्भवत्वि"ति। तदाज्ञया ते तथाऽभूवन्। कुमारोपि भट्टपादाख्यया भुव्यजनिष्ट। अथ केनचित्कालेन भट्टपादो वेदार्थसमीकरणाय सतां जैमिनिसूत्राणां तात्पर्यं स्फुटयन् सुधन्वनगरीं प्राप्य तत्र राज्ञा तेन पूजितस्तत्सभासनमध्यास्य कोकिलकूजितमाकर्ण्य तद्व्याजात्सौगतान् क्षोभयन्नेवं राजानमाह—

'मलिनैश्चेन्न सङ्गस्ते नीचैः काककुलैः पिक।
श्रुतिदूषकनिर्ह्रादैः श्लाघनीयस्तदा भवेः' इति॥

तत इमां वाचं निशम्य दशबला भृशं चुक्रुधुस्तस्मै। तदा भट्टपादो वादे बुद्धसिद्धान्तानखण्डयत्। ततः सुधन्वनृपतिरवादीत्—"भोः पण्डिताः शृणुत—नात्र मे विश्वासः किन्तु स्वमतमाश्रित्य यो गिरेः शृङ्गात्पतित्वाऽव्ययो भविष्यति तस्यैव

मतं ध्रुवमि"ति। ततः स भट्टपादो वेदान्स्मरन् गिरेः शृङ्गं समारुह्य "यदि वेदाः प्रमाणं स्युर्भूयात्काचिन्न मे क्षतिः" इत्युक्त्वाद्रेः शृङ्गाद् भूमौ पतंस्तूलराशिरिवाक्षतशरीर एवाऽभवत्। परं तु यदीति संशयद्योतकशब्दप्रयोगान्नष्टैकनयनोऽभूत्। एवमक्षतं तं पाण्डवं दृष्ट्वाकर्ण्य च द्विजाः दशभ्यो दिग्भ्यः समाययुः। तत्कृत्यमवलोक्य खलदूषितमात्मानं विचिन्त्य श्रुतिषु श्रद्दधानं नृपतिं तं दृष्ट्वा सौगतैरुक्तं–"नेदं मतनिर्णये प्रमाणं, मणिमन्त्रौषधिभिरपि देहरक्षा कर्तुं शक्ये"ति। ततस्तन्निशम्य भवतः प्रश्नमेकं पृच्छामि, प्रतिवक्तुं ये न प्रभवन्ति तान्यन्त्रोपलेषु घातयिष्यामीत्युक्त्वा नरपतिर्घटमाशीविषपूरितमेकमानीय 'किमत्रास्ती?' त्यपृच्छत्। 'श्वः प्रातरत्रास्योत्तरं वक्ष्याम' इत्युक्त्वा सर्व स्वस्वगृहाणि जग्मुः। तस्यां रात्रौ द्विजाः कण्ठपर्यन्तं पयसि स्थित्वा सूर्यं प्रसाद्य तदज्ञासन्। अन्येद्युः तत्सभामागत्य 'भुजगोऽत्र'ति सौगतैः, 'भोगिशयनोऽत्रे'ति द्विजैरूचे। तच्छ्रुत्वा म्लानमुखो राजा द्विजोक्तिः सत्येत्यशरीरिणीं वाचं श्रुत्वा कुम्भे तां मूर्तिमेव प्रेक्ष्य मुदमवाप। ततः श्रुतिद्विषः सर्वे वध्यन्तामित्यवनीपतेराज्ञया धर्मद्विषस्ते निहताः॥

ततः–कुमारिलमृगेन्द्रेण हतेषु जिनहस्तिषु।
निष्प्रत्यूहमवर्धन्त श्रुतिशाखाः समन्ततः॥

एवं तेन वैदिककर्ममार्गे पुनर्भुवि यथावत्प्रवर्तिते शिवो धरातलेऽवतितीर्षया केरलनरपतेः स्वप्नेऽवदत्—"पूर्णाभिधाया ह्रादिन्यास्तटे मत्कृते प्रासादमेकं परिकल्प्य मदीयां सपर्यां सपरिकरां विधेही"ति। स तदा तदाज्ञानुसारेण प्रासादं निर्माय तत्र शिवलिङ्गं प्रतिष्ठाप्याऽर्चनं नित्यं व्यधात्। तस्यानतिदूरे कालटिनाम्न्यग्रहारे वेदवेदाङ्गपारगो विद्याधिराजनाम्ना ख्यातो भूसुरो न्यवसत्। तस्य शिवगुरुर्नाम तनुजोऽभूत्। स साङ्ग-

वेदानधीत्य गुरोराज्ञया गृहमागत्य पित्रोरनुग्रहेणानुरूपां वधूं लब्ध्वा तया सह सत्पुत्रोत्पादयिषया शिवं भक्त्या पूजयांचक्रे। ततः कदाचिन्निद्रां गतः स्वप्ने महेश्वरेण 'वत्स, वरं वृणीष्वे'त्युक्तः शिवगुरु'रेकं भवन्तमिव सर्वज्ञं सर्वशक्तिं च पुत्रं मे देही'ति वरं वव्रे। तदाकर्ण्य तथास्त्विति महेश्वरेणोक्तस्तस्यां रात्रौ स शम्भुतेजसा युक्तस्तस्यां धर्मपत्न्यां गर्भमाधत्त। ततः सुमुहूर्ते सा शंकराख्यं पुत्रं सुषुवे। ततः स पुत्रजन्म श्रुत्वा जातकर्मादीनि कर्माणि निर्वर्त्य परमानन्दमवाप॥

ततो देवेषु मध्ये विष्णुर्विमलोदराद्विदुषः पद्मपादनामा, वायुर्हस्तामलकनामा,ऽग्निस्त्रोटकनामा, ब्रह्मा मण्डनाभिधो यः सुरेश्वरनामाभूत्। वरुणश्चित्सुखनामा प्रादुरभूत्। मण्डनमिश्रः सुरेश्वरोऽभूत्। वाचस्पतिरानन्दगिरिरभूत्। नन्द्यानन्दगिरिरभूदिति केचित्॥

अथैकदा वेदान्पठन् दुर्वासा महर्षिः स्वीयस्वरस्खालित्यं वीक्ष्य हसन्तीं सरस्वतीं 'मनुष्ययोनिं प्रतिपद्यस्वे'ति शशाप। तेन ऋषिभिरनुनीतेनाऽस्यास्तावन्मानुषं जन्म यावन्मानवशम्भोर्दर्शनं, ततः सा देवत्वं प्राप्स्यतीत्युक्ता सा शोणातीरे विष्णुमित्राख्यद्विजवर्यस्य सद्मन्याजन्मासिद्धसकलवेदवेदाङ्गा श्रीसरस्वत्युभयभारत्याख्यया प्रादुर्भूता। योग्ये वयसि विश्वरूपनाम्ने विद्याविनयसम्पन्नाय ब्राह्मणाय स्वपित्रा दत्ता। स एव सकलशास्त्रज्ञो विश्वरूपो मण्डनमिश्राख्यया विश्रुतोऽभूत्॥

श्रीशंकरः प्रथमे वर्षे स्वदेशभाषामजानात्। द्वितीये वर्णविज्ञानपुराणकथाश्रवणादिकमकार्षीत्। तृतीये तु दैवादस्य पिता मृत्युमयासीत्। चतुर्थे महेशतः सर्वज्ञतां प्राप। पञ्चमे गुरुणोपनीतः सांगान्वेदानधीत्यार्थतो व्याकरोत्। षड्दर्शनमूलः,

इतिहासस्थाणुर्निगमशाखः, षडंगपल्लवः, सूत्रपुष्पो, मन्त्रशलाटुः ज्ञानपक्कफलः, श्रीशंकरकल्पवृक्ष आसीदित्यानन्दगिरिः ॥

अथैकदा श्रीशंकरो गुरुगृहे वसन् भैक्षचर्यां चरन् कस्यचिन्निर्धनस्य भूदेवस्य गृहान्प्रविश्याह 'ॐ भवति भिक्षां देही'ति, तच्छ्रुत्वा विप्रवधूरुवाच–"भगवन्, वयं विधिना वञ्चिता त्वादृक्षाय भोजनदानेऽप्यसमर्थाः स्म" इत्युक्त्वाऽऽमलकफलं भिक्षां ददौ। ततो विप्रस्त्रियस्तद्वचनमाकर्ण्य तेनैव सन्तुष्टः श्रीशङ्कर उवाच— "भगवति कमलालयेऽस्या ब्राह्मणस्त्रियो गृहे सन्तुष्टा सततं वसे"ति। ततस्तद्गृहांगणे सपद्येव श्रिया सन्तुष्टया श्रीशङ्करस्य पुरः प्रादुर्भूय 'वत्स वरं वृणीष्वे'त्युक्तः श्रीशंकरः 'तर्ह्यस्या ब्राह्मणस्त्रियो गृहं कनकामलकपूर्णं विधेही'ति वरमवृणोत् । ततः सा तद्विप्रगृहं तदा कनकामलकैः पूर्णं विधाय तत्रैवान्तर्हिता वसतिं चकार। षष्ठेऽब्दे सर्वशास्त्रवेत्ताऽभूत्। ततः सप्तमे श्रीशंकरो गुरोर्गृहात्प्रतिनिवृत्य मातृसेवापरोऽभवत्। कदाचित् तन्माता नदीं स्नानार्थं गता विललम्बे। ततो गृहान्निर्गत्य श्रीशंकरस्तन्नदीतीरे प्राप्तमोहां तां दृष्ट्वा जलार्द्रैः पंकजैर्वीजयन् गृहमानैषीत् । प्रत्यहं रविकिरणैः सा क्लिश्यतीति विचिन्त्य स स्तुत्वा तां नदीं स्वगृहद्वारं प्रापयति स्म। एवं लोके विख्यातं श्रीशङ्करं श्रुत्वा केरलानां राज्ञा राजशेखरेण प्रेषिते स्वामात्ये मृगाङ्के तन्नयनाय प्रणम्य सोपहारं स्वनिवेदितं विज्ञापयति, भैक्षमन्नं परिधानमजिनं नैजं कर्म च विहाय कुभोगैर्वयं किं कुर्महे इत्याचार्योऽवदत्। ततस्त वृत्तान्तं स नृपतये न्यवेदयत्। ततस्स स्वयमेवागत्य प्रणम्योपविश्य कुशलप्रश्नानन्तरं सादरं स्वकृतं नाटकत्रयं तस्मै श्रावयामास। तेन प्रसन्नः श्रीशङ्करस्तं वरेण च्छन्दयामास । ततः कदाचिदुपमन्युदधीचिगौतमागस्त्यप्रमुखान् शङ्करं द्रष्टुमागतान्मुनीनवलोक्य तन्माता मधुपर्कार्घ्यादिना

सत्कृत्य कियदस्यायुरितिसाञ्जलिबन्धं प्रार्थयामास। तां तेऽब्रवन्नस्यायुरस्य‍– 'अष्टायूंष्यस्य भवन्ति वयमष्टायूंषि वरं दास्यामः'। ततः सर्वे श्रीशङ्करमामन्त्र्य यथागतं जग्मुः। ततः स तच्छ्रुत्वा मातरं यतिर्भूत्वा दीर्घायुर्भवामीति सान्त्वनैः सान्त्वयामास। "रे बाल गृहस्थो भूत्वा क्रतुभिरिष्ट्वाऽन्ते यतिर्भवेति"त्युक्तवतीं मातरं वेदान्तोक्तिभिः समाहितचित्तामकरोत्। अष्टमेऽब्दे संन्यासायाज्ञामददतीं मातरं साश्रुन्तय सरितं गत्वा स्नानार्थं जलान्तः प्रविश्य ग्राहग्रहार्तो 'हा! अम्ब, ग्राहेण धृतो न बहिश्चलितुं पारये' इत्यवदत्। माता तस्य तां वाचं श्रुत्वा तदवस्थं पुत्रं पश्यन्ती तत्प्रतीकारमपश्यन्ती च भृशं विललाप। 'अम्ब, यदि मे जीवितं तुभ्यं रोचते तर्हि मां संन्यासायाज्ञापय तेन ग्राहग्रहमुक्तो भविष्यामी'त्युक्ता माता जीविताशया संन्यास एव वरमिति मत्वा तत्क्षण एवाज्ञां तस्मै ददौ। ततः स तत्रैव संन्यस्य नक्रग्रहान्मुक्तः सलिलादुत्ततार। उत्तीर्य च मातरं प्रणम्ये'त आरभ्याम्ब पैतृकरिक्थग्राहिभिस्त्वं पालयसे। यदा मां स्मरिष्यसि तदा त्वत्सन्निधौ सन्नद्धोऽस्मि, मामनाथां त्यक्त्वा निर्गतो बाल इति मा चिन्तये'ति शङ्करो मातरं सान्त्वयित्वा स्वबान्धवानपि तथा सम्बोध्य तस्यास्तेषां चाज्ञां लब्ध्वा दूरतो गन्तुमियेष। ततः प्रस्थितः स नदीतीरे देवालये स्थितस्य भगवतः कृष्णस्याशरीरिणीं 'तरङ्गैर्नदी मां ताडयति, नेह वस्तुं क्षमे' इत्येवंविधां वाचं श्रुत्वा तां मूर्तिं भुजाभ्यां प्रोद्धृत्य निर्बाधे प्रदेशे स्थापयित्वा प्रणम्य प्रतस्थे। वनमध्याच्चरन्नर्मदातटे श्रीगोविन्दपूज्यपादान् जिगमिषुः केनचिन्मुनिना दर्शितायां गुहायां दूरतो यतीशं दृष्ट्वा प्रणम्य स्तुतिभिस्तुष्टाव। ततस्तच्छ्रुत्वा श्रीगोविन्दपूज्यपादास्तं प्रोचुः—'कस्त्वमि'ति। ततः श्रीशङ्कर आह— "मनोबुद्ध्यहंकाराचित्तानि नाहं श्रोत्रं न जिह्वा न च घ्राण

नेत्रम् । न च व्योम भूमिर्न तेजो न वायुश्चिदानन्दरूपः शिवोऽहं शिवोऽहम्" इति। ततः स तं कार्यार्थमवतीर्णं शङ्करं ज्ञात्वा गुहाया द्वारे पुरस्कृतौ स्वौ चरणौ पूजितवतेऽङ्गीकृतस्वशिष्यत्वाय सम्प्रदायपरम्पराप्राप्तं तत्त्वमसीत्यादिश्रुतिवाक्यैरद्वैतं ब्रह्मतत्त्वमुपदिदेश। अथैकदा श्रीशङ्करो नर्मदापूरघोषेण गुरूणां समाधिविघ्नं ध्यायंस्तत्सलिलं कमण्डलूदकेन सम्प्रोक्ष्य सर्वं तन्नदीसलिलं स्वकमण्डलौ न्यवेशयत्। वृत्तान्तमिमं लोकमुखादाकर्ण्य श्रीगोविन्दयतयः परं हृष्टास्तमूचुः—"शारदाकाशवत्तत्त्वं भातं ते स्वधियाऽनया," तदधुना काशीं गत्वा तत्र तत्त्वं मुमुक्षुभ्यो बोधयंस्तिष्ठ, पुरा हिमाचले मुनिसंसदि श्रीमद्व्यासो वेदान्तं शशंस, तदा मया पृष्टं भगवंस्त्वया सर्वे वेदा विभक्ताः, महाभारतं कृतं, ब्रह्ममिमांसा निर्मिता। योगभाष्यं रचितं, केचित्तेषां वादेऽर्थमन्यथा कल्पयन्ति, 'तस्माद् भाष्यं भवता कर्तव्यम्" इति। तदाकर्ण्य श्रीमद्द्वैपायनः प्रत्यभाषत—"इममेवार्थमधिकृत्य पुरा दैवतैः पृष्टेन भवेन तदर्थं स्वावतारः प्रतिश्रुतः, 'यः सकलं नद्यम्भः कुम्भे संहरीष्यति स एवावतीर्णः शङ्करः वेदान्तभाष्यं करिष्यति' इति, भिक्षो भवते तदद्य मया तत्त्वज्ञानं बोधितं, जगदुद्धरणार्थं काशीमधिवस, 'तत्र विश्वनाथदर्शनं ते भविष्यति' इति। ततो गुरोरनुज्ञया तं प्रणम्य शङ्करः काशीं गत्वा गङ्गायां स्नात्वा विश्वेशमन्नपूर्णां च मनसाभ्यर्च्य स्तुत्वा च तां काशीमध्युवास। ततः कश्चिच्चोलदेशजं पुरः प्रगम्य स्थितं निवेदितस्ववृत्तमाचार्यः शिष्यत्वेन स्वीचकार, यः सनन्दनः पद्मपादाख्यया ख्यातिं गमिष्यति। अन्ये चित्सुखानन्दगिर्यादय एनं शङ्करं प्राप्य तत्रैव शिष्यत्वमापुः॥

ततः कदाचित्स्नानार्थं गङ्गां गच्छन्नाचार्यः पथि चण्डाल-

मेकं श्वभिश्चतुर्भिर्वृतं दृष्ट्वा त्यज पन्थानं मा नः स्प्राक्षीरिति प्राह। एवं वदन्तं तं वीक्ष्य स चण्डालः प्रत्यभषत—'भो दाण्डिस्त्यज मार्गमिति कं भवान्वक्ति? देहं वा देहिनं वा?' तदुभयमपि न घटते, यतोऽन्नमयान्नान्नमयं भिन्नं, कथं त्वयि प्रत्यगात्मनि ब्राह्मणान्त्यजयोर्भेदो नदीसरआदिषु प्रतिबिम्बितसवितृवत्, शरीरेष्वशरीरं सन्तं विस्मृत्य कथं ते मिथ्यैव कलेवरेऽहन्ता, 'मायया महान्तोपि मुह्यन्ति' इति। ततः स तदुक्तिं निशम्याविक्षुब्धचित्तः शङ्कराचार्य उवाच—'भो, यत्त्वयोक्तं तत्सत्यं, शास्त्रविशारदा बहवः पण्डिताः सन्ति, तत्त्वविदो विरला एव' इति ततस्तमेव चण्डालं वेदचतुष्टययुक्तं विश्वेश्वरं ज्ञात्वा स्तुतिभिरस्तौत्। ततस्तुतः स प्रसन्नो भूत्वा 'कर्मठं भट्टभास्करं, मण्डनं, प्रभाकरं नीलकण्ठं शैवं, गुप्ताख्य शाक्तं, चैवमादीञ्जित्वा शिष्यान् कृत्वा च मतमद्वैतं प्रख्यापय' इति शङ्करं समादिश्यान्तरधात्। तत आचार्यो जाह्नवीं गत्वाद्भिः खानि स्पृष्ट्वा हृदि स्थितमीशं ध्यायन्वेदार्थान्विचारयामास।

श्रीमच्छंकराचार्यो द्वादशे वर्षे ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्यैतरेय-तैत्तिरीय-च्छान्दोग्य—बृहदारण्यकोपनिषदां भाष्याणि विरच्य तत्रतत्र शिष्यानध्यापयामास। तेषु मुख्यः शिष्यः सनन्दनोऽभूत्। ततः कदाचित्सनन्दनं जाह्नव्या दक्षिणपारे स्थितमुत्तरपारस्था आचार्या आह्वयन् तरणसाधनाभावात्कथं गन्तव्यमिति पर्यालोच्य श्रीगुरुचरणौ ध्यात्वा सनन्दनः गङ्गाप्रवाहं प्राविशद्यदा तदा जह्नुकन्या पद्मान्यश्रयामासास्यपदोन्यासार्थम्। ततस्स तेषु पद्मेषु पदे विनिवेश्य श्रीगुरुसन्निधिमाययौ। ततस्तं प्रीत्याश्लिष्य गुरुस्तस्मै पद्मपादाख्यां ददौ। ततः स आचार्यः कुतर्किणां पण्डितानामद्वैतपरं वेदान्तार्थमधिक्षिपतां मतानि खण्डयित्वा सर्वांस्तान् जित्वा

शिष्यांश्चकार। ततः समन्वयाविरोधसाधनफलाख्याध्यायचतुष्टयोपेतस्य (= शारीरकमीमांसाशास्त्रस्य = उत्तरमीमांसाशास्त्रस्य) भाष्यमकारीत् ॥

कदाचित्काश्यां शारीरकभाष्याध्यापनसमये वृद्धब्राह्मणरूपेणागतो व्यास उवाच—'त्वत्कृतशारीरकभाष्ये कस्याप्येकस्य सूत्रस्य व्यासाशयं वर्णये'ति। ततस्तदाऽऽचार्यः "तदनन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्" (व्या. सू. ३.१.१.) इति सूत्रार्थं वर्णयामास। ततस्तं श्रुत्वा नायं व्याससम्मतोऽर्थः किंतु प्रकारान्तरेणेति ब्राह्मणोऽन्यथायमर्थं वर्णयामास। सोऽर्थः श्रुतिविरुद्ध इत्यसकृत्प्रत्यपादि भाष्यकृता। ततः पद्मपादशिष्योक्त्यैनं व्यासं ज्ञात्वाचार्येण स्तुतो व्यास एनमाचार्यं तद्भाष्याणि च प्रशशंस। दैवयोगेन जन्मसिद्धप्राप्ताष्टायुषां ततः स्वमातृकृतागस्त्यादिप्रार्थनया प्राप्ताष्टायुषां चेत्येवं षोडशायुषामन्तिमदिवसान्त्यभागे तत्र मणिकर्णिकायां शरीरपरित्यागे प्रवृत्तायाचार्याय 'लोके प्रवृत्तानां मतान्तराणां वादेन निरासपूर्वमद्वैतशास्त्रप्रचारं निर्वर्त्य शरीरं त्याज्यं नान्यथे' त्येतदुक्तिमङ्गीकृतवतेऽस्मै भगवान्बादरायणः पुनः षोडशायूंषि वरं दत्त्वान्तर्दधौ। ततो दिग्विजयार्थं काश्याः प्रस्थितोऽयमाचार्यः प्रयागे त्रिवेण्यां स्नानादिकर्माणि निर्वर्त्य नास्तिकमतप्रवृत्तान्निर्जित्य स वैदिकमार्गप्रतिष्ठापकत्वेन प्रसिद्धं प्राभाकरादिशिष्यपरिवृतं तुषाग्नौ प्रविष्टमनेकसोमयज्ञहविर्यज्ञसंस्थाभिरुत्तरक्रतुभिश्च प्रीणितेन्द्रादिदेवगणं भाट्टरहस्यादिग्रन्थकर्तृत्वेन प्रसिद्धं भट्टपादं गत्वा तेन सत्कृतस्तत्प्रार्थनया तस्मै स्वकृताद्वैतभाष्यग्रन्थान् श्रावयामास। तेनातीव स तुतोष। ततस्तुषाग्निप्रवेशे कारणमाचार्यस्तं पप्रच्छ। "बौद्धमतनिरासार्थं तदीयग्रन्थाध्ययनसमये वेदनिन्दां श्रुत्वा सभायामश्रूणि पातयन्तं मां दृष्ट्वाऽयं ब्राह्मणोऽस्मद्विरुद्धपक्षीय

इति मां बौद्धाः सौधाग्रात्पातयामासुः, तदाहं 'वेदाः प्रमाणं चेन्न मे कापि क्षतिः स्यात्' इति ब्रुवन्वृक्षात्पुष्पमिवाबाधित-शरीरोऽपतम्; तथापि चेदिति पदप्रयोगेण सन्देहसूचनादेकेनाक्ष्णा काणोऽभूवम्। वैदिकमतविरुद्धबौद्धग्रन्थाध्ययनबौद्धग्रन्थाध्यापक गुरुद्रोहाभ्यां जातस्य पापस्य नाशाय तुषाग्निप्रवेशेन प्रायश्चित्त-मनुतिष्ठामि। साक्षाच्छिवस्वरूपस्य तव दर्शनेन कृतार्थोऽस्मि, भाष्यस्यास्य वार्तिकं कृत्वा यशो लब्धुमिच्छामि च"त्या-चार्यं स व्यज्ञापयत्। तत आचार्य उवाच—'सौगतादी-नामसाधूनां विनाशाय शिक्षणाय वा षडाननस्त्वं भट्टपाद-रूपेणाविर्भूयैवमकरोरतस्त्वमपापी' इति। तच्छ्रुत्वा 'अहमपापीति त्वदुक्त्या बोधितोऽप्यारब्धप्रायश्चित्तस्य त्यागो लोकविद्विष्टत्वान्न युज्यते, मह्यमद्वैतात्मतत्त्वमुपादिश; येनाहं मुक्तः स्याम्। कर्ममार्गस्य प्राधान्येन प्रवर्तकमतीव प्रसिद्धं दुर्वाससः शापेन मनुष्यरूपायाः सरस्वत्याः पतिं मण्डनमिश्रं पण्डितं वादेन विजित्य तेन भाष्यस्यास्य वार्तिकं कारये'ति भट्टपाद आचार्यं व्यजिज्ञपत्। ततस्तस्मै अद्वैतात्मतत्त्वमुपादिदेश। तेन स मुक्तोऽभवत्॥

तत आचार्यो योगबलेन व्योममार्गेण सशिष्यो नर्मदातटे माहिष्मतीं पुरीं गत्वा तत्र तद्गृहं विचार्य कपाटपिनद्धस्य गृहस्याङ्गणं व्योम्नैव गत्वा स्वपितृश्राद्धे जैमिनिं व्यासं च निमन्त्र्य भोजनार्थमर्चयन्तं तं कर्मठमपश्यत्। सोऽप्येनमप-श्यत्। तयोर्विचित्राणि प्रश्नोत्तराण्यभवन्। यदा क्रुद्धोऽयं मण्डनमिश्रस्तेन सह दुर्भाषणं कर्तुमारभत तदा व्यासेन दुर्भाषणान्निरुद्धो यतिरूपं साक्षाच्छिवमेनं न्यमन्त्रयत्। तदा-चार्येण नाहमन्नभिक्षार्थमागतस्त्वां किंतु वादभिक्षार्थमागतः, परस्परं पराजये परस्परमाश्रमव्यत्ययः कार्य इत्युक्तः स श्व आरभ्य मध्याह्नसमये वादोऽस्त्विति निश्चित्य तान् भोजयामास।

स्वयं शिष्टं कर्म समाप्य मण्डनमिश्रोऽपि भुङ्क्ते स्म। ततो व्यासजैमिनी 'माध्यस्थ्ये सरस्वतीं स्थापये' त्युक्त्वाऽगच्छताम्। यदा परेद्युर्मध्याह्ने सभायां कर्मब्रह्मवादिनोः कर्मब्रह्माद्वैतविषये वाद आरब्धस्तदा माध्यस्थ्ये स्थितया सरस्वत्योभयोः कण्ठे एकैकां पुष्पमालामामुच्य 'यस्य माला म्लास्यति स पराजित इति ज्ञेयमि' ति समर्थं कृत्वा पाकाय महानसं सरस्वती प्रविवेश। एवं वादो यावदभूत्तावत्प्रत्यहं 'भिक्षार्थमागच्छे' त्याचार्यं 'भोजनार्थमागच्छे' ति पतिं चाहूयोभयोर्भिक्षाशने अदात्। एवं विवदतोः सप्तमे दिवसे सरस्वती मण्डनमिश्रगलस्थया मालया म्लानयाऽऽचार्येण पराजितं मण्डनमिश्रं निश्चित्य पाकोत्तर 'मुभावपि भिक्षार्थमागच्छतामि' ति हर्षेणाकारयामास। ततस्तयोर्भिक्षोत्तरमाचार्यः प्रणम्य तां 'त्वया दुर्वाससः शापेन मानुषभावान्मोचिते' त्युक्त्वा ब्रह्मलोकं जिगमिषुं तां वनदुर्गामन्त्रेणास्तम्भयत्। मण्डनमिश्राय 'मुमुक्षुणा विद्योपलब्धिपर्यन्तं चित्तशुद्धिसंपादकत्वेन श्रौतानि स्मार्तानि च कर्माणि कार्याण्येवे' ति जैमिन्याशयं प्रकाशयामास। जैमिनिरपि मण्डनमिश्रेण ध्यात आगत्याचार्योक्तमेव व्याजहार। एवं 'शरणामि' ति शरणागतं वीक्ष्य मण्डनमिश्रं 'तदर्धाङ्गीं मामविजित्य कथं मत्पतिर्जितः स्यादि' त्युक्त्वाचार्येण सह सा वादमारभत। वादेनाजय्यं तं ज्ञात्वा कामशास्त्रीयप्रश्नैनैनं जेष्यामीति निश्चित्य तत्र प्रश्नांश्चकार। तत आचार्यो 'मासात्परमुत्तरं दास्यामी' त्युक्त्वा शिष्यान्यावदागमं स्वदेहरक्षणे नियोज्य स्वकलेवरं गिरिगह्वरे संस्थाप्य मृतस्यामरुकराजस्य कलेवरं योगबलेन प्राविशत्। ततस्तत्पत्नीमन्त्रिप्रभृतयो राजानं लब्धसंज्ञं ज्ञात्वा तं माङ्गलिकवाद्यैः सौधं निन्युः। क्रमेण कामशास्त्रीयविषयाननुभवन्तं राजकार्यादिष्वतीव चतुरं तं ज्ञात्वा "नायं प्राक्तनो राजा किं तु कोऽपि

महागुणाकरो योगी परकायप्रवेशविद्ययास्मद्राजशरीरं प्रविष्टः। क्वापि स्थापितं स्वदेहं पुनर्गच्छेच्चेन्महती हानिरस्माकं तदा स्यात्, तस्मात्तद्देहनाशायाऽस्माभिर्यतितव्यमि" ति निश्चित्य 'यत्र क्वापि मृतशरीरं यद्यद् दृश्यते तत्सर्वं तदैव दाह्यमेवे'त्याज्ञाप्य नानादिक्षु ते भटान् प्रेषयामासुः। 'मासे च व्यतीते आचार्ये प्रत्यागमनमकुर्वाणेऽ'स्मासु कैश्चिच्छरीरमेतद्रक्षणीयं कैश्चित्तत्परिमार्गणाय गन्तव्यमि'ति निश्चित्य कांश्चिद्देहरक्षणाय नियोज्य पद्मपादादयः कर्णाकर्णिकयाऽमरुकराजं मृतं प्राप्तसंज्ञं प्राक्तन-विलक्षणशीलादिसम्पन्नं लोकमुखाच्छ्रुत्वा तत्र गायकवेषेण राजसभां प्रविश्याद्वैतब्रह्मप्रतिपादकानि पद्यानि गायन्तो राजानं ज्ञातस्वागमनं ज्ञात्वा प्रतिनिववृतिरे। तैर्भृत्यैस्तत्रतत्र लब्धमृत-मानुषशरीराणि दग्ध्वा दग्ध्वा तच्छरीरं लब्ध्वा दग्धुं प्रवृत्तैः सह युध्यमानांस्तच्छिष्यान्बलाद् दूरीकृत्य दह्यमानं स्वकलेवरं दृष्ट्वा नृहरिं तुष्टावाचार्यः। तेन तुष्टः सोऽग्निं तं पीत्वाऽन्तर्दधे।

ततो मण्डनमिश्रः परकायप्रवेशेन कामशास्त्रीयविषयज्ञं ज्ञात्वा "ऽऽवां त्वया जिता 'वित्यवदत्। सरस्वतीं निजं धाम यास्यन्तीमाचार्यः' सरस्वतीं त्वां ब्रह्मणः पत्नीं जाने, त्वं लोकोप-कृतयेऽस्मदीये स्थाने निवसन्त्यद्वैतमतद्वेष्टॄन्विजित्याद्वैतसिद्धान्ता-न्प्रकाशये'ति प्रार्थिता स'त्योमि'त्यूरीकृत्य निजं धामागच्छत्। ततो मण्डनमिश्रस्त्रिंशत्तमे विक्रमशके संन्यासग्रहणेनाचार्यस्य शिष्योऽभवत्तत्त्वमस्यादिमहावाक्योपदेशादिभिः सह। ततो योगबलेनातिशान्तचित्तः स्वात्मारामः (७२५) पञ्चविंशत्यु-[1]त्तरसप्तशतीवर्षाणि भुवि वसति स्म। तत आचार्यः 'स्वात्मा-रामेषु सुरेषु यतो भवान् श्रेष्ठोऽतस्त्वं सुरेश्वरनामासी'-

[1] तन्नामान एव पञ्चविंशत्युत्तरसप्तशतीवर्षेष्वभूवन् यथा गौडपादा-चार्यावधि व्यासपरम्परा शुकाचार्यपरम्परा वा।

त्युवाच। सोप्याचार्येण सहैव दिग्विजयायागच्छत्। त्रिवलिक्षेत्रे मूकाम्बादर्शनायागतमाचार्यं योगिनं श्रुत्वा प्रभाकरो नाम धनिकः स्वपुत्रमतिजडमाचार्यसमीपं निनाय। तदाचाचार्यस्तं ब्रह्मैकनिष्ठं ज्ञात्वा 'कस्त्वमि' त्यपृच्छत्। तेन जन्मान्तरार्जितोपासनाबलेनाचार्यसान्निध्यवशेन च 'ब्रह्मैवाहमस्मी' त्यादिरूपेण हस्तामलकवत्सत्तत्त्वेनिरूपिते तमाचार्यो नाम्ना हस्तामलकमकरोत्। सोऽपि स्वयमाचार्यशिष्योऽभवत्। ततः पुत्रमेनमाचार्ये समर्प्य पुत्रप्रभावज्ञः प्रभाकरः स्वगृहं ययौ॥

स ततः सर्वैः शिष्यैः सह शृङ्गगिरिं प्राप्य तत्र भाष्याण्यध्यापयामास। एकदा गिरिनाम्नः कस्यचिच्छिष्यस्य भाष्याध्यापनायागमनं प्रतीक्षति 'तस्य भाष्यार्थग्रहणशक्त्यभावेन तत्प्रतीक्षा व्यर्थे' ति पद्मपादस्य गर्वोक्तिं श्रुत्वा स मनसा तस्मै चतुर्दश विद्या अनुजग्राह। तेनागमनसमय एवातीव हृष्टो ज़ीवब्रह्मैक्यविषयैस्त्रोटकवृत्तैराचार्यमुपतस्थे। ततः पद्मपादादयो हृष्टास्तं प्रशशंसुः। सोपि तेन हेतुनाऽऽनन्दगिरिस्त्रोटकाख्योऽभवत्, यः ब्रह्मसूत्रोपनिषद्भाष्याणां व्याख्यानानि कुर्विन्त्याचार्येण नियुयुजे॥

ततः स आचार्य एकदा सुरेश्वरप्रार्थनया तं भाष्यवार्तिकनिर्माणे नियोजयामास। तच्छ्रुत्वा चित्सुखाचार्यप्रभृतिभिः शिष्यैः कर्मठेन तेन कृतं भाष्यवार्तिकं श्रीमच्छिष्यस्यापि त्वद्भाष्याननुगुणमेव स्यान्न तदनुगुणमिति जैमिनेः कृतिवत्कर्मठानामेवोपयुज्येत नमुमुक्षूणामिति सनन्दन आनन्दगिरिर्वा नियोज्यतामित्यूचे। पद्मपादेन हस्तामलको नियोज्यतामित्यूचे॥

अपत्येन सह नद्यां स्नानार्थमागतायै कस्यचित्स्वस्य शिशुं तत्र तपस्यतोऽङ्के उपवेश्य स्नात्वा प्रत्यागत्य तदङ्कात्पतित्वा मृतं तं शिशुं दृष्ट्वा रुदन्त्यै स्वयं मृतशरीरे प्रविश्य हस्ताम-

लकाचार्यो जीवयित्वार्पयद्यो हस्तामलकः पूर्वजन्मन्येव तपश्चर्याभिः सिद्धो विरक्तो न ग्रन्थरचनारूपे प्रवृत्तिमार्गे प्रवृत्तः स्यादिति पद्मपादमाचार्य उवाच—'त्वया कर्मठेन वेदान्तविषये करिष्यमाणे वार्तिकेऽभिरुचिर्नैषामिति त्वया सूत्रभाष्ये वार्तिकं न कार्यं किंत्वद्वैतब्रह्मपरं कंचन नैष्कर्म्यगोचरं नैष्कर्म्यासिद्ध्याख्यं ग्रन्थं निर्मायैभ्यः प्रदर्शये'ति गुरुणाज्ञप्तेन सुरेश्वराचार्येण नैष्कर्म्यसिद्ध्याख्यो ग्रन्थो व्यरचि। सोयं तेन स्वस्यापि कर्मठत्वनिरासकः प्रादर्शि चाचार्यादिभ्यः। ते तमेनं दृष्ट्वातीव चित्रितहृदयाः परं प्रशशंसुः। तत आचार्येण मण्डनमिश्रो बृहदारण्यकोपनिषद्भाष्यस्य तैत्तिरीयोपनिषद्भाष्यस्य च वार्तिकं कुर्वित्याज्ञप्तस्तद्द्वयं कृत्वा तस्मै प्रदर्शयामास। योऽसौ वाचस्पतिमिश्रो भविष्यति प्रारब्धकर्मणा सोऽयं मण्डनमिश्रस्तत्सृष्ट्वाऽऽचार्यमतीव तोषयामास॥

पद्मपादाचार्येण ब्रह्मसूत्रशाङ्करभाष्यव्याख्या चक्रे। तत्र द्वितीयाध्यायप्रथमपादशांकरभाष्येण सहिते प्रथमाध्यायसूत्रशांकरभाष्ये पञ्चपादाः प्रचरेयुः, तत्रापि चतुःसूत्र्येव प्रसिद्ध्येदित्याचार्योक्त्या तावत्येव व्याख्याऽऽचार्येण श्रुता पञ्चपादिकेतिनाम्ना प्रसिद्धाते। चित्सुखादयोप्यद्वैतब्रह्मपरग्रन्थान्कृत्वाऽऽचार्यं संप्रार्थ्य तदाज्ञया तीर्थक्षेत्रादिकान्ययुः। एवं शृङ्गगिरौ निवसन्नाचार्यः स्वमात्रा कृतं स्वस्मरणं योगेन ज्ञात्वा देशान्तरे सुदूरे स्थिताया अपि मातुः समीपं योगबलेन प्राप्य प्रणनाम। सापि चिरात्प्राप्तं तं समीक्ष्यातीव तुतोष। तत आचार्यो मातरं प्रणम्य 'किमपेक्ष्यत ऐहिकमामुष्मिकं वे'त्याचार्यस्य वाचं निशम्य जीर्णशरीरस्य धारणे नाहं शक्तास्मि, तत एतच्छरीरं यथाशास्त्रं संस्कृत्य स्वर्गं प्रापयेत्युक्तो महेशं तुष्टाव। ततो महेशस्तुष्टस्तदाशयं ज्ञात्वा पार्षदांस्तन्मातुरानयनाय प्रेषयामास।

तान् दृष्ट्वा वैकुण्ठमेव गन्तुकामां तां ज्ञात्वा शैवपार्षदाननुज्ञाप्य स हरिं तुष्टाव। तेन तुष्टो हरिः स्वयमागत्य प्रणतं यतिवरं दृष्ट्वा 'भूतले त्वत्कृताः सूत्रभाष्यादिका अद्वैतग्रन्था लोकैरङ्गीकृताः, ब्रह्मलोकेपि सिद्धेषु ते सर्वे प्रसिद्धिमुपयान्तु, त्वन्माता मया सहैव दिव्यं रूपमास्थाय वैकुण्ठमागच्छतु' इत्याचार्यं प्रशस्य तया सह विमानेन वैकुण्ठं जगाम। ततो बन्धुभिराहूतैरन्यैश्च तत्रत्यैर्ब्राह्मणैरज्ञातशास्त्रमर्यादैर्यतेर्मातुः संस्कारेऽधिकारो नेति धिक्कृतस्तेभ्यस्तदर्थमग्निमप्यलब्ध्वा काष्ठानि नदीतीरे सञ्चित्य स्वबाहुं प्रमथ्याग्निमुत्पाद्य मातुः शरीरं प्रदाह्य तान्—"इत आरभ्य यूयं वेदबाह्या वह्निसंस्कारशून्याः संन्यासिनां भिक्षादाने योग्या न भवत, शूद्राचाराश्च भवत" इति शप्त्वा योगबलेन शृङ्गगिरिं जगाम॥

ततः सनन्दनो गुरोरनुज्ञया स्वात्मानन्दमनुभवन्नेव तीर्थयात्रां कुर्वाणो दक्षिणस्यां दिशि कालहस्तिक्षेत्रं गत्वा तत्र जलाशये स्नात्वा साम्बं प्रणम्य काञ्चीं गत्वा ततः शिवकाञ्च्यामेकाम्रेश्वरं विष्णुकाञ्च्यां वरदराज च प्रणम्य पुण्डरीकपुरं (=पण्डरपुरं) गत्वा तत्र शिवेन 'नृत्येन श्रान्तोऽस्म्यत्रैवैहि गङ्गे' इत्याह्वानमात्रेण तत्रागतायां शिवगङ्गेति नाम्न्यां प्रसिद्धायां गङ्गायां स्नात्वा शिवं सम्पूज्य ततो रामेश्वरं जिगमिषुः कावेर्यां स्नात्वा स्वमातुलं दिदृक्षुः शिष्यैः सह तद्गृहं गत्वा कुशलप्रश्नादिसल्लापैः मातुलं तोषयामास। स मातुलो भागिनेयाय भिक्षां दत्त्वा तच्छिष्यानपि भोजयित्वा स्थितस्तच्छिष्यान्पार्श्वे स्थितं पुस्तकं दृष्ट्वा कोऽयं ग्रन्थ इत्यपृच्छत्। ते चायं ग्रन्थः, पद्मपादाचार्येण त्वद्भागिनेयेन कृता श्रीमच्छंकरभगवत्पादपूज्यरचितब्रह्मसूत्रभाष्यस्य टीकेत्यवदन्। ततः पद्मपादस्तां दिदृक्षवे तस्मै तामदात्। मातुलस्तं ग्रन्थं दृष्ट्वा तत्र

श्रुतिस्मृतियुक्तिभिः खण्डितं प्राभाकरमतं ताभिरेव स्थापितं, जीवब्रह्माद्वैतं च पर्यालोच्य तदसहमानः कापट्येन प्रीतिं प्रदर्शयन्नत्रैव 'त्वत्प्रत्यागमनपर्यन्तमेतत्पुस्तकमस्तु, तत एनं नय, तावदहं पर्यालोचयामी'त्यब्रवीत्। तथेति पद्मपादस्तस्मै तत्पुस्तकं दत्त्वा रामेश्वरं श्रीरामसेतुं च गत्वा श्रीरामसेतुं श्रीरामेश्वरं श्रीरामं च नत्वा ततो यात्राक्रमेण प्रतिनिवृत्य मातुलगृहमागमिष्यंस्तत्र मार्ग एव तद्गृहं तत्पुस्तकं च दग्धं श्रुत्वा मातुलं गत्वा गृहदाहेन न मे दुःखं तत्पुस्तकदाहेन यद्दुःखं तन्न शाम्यतीति तदुक्तिमसहमानोऽपि शान्तचित्तत्वाद्दग्धं चेत्तद्गच्छतु पुनरपि तादृशं ग्रन्थं करिष्यामीति तमब्रवीत्। ततो मातुलः पुनरयं तं ग्रथं करिष्यत्येव तेनास्मद्गुरोः प्रभाकरस्य मतं निर्नाम भवेदेवेत्यालोच्य बुद्धिमान्द्यकरं द्रव्यं तद्दिने तस्मै भिक्षार्थमदात्। ततः पद्मपाद (=सनन्दनः) स्तेन बुद्धिमान्द्यं जानंस्ततः श्रीगुरुं द्रष्टुं केरलानगच्छत्। श्रीगुरुरपि तदैव केरलानगच्छत्। तत्र स तं प्रणनाम। ततस्तयोः कुशलप्रश्नानन्तरं पद्मपादः स्वग्रन्थदाहं स्वबुद्धिमान्द्यं च तस्मै विज्ञापयामास। ततः श्रीगुरुणा पूर्वं स्येनश्रुतं पञ्चपादिकाभागमात्रमन्ववदत्। तेन यथाश्रुतमानुपूर्व्येणोक्तं पद्मपादो विलिलेख तुतोष च। तथा राजशेखराख्येन राज्ञा स्वकृतं नाटकत्रयं यत्पूर्वं स्वस्मै श्रावितं ततः पश्चाद्दग्धं चाभूत्तदिदं नाटकत्रयं दर्शनार्थमागतस्य तद्राजस्य कुशलप्रश्नानन्तरं प्रार्थनयाचार्यैः यथाश्रुतमन्ववादि। तेनानूदितं तत्स राजा लेखकेन लेखयामास। श्रीमतः शङ्करभगवत्पादस्य तदिदं सर्वं सर्वेषामत्याश्चर्यवहमभूत्। ततोऽनेन राज्ञा तं कां सेवां करिष्यामीति प्रार्थयामास। कालटीनामकेऽग्रहारे मया यथा ब्राह्मणाः शप्तास्ते तथैव वेदाग्निबहिष्कृता यतिभिक्षादानयोग्याश्च स्थापनीयास्त्वयेति

स तमाज्ञापयामास। स तं प्रणम्य तथास्त्वित्युक्त्वा स्वनगरमयात्॥

ततः श्रीमच्छङ्करभगवत्पादः शिष्यैः सुधन्वराजस्य पुरं गत्वा तेनार्चितो लोके भ्रष्टस्य वैदिकमार्गस्य पुनः प्रवर्तने यतमानाय मह्यं त्वया साह्यं कार्यमित्युक्तिं श्रुत्वा तथास्त्विति प्रतिश्रुत्यानुगच्छता तेनानुगतो रामेश्वरं गच्छन्पथि मद्यलोलुपान् शाक्तान् जित्वा रामेश्वरादिकं प्राप्य रामनाथादीन् प्रणम्य चोलद्रविडपाण्ड्य काञ्चिवेङ्कटाद्रिगतान्वैदिकमार्गभ्रष्टान् जित्वा ततः कर्नाटदेशं गत्वा वेदबाह्यान्कापालिकान् जेतुं प्रववृते। ततश्च क्रकचनामा कापालिक आचार्यमागत्य भैरवार्चां विहाय न कदाचिन्मोक्षः स्यादित्येवं स्वपक्षमाचार्येण श्रुतिप्रमाणादिना खण्डितं नाङ्गीचकार। ततस्तं तद्देशाधिपत्यात्स राजा निष्कासयामास। ततः स बहुभिर्ब्राह्मणैः स्वानुयायिभिरन्यैः कापालिकैस्त्रिशूलोद्यतकरैर्युद्धे प्रसक्तो बभूव। ततो राज्ञा केचन गृहीताः। केचन निर्मूलिताः। ततः शिष्टा गृहीताश्च तन्मतस्वीकारपूर्वकमाचार्यं शरणं प्रापुः। तेषु ये विप्राणां हननोद्यता आसंस्तान्हुङ्कारेण स भस्मसाच्चकार। ततः स क्रकचः स्वपराभवमसाहमानः कपालधारी पीतमैरेयो भैरवं नेत्रे निमील्य दध्यौ। स ध्यानमात्रेण सन्निहितं भैरवं जह्येनं भिक्षुमित्यवदत्। स भैरवो मद्रूपे शिवावतारे त्वया बह्वपराद्धमित्युक्त्वा तच्छिरोऽच्छिनत्। तत आचार्येण स स्तुतोऽन्तर्दधे। ततस्तेभ्योप्यद्वैतात्मतत्त्वमुपदिश्य गोकर्णक्षेत्रं गत्वाम्बुधौ निमज्ज्य गोकर्णेशं प्रणम्य तत्रैव स्वकृतं सूत्रभाष्यादिकं तदधिकारिभ्य उपदिशन्नासीत्। ततस्तत्र स्वशिष्येणोक्तः शैवो नीलकण्ठाचार्यो बहुभिः शिष्यैः सहाचार्यं वादेन जेतुमाजगाम। ततः स वादे तन्मतं खण्डयित्वा तस्मै वैदिकमद्वैतात्मतत्त्वमुपादिदेश। स्वभाष्याणि प्रचार्य तत्रतत्रैवं स

गुर्जरसौराष्ट्रादिदेशादौ वेदमार्गं प्रवर्तयामास । ततो द्वारवतीं गत्वा स पाञ्चरात्रानुयायिनो वैष्णवाञ्जित्वा श्रीकृष्णस्य पूजा परं कार्यैवेत्युपदिश्य स्वभाष्याणि प्रचार्य ततोऽवन्तीं गत्वा महाकालेश्वरं प्रणम्य तत्रैव देवालये तत्राचार्यत्वेन प्रसिद्धं पद्मपादाह्वमागतं द्वैतमतानुसारेण ब्रह्मसूत्रवृत्तिकृतं बहुशिष्यं खण्डितकाणादकापिलमतसिधान्तं प्रणम्य स्थितं भट्टभास्करं स वेदान्तसूत्रैः स्वीयद्वैतमतनिरूपाय प्रेरयामास । ततस्तेनोक्तानां श्रुतिविरुद्धार्थानां खण्डनेन तं तथा तत्रैवागतमर्हन्नामानं नास्तिकं ततः पारदान्देशान् गत्वा तत्र प्रसिद्धं हर्षमिश्राख्यं विद्यामदोद्धतं, ततः कामरूपं गत्वा तत्र शक्तिसूत्रभाष्यकारमभिनवगुप्ताचार्यं, ततः कोसलान्, ततो गौडदेशे मीमांसानिपुणं कर्मठं मुरारिमित्रं, नानाशास्त्रज्ञं धर्मगुप्तं, न्यायशास्त्रज्ञमुदयनाचार्यं च विजित्य तत्रतत्र ब्रह्माद्वैततत्त्वज्ञानसम्पादकानि स्वभाष्याणि प्रचारयामास ॥

स्वमतपरित्यागमनिच्छन्नभिनवगुप्त आचार्यं कृत्याप्रयोगेण (अभिचारेण) भगन्दरं रोगं प्रापयामास । स तं शिष्यप्रार्थनया भिषग्भिराचार्यसंस्मृतामरेन्द्रप्रेषिताभ्यामश्विभ्यामपथ्यनिवार्यं तथाभिनवगुप्तयुक्ताभिचारप्राप्तं विज्ञाय नृसिंहमन्त्रजापेन तं प्रोत्सार्य गङ्गातीरे व्योम्नोऽवतरन्तं ब्रह्म ध्यायन्त गुरोरपि गुरुं श्रीगौडपादाचार्यं दृष्ट्वा ननाम । ततो गौडपादाचार्य आह "गोविन्दभगवत्पादमुखात्त्वया कृतानि सूत्रोपनिषद्गीताभाष्याणि श्रुतानि, त्वया कृतस्य मत्कृतमाण्डूक्यवार्तिकभाष्यस्य श्रवणायागतोऽस्मी"ति । ततः स तं सर्वाणि सूत्रोपनिषद्गीतामाण्डूक्यवार्तिकभाष्यणि श्रावयमास । तेन तुष्टः स वरमात्मानन्दानुभवरूपं तस्मै दत्त्वान्तर्दधे । ततः काश्मीरमण्डलं गत्वा सरस्वतीमन्दिरस्य दक्षिणेन द्वारेण प्रविश्य निरुन्धतो (=प्रतिषेधतः)

विदुषो वादेन विजित्यान्तर्गृहं शिष्यैः सह प्रविश्य भद्रासनमारुरुक्षत्याचार्येऽशरीरवाण्याविर्बभूव—'पीठारोहे सर्वज्ञतैव न कारणं किन्तु शुद्धाचरणमपि, तत्त्वाये नास्ति-यतस्त्वया परकायप्रवेशेन पराङ्गनोपभुक्ता, एतद्विद्याभद्रासनं सतां सिद्धानामारोहणाय योग्य्।' इति। तां श्रुत्वा यतीन्द्रेण 'नायं देहोऽशुद्धः येन देहेन तत्कृतं तत्तद्देहस्यैवाशुद्धतापादकं नान्यस्य देहस्य। अन्यथा केनचिच्छूद्रेण प्राग्जन्मनि कृतेन केनापि पुण्यविशेषेण विप्रजन्मलाभेपि वेदाधिकारो न स्यात्' इत्यादिकमुक्तमाकर्ण्य शारदा तूष्णींबभूव। ततः स विद्याभद्रासनमारुरोह। तन्मण्डलस्थान्पण्डितानद्वैतसम्प्रदायप्रवर्तने नियोजयामास च। ततः स कैश्चिद्विद्वद्भिः सह शृङ्गगिरिं (श्रृंगेरी) प्राप्याद्वैतभाष्याण्यध्यापयन्नास्त स्म। स तत्र शीतार्दितांस्तान्दृष्ट्वा शङ्करं सम्प्रार्थ्य तदनुग्रहेणोष्णोदकं तं देशं प्रापयामास॥

ततो दिक्षु चतुर्षु चतुरो मठान्निर्माय तत्पीठे पद्मपादादिकाञ्छिष्यान्प्रतिष्ठापयामास। मूर्तिपूजाविमुखान्स्वयं बहिर्गताञ्छिष्यान्दूरीकृत्य अन्येभ्यः मूर्तिपूजादिकं तपश्चर्यादिकं चोपादिदेश। एवं कृतकृत्य आचार्यो द्वात्रिंशे वयस्यतीते ब्रह्मादिभिर्यतीशं कृतकार्यं कैलासं नेतुमागतैर्बोधितो त्रिनेत्रादिमता निजेन रूपेण विमानमारुह्य कैलासं जगामेति शिवम्॥

श्रीकृष्णचरितम्

जन्मवृत्तान्तः

(तदाऽऽत्मानं सृजाम्यहम्)

सोमवंशे शूरो नाम सात्वतो बभूव। तस्य मारिषा नाम पत्न्यभवत्। तस्यां चासौ वसुदेवपूर्वान्दशपुत्रानजनयत्। वसुदेवस्य जातमात्रस्यैवतद्गृहे भगवदंशावतारमव्याहतदृष्ट्या पश्यद्भिर्दैवैर्दिव्या आनकदुन्दुभयो वादिताः। ततस्तदैवासावानकदुन्दुभिसंज्ञामवाप। उग्रसेनाग्रजस्य देवकस्य देवकीं नाम तनयां स उपयेमे। विवाहसमये वररथमुग्रसेनात्मजो भोजाधिपः कंसः स्वयं सारथिर्भूत्वा नुनोद। तत्कालेऽशरीरिणी वागुदचरत्—'मूढ, यामिमां भर्त्रा सह रथे स्थितां देवकीं वहसि, तस्या अष्टमो गर्भस्ते प्राणानपहरिष्यति' इति॥

तदाकर्ण्य वज्रपाताहत इव नष्टचेतनोऽस्तमितविवेको विस्मृतबान्धवस्नेहः कंसः कृपाणपाणिर्देवकीं प्रत्यधावत्। 'महाबाहो, भवतेयमात्मस्वसा न हन्तव्या। सकलानप्यस्या गर्भांस्तुभ्यमहं समर्पयिष्ये'—इति वसुदेववचनगौरवात्कंसो देवकीं न जघान॥

एतस्मिन्नन्तरे भूरिभारावपीडिता देवी धरित्री मेरुगते त्रिदिवौकसां समाजे गत्वा प्रणम्य च साश्रुपातं करुणार्थग्रथितामात्मदशां तेभ्यः कथयामास—"सुरोत्तमाः, साम्प्रतमिमे दैत्या मां समाक्रम्याहर्निशं प्रजा बाधन्ते। भगवता विष्णुना

हतपूर्वः कालनेमिर्महासुरोऽधुना कंसो भूत्वा दौरात्म्येन मम हृदयमर्म च्छिनत्ति। अन्येऽप्यरिष्टादयोऽसंख्याता दुरात्मानो नृशंसैराचारैर्मां पीडयितुं बद्धपरिकरा वर्तन्ते। अमरेश्वराः, प्रसादं कुरुत। पङ्के गौरिवावसीदामि। किं करोमि? भवन्त एव शरणम्। अतो विज्ञापयामि। नातः परमात्मानं बिभर्तुमलम्। महाभागाः तथा कर्तुमर्हथ यथा नाहं रसातलं गच्छेयम्'' इति॥

एतच्छ्रुत्वा, त्रिदशैः प्रचोदितो ब्रह्मा, 'सर्वात्मानं जगन्मयं भुवो भारावतारणार्थं शरणं याम, येन स आत्मांशेनावतीर्य पृथ्वीपालनाय धर्मस्थितिं करिष्यति'—इत्युक्त्वा, देवैः सह क्षीराब्धितटं गत्वा, समाहितमना भगवन्तं गरुडध्वजं श्रुत्यर्थगर्भितेन स्तोत्रेण तुष्टाव। प्रीतात्मा विश्वरूपधरो हरिर्ब्रह्माणमाह—'प्रजापते, भद्रं ते? तव भक्त्या स्तोत्रेण च प्रसन्नोऽस्मि। सर्वमहं जानामि। आचिरादेवैषा भूतधात्री सकलदुःखविनिर्मुक्ता भविष्यति। इमौ मे सितकृष्णौ केशौ वसुधातलेऽवतीर्य भुवो भारक्लेशं हरिष्यतः। सुरास्तावत्प्रथमं महीतले स्वांशैरवतीर्योन्मत्तैर्महासुरैर्युद्धं कुर्वन्तु। मद्दृक्पातचूर्णिता अशेषा अपि दैतेया निःसन्देहं क्षयं यास्यन्ति। अयं मे कृष्णः केशो वसुदेवपत्न्यां देवक्यामष्टमो गर्भो भविता। स एव कंसमन्तं गमयिता' इति॥

एतद्भगवद्वचनमाकर्ण्य हर्षोत्फुल्लनयना ब्रह्मपुरोगमाः सुरा मेरुपृष्ठमाजग्मुः। अखिलमेनं वृत्तान्तं नारदो मुनिः कंसमाचचक्षे। तदुपश्रुत्य कुपितः कंसो देवकीं वसुदेवं च गृहे गुप्तावचारयत्। यथाप्रतिज्ञातं वसुदेवोऽपि जातं जातं पुत्रं कंसाय समर्पयति। तं तं च कंसो विनाशयति। एवं षट् पुत्रास्तेन मारिताः। सर्वेऽप्येते विष्णुप्रयुक्तया योगनिद्रया देवकीगर्भे क्रमेण स्था-

पिता हिरण्यकशिपोः पुत्रा आसत्। हतेषु तेषु भगवतः शेषाख्योऽशो देवक्यामंशांशेन गर्भत्वमवाप। तं गर्भं विष्णुनादिष्टा योगनिद्रा संकृष्य, रोहिण्यां नामान्यस्यां वसुदेवस्य भार्यायां निवेशयामास ॥

ततो भगवान् हरिर्लोकत्रयोपकाराय देवक्या गर्भं प्रविवेश। योगनिद्राऽपि विष्णुसमादिष्टा तस्मिन्नेव दिने यशोदाया गर्भे संबभूव। अस्मिन्मङ्गलावसरे दिवि ग्रहगणः सम्यक् प्रचचार। ऋतवः स्वस्वालङ्कारैर्दिशः आनन्दमयीश्चक्रुः। आपन्नसत्वां भगवतीं देवकीमतितेजस्वितया न कश्चिदपि द्रष्टुं शशाक। स्त्रीपुरुषैरदृष्टा देवतागणा वपुषा विष्णुं बिभ्राणां तां सहर्षं सादरं च तुष्टुवुः ॥

अथाच्युतभानुनाऽखिलजगत्पद्मबोधाय देवकीपूर्वसंध्यायामाविर्भूतम्। तज्जन्मदिनं शशिनः कौमुदीवाह्लाद्यमलदिङ्मुखं बभूव। जायमाने जनार्दने सन्तः समधिकं संतोषं, चण्डमारुतः प्रशमं, निम्नगाश्च प्रसादं सममेव ययुः। सिन्धवश्च जलनिनादेन मनोहरं वाद्यं चक्रुः। गन्धर्वपतयश्च ललितं जगुः। अप्सरोगणाश्च ननृतुः। देवाश्च पुष्पवर्षाणि ववर्षुः। अग्नयश्च शान्ता जज्वलुः। जलदाश्च मन्दं जगर्जुः ॥

आनकदुन्दुभिश्च फुल्लेन्दीवरपत्राभं श्रीवत्सवक्षसं चतुर्बाहुं तमुदीक्ष्य, प्रसन्नाभिर्वाग्भिरभिष्टूय, कंसाद्भीतो विज्ञापयामास— 'भगवन् शङ्खचक्रगदाधर, ज्ञातोऽसि मया। प्रसादेन दिव्यमिदं रूपमुपसंहर। अन्यथाऽयं दुरात्मा कंसोऽद्यैव मम मन्दिरे त्वामवतीर्णं ज्ञात्वा मम यातनां करिष्यति'। एवमेव वात्सल्यवती देवक्यपि तं तद्रूपमुपसंहर्तुं प्रार्थयामास ॥

'पुत्रार्थिन्या त्वया पूर्वं स्तुतोऽधुना तव पुत्रो जातः'— इति तामुक्तवन्तं धृतबालरूपं कृष्णं कंसत्रस्तः पुत्रवात्सल्यप्रेरितो वसुदेवो रात्रावेवादाय ततो निर्जगाम। व्रजति तस्मिन्सर्वेऽपि

रक्षिणो मधुराद्वारपालाश्च योगनिद्रया मोहिता बभूवुः । अत्युल्बणं वर्षति जलदसमुदाये शेषः फणेन तमाच्छादयामास । नानावर्तसमाकुलाप्यतिगम्भीराऽपि यमुना कृष्णेन सहातिक्रामति वसुदेवे जानुदघ्नजला वहति स्म । वार्षिकं करमादाय प्रतितटमागतान्नन्दादीन्गोपवृद्धान्वसुदेवो ददर्श । तस्मिन्नेव काले यशोदाऽपि [1]योगनिद्रां कन्यां सुषुवे । योगनिद्रया किल मोहवशं नीतेऽखिलजने दारिकास्थाने स्वतनयं स्थापयित्वा तां चादाय वसुदेवः प्रत्याजगाम ॥

ततो रक्षिणो देवकीशयने बालध्वनिं श्रुत्वा सहसोत्थिताः । सत्वरं देवकीप्रसवं कंसायाऽऽवेदयामासु । तूर्णमुपेत्य, मुञ्च मुञ्चेति सन्नकण्ठया देवक्या निवारितोऽपि कंसः प्रसभं बालिकां गृहीत्वा शिलापृष्ठे चिक्षेप । एवं क्षिप्ता सा वियति कृतपदा सायुधाष्टमहाभुजा सरोषं कंसमब्रवीत्—'मूढ, किं मया क्षिप्तया? जात एव तव मृत्युः । तदाशु संप्रधार्यात्मनो हितं क्रियताम्' इति । एवमुक्त्वा सा पश्यतो भोजराजस्य दर्शनपथादन्तर्हिता ॥

अथ कंस उद्विग्नमना भूत्वा प्रलम्बादीन्महासुरानाहूय तैः साकं मन्त्रयांचक्रे—'असुरपुङ्गवाः, मद्वीर्यतापितैरमरैर्मां हन्तुं यद्यपि यत्नः कृतस्तथाप्येतास्तृणाय मन्ये । किमल्पवीर्येणेन्द्रेण । किं तपस्विना हरेण । किं छिद्रेष्वसुरघातिना हरिणा । किं सवसुभिरप्यादित्यैः । किं वा निर्बलैरग्निभिः । किं न दृष्टं भवद्भिर्यदमरपतिः पृष्ठेनैव बाणान् वहन् संयुगादपागच्छत्? यदा शक्रेण मद्राष्ट्रे वृष्टिर्वारिता तदा मदीयबाणनिर्भिन्नैर्जलमुग्भिर्जलं किं न मुक्तम्? मद्गुरोर्जरासंधादृते सर्वेऽप्यवनीपालाः किं संनतिं न याताः? सर्वथा मेऽमरेष्ववज्ञा । तेषु यत्नपरेष्वपि

---

[1] नन्दगोपस्य भार्या ।

मे हास्यं जायते। तथापि दुरात्मनां तेषामपकारायास्माभिर्यतनीयम्। तत्पृथिव्यां ये केचिद्धर्मपरायणा ये केचिच्च यज्विनः सन्ति, देवापकाराय तेषां सर्वात्मना वधः कार्यः। विशेषतस्तूद्रिक्तबलानां बालानां वधे परमो यत्नः कर्तव्यः' इति॥

ततः कंसो देवकीं वसुदेवं च निरोधतो मुमोच। 'वृथैव मया युवयोरर्भका निहताः। अन्य एव कोऽपि मम नाशाय बालः समुद्भूतः। अलं परितापेन। यद्भावि तदन्यथा न भवति। अथवाऽऽयुषोऽन्ते को वा न विहन्यते' इति चाऽऽश्वासयामास॥

---

२. बाललीला

(लोकवत्तु लीलाकैवल्यम्)

विमुक्तो वसुदेवः पुत्रानिष्टमाशङ्कमानः पुत्रवात्सल्येन प्रेर्यमाणश्च नन्दस्य शकटं समुपेत्य, 'दिष्टया वर्धसे वार्धके पुत्ररत्नलाभेन'---इति सादरमभिनन्द्य च तमुवाच—'भद्र, नृपतेर्वार्षिकः सर्वः करो दत्तः। यदर्थं सर्वे यूयमागतास्तत्कार्यं निष्पन्नम्। तत्किं स्थीयते? शीघ्रं निजगोकुलं गम्यताम्। वक्तुमयुक्तमपि किञ्चिदुच्यते—'तत्र मे रोहिणीप्रसवो बालको वर्तते स आत्मतनयवद्रक्षणीयः' इति॥

एवं संबोधिता नन्दपुरोगमा गोपाः शकटारोपितैर्भाण्डैर्गोकुलं जग्मुः। तत्र क्षेमेण निवसतां तेषां कंसप्रेरिता पूतना मूर्तिमती कालरात्री रात्रौ विषमयस्तनदानेन बालकान् हन्तुं प्राप। मुखनिवेशितस्तनः कृष्णः सकोपं तस्याः स्तनं कराभ्यां गाढमवपीड्य प्राणसहितं पपौ। विमुक्तमहारावा विच्छिन्नस्नायुबन्धना पूतना तत्क्षणान्ममार। तन्नादश्रुतिविह्वलाः प्रबुद्धाः

व्रजौकसः ससंभ्रममागत्यातिभीषणमृतपूतनोत्सङ्गे क्रीडन्तं कृष्णं ददृशुः ।

प्रवेपमानहृदया कृष्णैकनिष्ठनयना निरस्तभीत्यादिविकारा यशोदा सहसैव कृष्णं हस्ताभ्यामुज्जहार । दृढं च तं स्नेहैकमूर्तिरामीलितलोचना हृदयेन परिषस्वजे । अनन्तरमनन्तरान्गोपादीन् ददर्श । 'प्रतिहतममङ्गलम्'—इत्युक्त्वा सा कृष्णे गोपुच्छभ्रामणेन बालदोषमपाकरोत् । नन्दगोपोऽपि गोकरीषमुपादाय 'हरिस्त्वां रक्षतु केशवस्त्वां रक्षतु महीधरस्त्वां रक्षतु'—इति रक्षां चकार ।

कदाचिच्छकटस्याधस्ताच्छयानः कृष्णः स्तन्यार्थी प्ररुदन् पादावूर्ध्वं चिक्षेप । तस्य पादप्रहारेण सकलमपि शकटं परिववृते । सर्वाणि च कुम्भभाण्डादीनि विपरीतानि भूत्वा ध्वंसमवापुः । तदा गोपेषु गोपीषु च हाहाकारो महानभूत् । गोपा आगत्योत्तानशायिनं बालं ददृशुः । केन-केनेदं शकटं परिवर्तितमिति पप्रच्छुः । बाला ऊचुः—'अनेन कृष्णेन शकटं पातितम्' इति । तदा तेऽतीव विस्मिता बभूवुः । यशोदा च शकटं तदारूढभग्नभाण्डकपालिकाश्च दधिपुष्पफलाक्षतैरर्चयामास ।

अथ वसुदेवप्रणोदितो गर्गः प्रच्छन्न एव गोकुले रामकृष्णयोः संस्कारानकरोत् ।

स्वल्पेन कालेन तावुभौ घृष्टजानुकरौ रिङ्गि[1]णौ बभूवतुः । करीषभस्मदिग्धाङ्गावितस्ततो भ्राम्यन्तौ निवारयितुं न यशोदा नापि रोहिणी शशाक । कदाचिद् गोवाटमध्ये क्रीडतः । कदाचिद् वत्सवाटं गच्छतः । कदाचिच्च गोवत्सपुच्छमाकर्षतः । यदाऽतिचञ्चलावकेस्थानचरौ क्रीडन्तौ तौ वारयितुं यशोदा नैष्ट, तदा सा कोपाविष्टा यष्टिमादाय तर्जयमाना कृष्णमुलू-

[1] जानुभ्यां कराभ्यां च भुवं संघृष्य संचरन्तौ ।

खले दाम्ना बबन्ध। 'अधुना यदि शक्नोषि तदा चञ्चल-चेष्टित गच्छ पश्यामि'—इति वदन्ती सा गृहकर्म कर्तुमारेभे। तां च तस्मिन्व्यग्रां दृष्ट्वा कृष्ण उलूखलं कर्षन् यमलार्जुनमध्येन जगाम। तेन तौ यमलार्जुनौ सहसा भग्नौ भूमौ पेततुः। तज्जन्यं कटकटाशब्दं समाकर्ण्य सर्वोऽपि व्रजजनो धावन्समायातः। ते चोन्मूलितौ महाद्रुमौ, तन्मध्यगतं च दाम्नोदरे बद्धं नवोद्गताल्पदन्तांशुसितहासं बालकं, स्तिमितदृष्ट्या निरैक्षन्त।

ततो गोपवृद्धा महोत्पातभीरव उद्विग्नाः सन्तो मन्त्रयांचक्रिरे—'अनेन स्थानेन न कार्यमस्माकम्। अन्यन्महावनं गच्छामः। अत्र हि बहव उत्पाता दृश्यन्ते। वृन्दावनं तावद्रमणीयम्। तदेव शीघ्रं गच्छामः' इति।

तत्क्षणेन यूथशो वत्सबालान्कालय[1]न्तो व्रजौकसः शकटैर्गोधनैश्च वृन्दावनं प्रययुः। तत्रातिरूक्षेऽपि घर्मकाले प्रावृट्काल इव समन्ततो नवं सस्यमुद्बभूव। स सर्वो व्रजश्चन्द्रार्धाकारसंनिवेशः शकटीवाटपर्यन्तो वृन्दावने समावासितः॥

ततःप्रभृति सप्तवर्षदेशीयौ रामदामोदरौ विश्वपालावपि वत्सपालौ बभूवतुः। बर्हिपत्रकृता[2]पीडौ वन्यपुष्पावतंसौ काकपक्षधरौ वंशवाद्यकृतस्वनौ तौ कुमारौ हसन्तौ च क्रीडन्तौ च वृन्दावनजनमनो जह्रतुः। गोपपुत्रैश्च समं वत्सांश्चारयन्तौ विचेरतुः॥

व्यतीतेषु कतिपयदिनेषु, प्रावृट्कालः समुपागतः। तस्मिन्मुदितौ रामकृष्णौ गोपालैः सह महावन इतस्ततो व्यहरताम्। क्वचिच्छीतवृक्षतलाश्रयौ गेयनृत्यरतौ, क्वचित्कदम्बस्रक्चित्रौ क्रीडाकदम्बकासक्तौ, क्वचिद्गिरिधातुचित्रिताङ्गौ विविधव्यायामव्यापृतौ, क्वचित्पर्णशय्यामधिशयानौ निद्रारसास्वादपरौ,

---

[1] चालयन्तः। [2] मयूरपिच्छकृतशेखरौ।

क्वचिद्गर्जति जीमूते हाहाकाररवाहतौ, क्वचिद्गायतां गोपानां प्रशंसातत्परौ, क्वचिच्च मयूरकेकानुकारिणौ गोपवेणुवादनोद्यतौ, तावुभौ वने वने यथेच्छं सञ्चेरतुः॥

एकदा रामं विना कृष्णो वृन्दावनं ययौ। सर्वतश्च भ्रमँल्लोलकल्लोलशालिनीं कालिन्दीमवाप। तत्र विषाग्निशृतसलिलं महाभीषणं कालियनागस्य ह्रदं विलोक्य भगवांश्चिन्तयामास–'मया पूर्वं निर्जितेन त्यक्तपयोनिधिना दुरात्मनाऽनेन कालियेनेयं सर्वाऽपि यमुना दूषिता। गोपैर्गोधनैश्च तृषार्तैरपि नोपयुज्यते। तदस्य नागराजस्य मया निग्रहः कर्तव्यः, येन व्रजवासिनो निर्भया यमुनां सेविष्यन्ते। उत्पथगामिनां शासनार्थमेव ममावतारः' इति। एवं विचिन्त्य गाढं परिकरं बद्ध्वा महता वेगेन सर्पराजस्य ह्रदे स निपपात। तेन च महाह्रदोऽत्यर्थं चुक्षोभ। महोग्रविषज्वालातप्ताम्बुसिक्तास्तीरपादपाः सद्यो ज्वालाव्याप्तदिगन्तरा जज्वलुः। ततः कालिन्दीगतमहाभैरवह्रदमध्यप्रविष्टः कृष्णः प्रचण्डतरं भुजदण्डमास्फोटयामास॥

अभूतपूर्वं कठोरध्वनिमाकर्ण्याताम्रनयनो, दुष्टविषज्वालाकुलैः फणैरावृतः, महाविषैश्चान्यैरुरगैः परिवृतः, प्रकम्पिततनुक्षेपचलत्कुण्डलकान्तिभिर्हारिहारोपशोभिताभिः परःशताभिर्नागपत्नीभिरनुसृतः, नागराजोऽपि सहसा सलिलात्सवेगमुदसरत्। एते सर्वे भोगबन्धनं प्रवेश्य कृष्णं विषज्वालाकुलैर्मुखैर्ददंशुः॥

तीरस्था गोपाः सर्पभोगनिपीडितं तं दृष्ट्वा शोकाकुला व्रजमुपागम्य चुक्रुशुः—'भो भो व्रजौकसः, आगच्छत आगच्छत। त्वरध्वम् त्वरध्वम्। एष कृष्णः कालियह्रदे मग्नः। भक्ष्यते सर्पराजेन। परित्रायध्वम् परित्रायध्वम्'॥

इति तेषां वज्रपातोपमं वचः श्रुत्वा नन्दादयो गोपा

यशोदाप्रमुखाश्च गोप्यस्त्वरितत्वरिता ह्रदं जग्मुः। तत्र ते सर्पराजवशं गतं निःप्रयत्नं कृष्णं दृष्ट्वेतिकर्तव्यतामूढा अजायन्त॥

नन्दगोपः 'हा पुत्र, क्वासि? देहि मे प्रतिवचनम्'—इत्युच्चार्य भूमौ निःसंज्ञः पपात। यशोदा च दूरादेव पुत्रमुखे दृशौ विन्यस्य चित्रार्पितेवावतस्थे। अन्यास्तपस्विन्यो गोप्यः शोककातरा रुरुदुः। सगद्गदं च प्रोचुः—'वयं सर्वा अत्र महाह्रदे विशामः। कृष्णं विहाय कथं वा व्रजे गम्यते? विना चन्द्रेण का निशा? विना वृषेण का गावः? विना कृष्णेन को व्रजः?'॥

इति करुणं गोपीवचः श्रुत्वा रौहिणेयेनावतारप्रयोजनं संस्मारितः कृष्णः स्मितभिन्नोष्ठसंपुट आस्फोट्य भोगबन्धनात्स्वदेहं मोचयामास। उभाभ्यां हस्ताभ्यां मध्यमं फणमानतं कृत्वा तदुपर्युरुविक्रमो ननर्त। कृष्णस्याङ्घ्रिनिकुट्टनैः कालियफणे व्रणा अभवन्। कृष्णस्य नृत्यलीलाभ्रमणेनाचिरादेव नागराजो मूर्च्छामुपययौ। दण्डपातनिपातेन च बहुरुधिरं ववाम॥

तदवस्थं प्राणनाथं दृष्ट्वा नागपत्न्यो भगवन्तं शरणं जग्मुः। 'जगत्स्वामिन्, प्रसादं कुरु। भर्तृप्राणाः स्त्रीणां जीवितम्। तद्भर्तृभिक्षां प्रदातुमर्हसि'—इति ताभिः प्रार्थितः, 'भगवन् देवदेवेश, क्षम्यताम् क्षम्यताम्। यन्मया दौरात्म्यमाश्रीयते स सर्पजातिस्वभावस्यैवापराधः। न मम। यथाऽहं भवता सृष्टस्तथैवाऽहं वर्ते'—इति कालियेन च प्रयाचितो भगवान् यशोदानन्दनः, 'सर्प, न कदाचिदत्र यमुनाजले स्थेयम्। त्वं सभृत्यपरिवारः समुद्रं व्रज। तव मूर्धनि मत्पदाङ्कं दृष्ट्वा न त्वां गरुडः प्रहरिष्यति'—इत्युक्त्वा सर्पराजं मुमोच॥

प्रसन्नवदनाम्बुजः कृष्णो ह्रदमध्यात्तीरप्रान्तमुपागमत्। सर्वे मृत्योर्मुखात्प्रच्युतमिवाच्युतं मन्यमाना दृढं परिष्वज्य, तं

मूर्धनि नेत्रजैर्जलैः सिषिचुः। ततो नन्दयशोदादयः कृष्णसनाथा आनन्दभरमन्थरा मन्दं मन्दं वव्रजुः॥

अन्यस्मिन्नहनि रामकृष्णौ गाः पालयन्तौ रम्यं तालवनं जग्मतुः। तत्र किल मृगमांसकृताहारः खराकृतिर्धेनुको नाम दानवो निवसति स्म। तत्तालवनं पक्वफलसंपत्समन्वितं दृष्ट्वा फलोपभोगस्पृहावन्तो गोपास्तावब्रुवन्—'हे राम, हे कृष्ण, यतोऽयं भूप्रदेशो धेनुकेन रक्ष्यते, तत एवेमानि फलानि पक्वान्यवतिष्ठन्ते। वयं तान्यत्तुमभीप्सामः। पात्यन्तां यदि रुच्यते' इति॥

रामकृष्णौ च तथेति यथाकामं तालफलानि पातयामासतुः। फलपतनशब्दं च समाकर्ण्य दुरासदो दैतेयगर्दभः कोपाद्धावन्नाजगाम। पश्चिमाभ्यां पादाभ्यां स बलरामं जवेनोरसि जघान। रामोऽपि पादाभ्यां गृहीत्वाऽम्बरे भ्रामणेनैव गतजीवितं तं तालवृक्षोपरि चिक्षेप। तालाग्रान्निपतन् खरः परोपकारीव सुबहूनि फलानि पृथिव्यां पातयामास। तद्दिनादारभ्य तस्मिंस्तालवने गावो निराबाधा अभुक्तचरं नवसस्यं सुखं चेरुः॥

एवं धेनुकदैतेयं हत्वा जातहर्षौ तौ भाण्डीरवटमागतौ। तत्र क्ष्वेडमा[1]नौ प्रगायन्तौ वृक्षारोहक्रीडापरौ दूरान्नामभिर्व्याहृत्य गाश्चारयन्तौ निर्यो[2]गपाशस्कन्धौ वनमालाविभूषितौ तौ बालशृङ्गाविवर्षभौ शुशुभाते॥

महाबलौ तौ स्यन्दोलिकाभिर्नि[3]युद्धैः क्षेपणीयैश्चाश्मभिर्व्यायामं चक्रतुः। उभयो रममाणयोर्गोपवेशतिरोहितः प्रलम्बाख्योऽसुर आययौ। गोपैः सह क्रीडाव्याजेन कृष्णं रौहिणेयं

---

[1] सिंहवन्नदन्तौ. [2] निर्योगाः पादबन्धनरज्जवः. [3] गोपहस्तमयदोलारोहणैर्वृक्षशाखादिमद्दोलाक्रीडाभिर्वा.

च हन्तुं मनोरथं चक्रे। सर्वे गोपबालका हरिणाक्रीड[1]नं नाम बालक्रीडनकं कुर्वन्तो द्वौ द्वौ युगपदुदपतन्। श्रीदाम्ना सह गोविन्दः प्रलम्बेन च सह बलरामः पुप्लुवतुः। ततः कृष्णः श्रीदामानं बलरामश्च प्रलम्बं व्यजयत। कृष्णपक्षीयैर्गोपैरन्यपक्षीयाः पराजिताः। ते स्कन्धेन जेतॄनवहन्।

प्रलम्बस्तु सङ्कर्षणं शीघ्रं स्कन्धेनोत्क्षिप्य निर्जगाम। बलघातोद्यतः स तद्भारमसहमानो महाकायो बभूव। सङ्कर्षणस्तु दग्धशैलोपमेन तेनात्मानं नीयमानं दृष्ट्वा कृष्णमाचुक्रोश—'कृष्ण, कृष्ण, केनाप्यनेन गोपालरूपेण दैत्येन ह्रिये। त्रायस्व त्रायस्व' इति। रक्षार्थमाहूयमानः कृष्णो विहस्य 'सत्यमेव किं त्वया मानुषो भावोऽवलम्ब्यते? स्वस्वरूपं स्मर दानवं जहि'—इति तं प्रत्यभाषत॥

तदानीमेवान्य इव बलरामः प्रलम्बं मूर्ध्नि मुष्टिना प्रजहार। तेन प्रहारेण तस्य लोचने बहिर्याते। निष्कासितमस्तिष्कः प्रलम्बो मुखाच्छोणितमुद्वमन्महीपृष्ठे निपपात॥

अथ शरत्काले संप्राप्ते शक्रोत्सवलालसान् गोपान् दृष्ट्वा कृष्णो गोपवृद्धान् कुतूहलात्पप्रच्छ—'आर्याः, कोऽयं शक्रमहो नाम?' इति। सादरं पृच्छन्तं तं नन्दगोपः प्राह—'वत्स, मेघानां पयसां चेशो देवराजः शक्रः। तेन संचोदिता मेघा जलं वर्षन्ति। तेन सस्यानि प्ररोहन्ति। इमा गावः क्षीरवत्यो वत्सवत्यश्च भवन्ति। यत्र वृष्टिमन्तो मेघा दृश्यन्ते तत्र वत्स कथयामि, नासस्या नातृणा भूमिर्भवति। न तत्र दुर्भिक्षवार्ताऽपि। तस्माद्गतायां प्रावृषि सर्वे राजानः सर्वेऽपि मनुजा महैः सुरेशमर्चन्ति'॥

इति नन्दवचनं श्रुत्वा दामोदरः पितरमाह—'तात, न वयं

[1]उत्प्लुत्योत्प्लुत्य गमनम्। यत्र द्वयोः सहोत्प्लुतयोर्यः पुरतो याति स जेता। यत्र च जितो जेतारं वहति उत्प्लुतिस्थानं च नयति।

कर्षका नापि वणिजः। वयं तावद्वनचराः। गावोऽस्माकं दैवतम्। यदेव नर उपजीवति तदेव तस्य दैवतम्। तदेवार्चनीयम्। एकस्य फलमश्नन्नपरं पूजयन्मानवो न क्वचिच्छोभनमाप्नोति। कृष्यन्ताः सीमाः, सीमान्तं वनं, वनान्ताश्च गिरयः। त एवास्माकं गोपानां परमं दैवतम्। प्रसिद्धमेवैतद्यथा चक्रचारिणो गोपाः सुखिनस्तथा न द्वारबन्धावरणा नागरिकाः। न वा गृहक्षेत्रिणो ग्रामवासिनः। तात, श्रूयते किल यथाऽमी गिरयोऽस्मिन्वने स्वेषु सानुषु तत्तद्रूपमास्थाय कामरूपिणो रमन्ते। काननौकसां हिंसकान् सिंहादिरूपैः हिंसन्ति। तस्माद् गिरियज्ञो गोयज्ञश्च प्रवर्त्यताम्। किमस्माकं महेन्द्रेण। वणिजः कर्षकाश्च शक्रमहं कामं कुर्वन्तु। अयमस्माकं गवां वर्धयिता गोवर्धनो गिरिर्विविधार्हणैर्यथाविधि मेध्यं पशुं हत्वा पूज्यताम्। सर्वघोषस्य संदोहो गृह्यताम्। विप्राः शतशो भोज्यन्ताम्। गोगणाश्च शरत्पुष्पैरलङ्क्रियन्ताम्'॥

इति कृष्णवचः श्रुत्वा नन्दाद्या व्रजौकसः प्रीत्युत्फुल्लमुखाः 'साधु साधु'—इति समावदन्। 'वत्स शोभनं ते मतम्। भवदुक्तं करिष्यामहे'—इति तमभिनन्द्य गिरियज्ञसंभारसाधनकर्मणि ते प्रवृत्ता बभूवुः॥

आत्ममहं प्रतिहत्य गिरियज्ञं व्रजौकसश्चक्रुरित्युपलभ्य क्रोधारुणितलोचनः शतक्रतुः संवर्तकं नाम तोयदगणं, 'कृष्णबलाध्मातानां गोपहतकानां गा वृष्टिवातेन पीडयत'—इत्यादिदेश। ततः क्षणेन महाभीमं प्रचण्डध्वनिं वातवर्षं विनाशाय बलाहका ववर्षुः। धारासारमहापूरणेन धरणी ककुभोऽम्बरं चाभिन्नतामवापुः। विद्युल्लताकशाऽऽघातत्रस्तैरिव नादापूरितदिक्चक्रैर्घनैर्घना वारिधारा विसृष्टाः। घनाघनैरन्धकारीकृते लोकेऽधश्चोर्ध्वं च तिर्यक् च जगदाप्यमिवाभवत्। काश्चिद् गावः

वातवर्षधूताः सन्नात्रिकसक्थिशिरोधराः प्राणाञ्जहुः। काश्चिदन्या वत्सान् क्रोडेनाक्रम्य तस्थुः। काश्चिच्चापरा वारिपूरेण विवत्सा भूत्वा चक्रन्दुः॥

तत्सर्वं गोकुलं गोपजनविमुक्तहाहाकारानिनादितमतीवार्तं दृष्ट्वा हरिरचिन्तयत्—'आं ज्ञातम्। महाभङ्गविरोधिना महेन्द्रेणैतत्कृतम्। तदेतदखिलं गोष्ठमधुना मया त्रातव्यम्। अद्रिमुत्पाट्य पृथुच्छत्रमिव गोष्ठस्योपरि धारयिष्यामि' इति॥

एकेन करेण गोवर्धनमुत्पाट्य भगवान् गोपालो लीलया धारयामास। 'गोपाः, गोधनैः सह वत्सैः सह शकटारोपितभाण्डादिभिश्च सह निःशङ्कमत्र प्रविशत'—इत्युक्तास्ते गोपाः शैलतलं सिषेविरे। सप्तरात्रं महामेघा ववर्षुस्तथापि गोपानक्षतान् ज्ञात्वा मिथ्याप्रतिज्ञो देवेन्द्रस्तान्घनान् वारयामास। पुनरपि गोपा गोकुलं जग्मुः। कृष्णोऽपि विस्मितमुखैर्गोपालैर्दृश्यमानो गोवर्धनं स्वस्थाने स्थापयामास॥

गोवर्धनधरं गोपालं दिदृक्षुर्महेन्द्रो महीमवततार। गोपकुमारकर्वृतं गाश्चारयन्तमदृश्येन च गरुडेन पक्षाभ्यां कृतच्छायं भगवन्तमुपगम्यैकान्ते शक्रः सस्मितमुवाच–'प्रभो, क्षन्तव्योऽस्मि। महभङ्गरोषितेन मयैतदाचरितम्। तथापि महागिरिमुत्पाट्य गावस्त्राताः। अद्भुतेन ते कर्मणा जानामि यद्भूभारावतारणार्थं परमेश्वरोऽवतीर्णोऽसीति। त्वया त्राताभिर्गोभिः प्रचोदितस्त्वां गवामिन्द्रत्वे—गोविन्दत्वे-परथा मुदाऽभिषिञ्चामि। भगवन्, अभिषेकस्वीकारेण गावोऽनुगृह्यन्ताम्। अपरं चैतद्विज्ञाप्यते यन्मदंशोऽर्जुनो नामेहावतीर्णोऽस्ति स कृपया रक्षणीयः' इति। तथेति कृष्णेनाभिनन्दितो देवराज आत्मानं कृतकृत्यं मन्यमानो दिवमारुरोह॥

३. रासक्रीडा

विमलं व्योम, प्रसन्नां शरच्चन्द्रचन्द्रिकां, प्रफुल्लां कुमुदिनीं कूजद्भृङ्गमालां च वनराजिं विलोक्य किशोरावस्थां प्राप्तः कृष्णो गोपीभिः सह क्रीडां कर्तुं मनश्चक्रे । स च वनिताप्रियमतीवमधुरं नानातन्त्रीकृतव्रतं कलपदं जगौ । रमणीयं गीतस्वनमाकर्ण्य संत्यक्तावसथा गोपवनितास्त्वरिता गानस्वरदिगनुरोधेन मनोमोहनमाजग्मुः ॥

काचिच्छनैःशनैस्तल्लयानुगुणं गायति । काचित्तमेव मनसा स्मरन्ती दत्तावधाना तिष्ठति । काचित्कृष्ण कृष्णेति वदन्ती लज्जामुपयाति । काचित्प्रेमान्धा त्रपामपसार्य तत्पार्श्वमुपगच्छति । काचिद्बहिर्गुरून् दृष्ट्वा गृह एव निमीलितलोचना गोविन्दं तन्मयत्वेन ध्यायति ॥

गोपीपरिवृतो गोविन्दो रासारम्भरसोत्सुकः शरच्चन्द्रमनोरमां रजनीं संमानयामास ॥

कतिचिद् गोप्यो देशान्तरगतं नन्दकिशोरमन्वेष्टुं वृन्दावन इतस्ततश्चेरुः । कृष्णचेष्टाऽऽयत्तमूर्तयस्तास्तदा परस्परमूचुः—

'सखि, पश्य कृष्णोऽहमेषा संजाता । ललितं व्रजामि' इति ।

'सहचरि, कृष्णस्य मम गीतिं शृणु' इति ।

'दुष्ट कालिय, तिष्ठ तिष्ठ । आगतोऽस्म्यहं कृष्णः । दर्पं तेऽपनयामि' इति ॥

'भो भो गोपाः, निःशङ्का भवत । अलं वृष्टिभयेन । धृत एव मया गोवर्धनः' इति ॥

'अयं धेनुको मया क्षिप्तः । अधुना विचरन्तु गावो यथेच्छम्' इति ॥

कतिचिद्गोप्यस्तं मृगयमाणा व्यग्रतां जग्मुः । एका पुलकाचितसर्वाङ्गी विकासिनयनोत्पला भुवं विलोक्य सखीं प्राह 'आलि, पश्य पश्य लीलाऽलङ्कृतगामिनः कृष्णस्य ध्वजवज्राङ्कुशरेखावन्ति पदान्येतानि । ध्रुवं, तेन सह काऽपि कृतपुण्या गता भवेत् । यत एतान्यल्पानि घनानि च पदानि दृश्यते । पश्य, अत्र निःसंदेहं दामोदरः पुष्पावचयमकरोत् । यत इमानि पदान्यग्राक्रान्तिमात्राण्यालक्ष्यन्ते । इत एहि । तेनात्र सा पुष्पैरलङ्कृता भवेत् । यतः कुसुमान्याकीर्णानि समीक्ष्यन्ते' इति ॥

अपरा प्राह—'सख्यः, पश्यत, अनेनैव मार्गेण नन्दसुतो यातः । तदनुसरणासमर्था नितम्बभरमन्थरा काचिन्निम्नपादाग्रसंस्थितिर्गच्छन्ती दृश्यते' इति ॥

अन्योवच—'हला सेयं तेन सह हस्तन्यस्ताग्रहस्ता चलाति स्म । पदपद्धतिर्हि अनायत्तपदन्यासा लक्ष्यते' इति ॥

इतरा बभाषे—"अत्र किल धूर्तेन हस्तस्पर्शमात्रं कृत्वाऽवज्ञयैषा परित्यक्ता भवेत् । यतः नैराश्यमन्दगामिन्यास्तस्याः पदं निवृत्तमवलोक्यते । इतः कृष्णो गहनं प्रविष्टो विभाव्यते । यतोऽत्र पदपङ्क्तिर्दर्शनगोचरा न भवति । अस्मिन्दृश्यमाने गहने भगवतः शीतांशोरपि पादा न प्रविशन्ति, किमुतास्माकम् । तन्निवर्तयिष्यामहे' इति ॥

एवं कृष्णदर्शने निराशास्ताः सर्वा व्रजाङ्गना निवृत्ता यमुनातीरमागत्य कृष्णचरितं गातुमारेभिरे ॥

ततो गोप्यो विकासिमुखपङ्कजास्त्रैलोक्यगोप्तारं गोविन्दमायान्तं ददृशुः । काचिदतिहर्षिता कृष्ण कृष्णेत्येवावदत् । काचित्सभ्रूभङ्गं कृष्णमुखपङ्कजं नेत्रभृङ्गाभ्यां पपौ । काचिच्च निमीलितविलोचना कृष्णरूपं ध्यायन्ती योगारूढेव तस्थौ ॥

माधवः काश्चित्प्रियालापैः काश्चिद्भ्रूभङ्गवीक्षितैः काश्चिच्च करस्पर्शेन चानुनिनाय ॥

भगवान् हरिस्ताभिः प्रसन्नचित्ताभिर्गोपीभिः सह सादरं रासगोष्ठीभी रेमे । तदा कृष्णपार्श्वमनुज्झतैकस्थानस्थिरात्मना गोपीजनेन रासमण्डलबन्धोऽप्यशक्योऽभवत् । एकैकां गोपिकां करस्पर्शेन निमीलितदृशं कृत्वा हरी रासमण्डलीं निर्ममे ॥

ततश्चलद्वलयनिःस्वनानुयातशरद्गीतिमनोरमो रासः प्रववृते । कृष्णः शरच्चन्द्रमसं जगौ, कौमुदीं जगौ, कुमुदाकरं जगौ, गोपीजनस्तु एकं कृष्णनामैव पुनः पुनर्जगौ । एका वलयमुखरां बाहुलतां परिवर्तनश्रमव्याजेन स्कन्धे दत्तवती । गोपीकपोलसंश्लेषं प्राप्य हरेर्भुजौ पुलकाङ्कुरोद्गमायेव स्वेदाम्बुघनतां गतवन्तौ । गते गच्छन्त्यो वलिते संमुखं यान्त्यो गोपिकाः प्रतिलोमानुलोमाभ्यां हरिं भेजिरे ॥

अनेन क्रमेण भगवांस्तासु तासु क्षपासु कैशोरकवयः [1]संमानयन्नात्मनिष्ठाभिर्गोपाङ्गनाभी रासक्रीडां समाद्रियत ॥

एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ।

४. कंसवधः

(ततो हाहाकृतं सर्वमासीत्तद्रङ्गमण्डलम् ।)

एकदा नारदः कंसमुपेत्य कथयामास—'राजन्, योऽसौ कृष्ण इति श्रूयते स देवक्या एवाष्टमो गर्भः । तं जातमात्रं वात्सल्याद्रात्रावेव सुगुप्तं गृहीत्वा नन्दभार्याया यशोदायाः पार्श्वे निधाय, तस्याः कन्यां सपदि स्वस्थानं वसुदेव आनिनाय ।

[1] तद्वयोवस्थोचितंचापलमनुकुर्वन् ।

तेनैव कृष्णेन पूतनादयः कालवशं नीताः। संप्रति च रासक्रीडावसरप्राप्तो वृषभाकृतिररिष्टोऽपि शृङ्गमेकमुत्पाट्य तेनैव निहतः' इति ॥

एतन्नारदवचनमाकर्ण्य कंसो वसुदेवं प्रति महान्तं क्रोधमकरोत्। सर्वयादवसंसादि तमुपालभत। सर्वांश्च यादवाननिन्दत् ॥

'यावदेतौ रामकृष्णौ न बलमारूढौ, तावदेव तौ मुष्टिकचाणूरद्वारा मल्लयुद्धेन निहनिष्यामि'—इति विचिन्त्य धनुर्महमहायागापदेशेन तावानेतुं यदुपुङ्गवं श्वफल्कतनयमक्रूरं कंसो नन्दगोकुलं प्रेषयामास ॥

अत्रान्तरे कंसदूतप्रणोदितं बलोदग्रं केशिनं गोपीत्रस्तनेत्रैकभाजनं केशवो मुष्टिघातं जघान ॥

कंसनिदेशमनुवर्तमानो मथुराया निष्क्रम्य नन्दगोकुलं प्रयास्यन्नक्रूरश्चिन्तयामास—'अद्य मे सफलं जन्म। अद्य मे सुप्रभाता रजनी, यद्विष्णोरुन्निद्राब्जपत्राक्षं मुखमवलोकयिष्यामि। अद्य मे नेत्रे तद्दर्शनेन कृतार्थे भविष्यतः। यस्य स्वरूपं ब्रह्मादयो न जानन्ति स भगवान् हंत! ममाङ्गं स्प्रक्ष्यति। मया सहाऽऽलापं करिष्यति। धन्योऽस्मि कृतकृत्योऽस्मि' इति ॥

भक्तिनम्रोऽक्रूरः किंचित्सूर्ये विराजति गोकुलं प्राप्तः। वत्समध्यगतस्य हरेश्चरणौ, 'अक्रूरोऽस्मि' इति शिरसा ननाम। कृष्णोऽपि करकमलेन संस्पृश्याऽऽकृष्य च प्रीत्या तं गाढं परिषस्वजे। ततो भुक्तभोज्यः सुखासीनोऽक्रूरो रामकृष्णाभ्यां सह गोष्ठीरसमनुभवन् हर्षस्य परमां सीमामवाप ॥

अथानिच्छन्नपि, यथा कंसेन वसुदेवो निर्भर्त्स्यते, यथा देवी देवकी दुरात्मना क्लेश्यते, यथा चोग्रसेनः क्रूरेण प्राण-

संशयमापाद्यते, यं चार्थमुद्दिश्य दुराशयेन स्वयं विसृष्टस्तत्सर्वं केशिसूदनायाक्रूरो न्यवेदयत् ॥

'अक्रूर, चिन्तां कर्तुं नार्हसि। अहं रामश्च त्वया सह श्वो मथुरां यास्यावः। नानाविधमुपायनमादाय गोपवृद्धा अप्यागमिष्यन्ति। त्रिरात्राभ्यन्तरे सानुगं कंसं हनिष्यामि'— इति कृष्णस्तं सान्त्वयामास ॥

अथ प्रभातेऽक्रूरेण सह मथुरां गन्तुमुद्यतौ रामकृष्णौ दृष्ट्वा गोपीजनः सास्रोऽतिदुःखार्तो निःश्वस्य प्रोवाच—'मथुरां प्राप्यास्माकं गोविन्दो गोकुलं कथं प्रत्येष्यति। तत्र स नागरस्त्रीकलालापमधु श्रोत्रपुटेन पास्यति। सकृद् विलासिनागरीवचनसुधापानेषु कृतास्पदमस्य चित्तं ग्राम्यगोपीष्वस्मासु कथं भूयो रंस्यते। समस्तगोष्ठस्य सारभूतं हरिं हरता निर्घृणेन विधिना गोपयोषित्सु महान्प्रहारः कृतः। नागरीणां विलासनिगडैर्निगडितोऽयं पुनरस्माकं पार्श्वं कया रीत्याऽऽयास्यति। एष एष रथमारुह्य माधवो मथुरां प्रयाति। क्रूरेणाक्रूरेणायं प्रतारितः। किमयं नृशंसोऽक्रूरोऽस्माकमनुरागं न वेत्ति येनाक्ष्णोराह्लादमन्यत्रापनयति। एषोऽत्यन्तनिर्दयो गोविन्दोऽस्मान्परित्यज्य प्रचलितः। अस्य वारणाय त्वरामहे। किं ब्रवीषि? एवं गुरूणामग्रतो वक्तुमनुचितम् इति विरहाग्निना दग्धानामस्माकं गुरवः किं करिष्यन्ति? हा धिक्! न कश्चिदपि गोविन्दविनिवर्तनायोद्यमं कुरुते। वयं तावद् हताः। मथुरायोषितां तु सुप्रभाताऽद्य रजनी। यासां नेत्रालिपङ्क्तयोऽच्युतवक्त्राब्जं धास्यन्ति। को नु स्वप्नः सुभाग्याभिस्ताभिर्दृष्टो भवेद्येन ता नयनमनोहरमनिवारितं द्रक्ष्यन्ति। हरेरनुरागेण सहास्माकं करयोर्वलयान्यपि शैथिल्यमुपयान्ति। पश्यत पश्यत क्रूरहृदयोऽक्रूरो हयान् शीघ्रं प्रेरयति। एवमार्तासु योषित्सु निर्घृणादृते कस्य

घृणा न जायते? हा! हा! कृष्णरथस्य गगनगतैश्चक्ररेणुर्नैरीक्ष्यताम्। हा कष्टम्! येन हरिर्दूरीकृतः स रेणुरपि न दृश्यते' इति॥

रामाक्रूरजनार्दना जविताश्वेन रथेन मध्याह्नसमये यमुनातटं प्राप्ताः। तत्र स्नानादि निर्वर्त्य वातरंहसो हयान् शीघ्रं नोदयित्वाऽतिसायाह्ने मथुरां पुरीमायाताः। तदाऽक्रूरो रामकृष्णवाह—'युवामुभौ पद्भ्यां यातम्। अहमेको रथेन नगरीं प्रविशामि। भवद्भ्यां वसुदेवगृहं न गन्तव्यम्। युवयोरेव हि कृते स वृद्धः कंसेनाऽऽक्षिप्यते' इति॥

अनन्तरं रामकृष्णौ मथुरां प्रविश्य राजमार्गमुपागतौ। स्त्रीभिर्नरैश्च लोचनाभ्यां सानन्दं वीक्ष्यमाणौ तौ दृप्तौ बालगजाविव लीलया जग्मतुः। रुचिराननौ तौ रङ्गकारकं रजकं दृष्ट्वा सुरूपाणि वासांस्ययाचेताम्। स कंसस्य रजकस्तयोर्बहून्याक्षेपवाक्यान्यवदत्। ततः कृष्णस्तलप्रहारेण दुरात्मनो रजकस्य शिरो भुवि पातयामास। स्वयं च नीलपीताम्बरौ भूत्वा मालाकारगृहमागत्य कृतवन्दनात्तस्माच्चारूणि पुष्पाणि स्वीकृत्याऽऽत्मानमलंचक्राते॥

ततो राजमार्गे सानुलेपनभाजनां नवयौवनगोचरां कुब्जामायान्तीं कृष्णो ददर्श। तां च सस्मितमाह—'इन्दीवरलोचने, कं प्रतीदमनुलेपनं नीयते'? इति। तद्दर्शनमात्रजातानुरागा सा ललितं जगाद—'कान्त, कंसमहाराजं प्रति। अन्यपिष्टं ह्यनुलेपनं तस्य प्रीतये न भवति। तथाऽपि यदि भगवते रोचते तदेदं मया प्रेमभरेण समर्प्यते' इति॥

अथ सोभयोर्गात्रेष्वनुलेपनं चक्रे। कृष्णोऽप्युल्ला[1]पनाविधानविदग्रपाणिना चिबुक उत्तोल्य पद्भ्यां च पादयोराकृष्य ताम्-

[1] ऋजूकरणप्रकारज्ञः.

जुतामनयत्। तदा सा योषिद्वरा प्रेमगर्भविलासवचनैस्तं स्वगृहमागन्तुं प्रार्थयामास। 'भद्रे, आत्मकृत्यं समाप्यावश्यं तव मन्दिरमायास्यामि'—इति तामुक्त्वा रामेण सह भक्तिच्छेदानुलिप्ताङ्गो भगवान् धनुःशालामाससाद॥

तत्रत्यं धनूरत्नमादाय कृष्णोऽपूरयत्। बलात्पूर्यमाणं तद्धनुर्महाशब्दं चकार। येनाखिला मथुरा दुमदुमायिता। तं धनुर्भङ्गवृत्तान्तं रक्षिमुखादुपश्रुत्य कंसो मल्लयुद्धेन रामकृष्णौ हन्तुं चाणूरमुष्टिकावादिदेश। हस्तिपं चाऽऽहूय समाजद्वारि कुवलयापीडं नाम कुञ्जरं स्थापयितुं, तेन च युद्धार्थं रङ्गद्वारमुपागतौ तावुभौ घातयितुमाज्ञापयामास॥

यथाऽऽदिष्टं सर्वान् मञ्चानुपाकृतान दृष्ट्वाऽऽसन्नमरणः कंसः सूर्योदयं प्रत्यैक्षत। राजमञ्चेषु महीभृतोऽमात्यैः सहाऽऽसांचक्रिरे। इतरेषु मञ्चेषु च नागरिका उपाविविशुः। रङ्गमध्यसमीपगतान् मञ्चान् मल्लप्राश्निका[1] अध्यारुरुहुः। एकतोऽन्तःपुराणामन्यतो वारमुख्यानामितरतश्च नागरयोषितां मञ्चा व्यवस्थापिता आसन्। अक्रूरवसुदेवौ तु मञ्चप्रान्ते निषेदतुः। तपस्विनी देवकी नागरयोषितां मध्ये 'अन्तकालेऽपि पुत्रमुखं द्रक्ष्यामि'—इत्यवतस्थे॥

वाद्यमानेषु तूर्येषु महाराजः कंसः सपरिवार आगत्य राजपुरुषैरभिनन्द्यमानस्तुङ्गमञ्चासनमलंचकार॥

ततो रङ्गकार्यं प्रावर्तत। चाणूरः सदर्पं वल्गति स्म। मुष्टिकः सोत्प्रासमास्फोटयति स्म। तदा सर्वेषां जनानां हाहाकारेण दश दिशो निनादिताः। बाह्यप्रदेशादपि कोऽपि प्रचण्डः कोलाहलोऽऽश्रूयत॥

'किमिदं! किमिदम्'!—इति ससंभ्रममुत्प्रेक्षमाणेषु सामा-

---

[1] मल्लयुद्धेषु युक्तायुक्तपरीक्षकाः.

जिकेषु गर्वलीलाऽवलोकितौ केसरिकिशोराविव मदासृगनुलिप्ताङ्गौ बलभद्रजनार्दनौ रङ्गं प्राविविशतुः॥

'कुवलयापीडं गजराजं तावद् हत्वेमौ पुरुषप्रकाण्डौ रङ्गं प्रविष्टौ'—इत्येक एव ध्वनिः पौरजनेषु परिवर्तते स्म। कृष्णमुखदर्शनसमकालमेव देवक्याः स्नेहस्नुतपयोधरमुरस्तताप। पुत्राऽऽननं महोत्सवमिवासाद्याभ्यागतां जरां विहाय वसुदेवो युवेवाभूत्। राजान्तःपुरयोषितां नागरस्त्रीणां च समूहो विस्तारिताक्षियुगलस्तं द्रष्टुं न विरराम॥

तदा पुरस्त्रियः परस्परमूचुः—

'सख्यः, अरुणेक्षणं गजयुद्धकृताऽऽयासं स्वेदाम्बुकाणिकाचितं कृष्णस्य मुखं पश्यत। यत्खलु अवश्यायजलोक्षितं विकासिशरदम्बुजं परिभूय स्थितमिव दृश्यते। तद्विलोकनेन दृशौ कृतार्थयत'॥

'भामिनि, एतस्य श्रीवत्साङ्कं बिपक्षक्षपणं वक्षो भुजयुग्मं च विलोकय। अयि, किं न पश्यसि कुन्देन्दुमृणालधवलाऽऽननं बलभद्रमिमम्'?

'स्निग्धे, चाणूरमुष्टिकयोर्वल्गतोर्बलरामस्येषद् हास्यं प्रेक्षस्व'।

'सख्यः सख्यः, पश्यत नियुद्धार्थमयं प्रगल्भश्चाणूरो बालं कृष्णं समुपैति। असाम्प्रतिकमेवैतत्। क्व यौवनोन्मुखीभूतः कुसुमसुकुमारतनुर्हरिः? क्व चायं तारुण्यशिखरारूढो वज्रकठिनशरीरश्चाणूरः? न किं सन्त्यत्र युक्तकारिणो वृद्धाः? नियुद्धप्राश्निकानां कोऽयं व्यतिक्रमो यद् बालबलिनोर्युद्धमुपेक्ष्यते'॥

रङ्गमध्ये भगवान् हरिश्चाणूरेण नियुयुधे। सन्निपाता[1]वधूतैः क्षेपणैर्मुष्टिभिः कीलवज्रनिपातैर्जानुभिरश्मनिर्घातैर्बाहुविघट्टितैः पादोद्धूतैः प्रसृष्टैश्च[2] युद्धं प्रावर्तत। यावद्यावच्चाणूरो

[1] परस्परसंश्लेषैरवाक्पातैश्च। [2] सर्वावयवसंश्लेषेण पिण्डीकरणैः।

हरिणा सह युयुधे तावत्तावल्लवाल्लवं प्राणहानिमवाप। एकस्य बलक्षयमन्यस्य च बलवृद्धिं विलोक्य कोपपराग्रणः कंस-स्तूर्याणि वारयामास। तत्क्षणादनेकानि देवतूर्याणि सममेवा-वाद्यन्त। 'जय गोविन्द, जय कृष्ण, जहि दानवम्'—इति देवा अन्तर्हिताः सहर्षं व्याजह्रुः॥

कंचित्कालं चाणूरेण सह क्रीडित्वा मधुसूदनो शतगुणं मस्तकोपरि भ्रामयित्वा गगने गतजीवितं तं दैत्यमल्लं भूमावा-स्फोटयामास॥

इतो बलदेवोऽपि मुष्टिना मूर्ध्नि जानुना च वक्षस्याहत्य, धरापृष्ठे च पातयित्वा, मुष्टिकं गताऽऽयुषमपि निष्पिपेष॥

अन्यतः कृष्णो मल्लराजं तोसलकं वाममुष्टिप्रहारेण भूतले पातयामास॥

तदा सर्वेऽपि मल्ला रङ्गस्थानात्प्रदुद्रुवुः। कृष्णसङ्कर्षणौ तु समानवयसो गोपान् बलादाकृष्य निर्मले रङ्गे तैः सह ववल्गतुः॥

क्रोधप्रज्वलिताङ्गः कंसो व्यापृतान्नरानाज्ञापयामास—'निगृह्य-तामयं पापो नन्द आयसैर्निगडैः। शिक्ष्यतामयं वसुदेवोऽवृद्धार्हेण दण्डेन। ममापि पुरो निःशङ्कं वल्गतां गोपानां गावो ह्रिय-न्ताम्' इति॥

एवं प्रलपन्तं पापात्मानं मथुरेश्वरं मञ्चमारुह्य केशेष्वा-कृष्य जगदीश्वरो जग्राह। तस्योपरि पतता निःशेषजगदाधार-गुरुणा कंसस्तत्कालं प्राणांस्त्याजितः। मृतस्य तस्य देहं केशेषु गृहीत्वा रङ्गमध्ये महाबलश्चकर्ष। तदा रुषाऽऽयान्तं तद्भ्रातरं सुमालिनं बलभद्रो लीलयैव निपातितवान्॥

ततस्तद्रङ्गमण्डलं हाहाकारध्वानविकम्पितं बभूव। देवकी-वसुदेवयोः पादावुपसंगृह्य, 'हे अम्ब, हे तात, उत्कण्ठताभ्या-मप्यावाभ्यां कारणविशेषेण युवयोः पुण्यं दर्शनं न गृहीतम्।

मातापित्रोः पूजनं विना यः कालो याति तदायुषः खण्डं व्यर्थमेव। सर्वमिदमतिक्रमकृतं क्षन्तव्यम्'—इति रामकृष्णावूचतुः॥

अथ भगवान् वासुदेवो यदुवृद्धान् यथाक्रमं प्रणम्य, दुःखशोकपरिप्लुताश्च कंसस्य पत्नीर्मातॄश्च बहुप्रकारं समाश्वास्य, बन्धाच्च मोचयित्वोग्रसेनं निजराज्येऽभ्यषिञ्चत्॥

सिंहासनगतमुग्रसेनं हरिरुवाच—'महाराज, अविशङ्कितस्त्वामिमं भृत्यं यत्कार्यं तदाज्ञापय। यद्यपि ययातिशापादयं वंशो न राज्यार्हस्तथाऽपि साम्प्रतं मयि भृत्ये स्थिते देवानपि शासितुमर्हसि किमुत भूपालान्' इति॥

कृष्णनिदेशेन पुरंदरेण प्रेषितां सुधर्माऽऽख्यां सभां गोविन्दभुजसंश्रयाद्यदुपुङ्गवा बुभुजिरे॥

---

५. गुरुकुलवासः

(आचार्याय प्रियधनमाहर।)

यदूत्तमौ बलदेवजनार्दनौ विदिताखिलविज्ञानावपि शिष्याचार्यक्रमं ख्यापयन्ताववन्तीपुरवासिनं काश्यं सान्दीपनिमस्त्रार्थं जग्मतुः। तस्य शिष्यत्वमभ्येत्य गुरुवृत्तपरौ तावखिले जन आचारं दर्शयांचक्रतुः। सरहस्यं ससंग्रहं धनुर्वेदं चतुःषष्ट्याऽहोरात्रैरध्यैयाताम्। तयोरतिमानुषमसंभाव्यं कर्म विचिन्त्य सान्दीपनिश्चन्द्रदिवाकरौ प्राप्तौ मेने॥

प्रोक्तमात्रमशेषमस्त्रग्राममवाप्य, 'भगवन्, अभीष्टा गुरुदक्षिणा व्रियताम्'—इति तौ गुरुं प्रार्थयामासतुः। सोऽपि तयोरतीन्द्रियं कर्माऽऽलोक्य लवणार्णवे प्रभासे मृतं पुत्रमयाचत॥

ततस्तौ सान्दीपनिं प्रणम्य गुरुपुत्रप्रत्यानयनाय गृहीताज्ञौ लवणोदधिं जग्मतुः। तौ दृष्ट्वा सार्ध्यपात्रो महोदधिः सप्रश्रयमुवाच—'ईश्वरौ, न मया सान्दीपनेः पुत्रो हृतः। ममैव सलिले पञ्चजनो नाम शङ्खरूपो दैत्यो निवसति। स एव तं बालकं जग्राह' इति॥

तथोक्तौ तावन्तर्जलं प्रविश्य पञ्चजनं जघ्नतुः। तस्यास्थिप्रभवमुत्तमं शङ्खं कृष्णो हस्ते धारयामास॥

अथ तौ यमपुरीं गत्वा वैवस्वतं यमं च जित्वा यातनासंस्थं बालमाददाते। यथापूर्वशरीरिणं गुरुपुत्रं गुरवे निवेद्य परमाशिषश्च गृहीत्वा रामकृष्णौ मथुरां पुनः प्रापतुः॥

---

६. जरासन्धपराभवः

(यत्र योगेश्वरः कृष्णस्तत्रैव विजयो ध्रुवम्)

जामातुः कंसस्य वधोदन्तं श्रुत्वा मगधाधिपो जरासन्धो महाबलपरीवारः कृष्णं हन्तुमभ्याययौ। मथुरां च रुरोध। अल्पपरिवारौ रामजनार्दनौ बहिर्निष्क्रम्य सैनिकैः समं युयुधाते। चिन्तनसमकालमेवाक्षयसायकौ तूणौ शार्ङ्गं धनुः कौमोदकी गदा चाऽऽकाशादापेतुः। तानि जनार्दनो दधार। तथैवाऽऽपतितौ हलं मुसलं च बलभद्रो जग्राह॥

ससैन्यं मगधाधिपं युद्धे पराजित्योभौ वीरौ पुरीं विविशतुः।

एवमेव पुनः पुनः कृष्णपुरोगमैर्यदुभिरष्टादश संग्रामाञ्जरासन्धश्चक्रे। सर्वेष्वेतेषु युद्धेषु यादवैः पराजितः स्वल्पैः सैन्यैर्मगधराजोऽपचक्राम॥

---

७. कालयवनवधः

(मनुष्यदेहिनां चेष्टामित्येवमनुवर्तत: ।
लीला जगत्पतेस्तस्य च्छन्दतः संप्रवर्तते ॥)

गोष्ठे स्थितं गार्ग्यं तस्य श्यालो यदूनां सन्निधावनपत्यत्वात् षंडोऽसीत्युपजहास। तदा सर्वे यादवा जहसुः। स तु कोपाविष्टो यदुचक्रभयावहं सुतमिच्छंस्तपस्तेपे। द्वादशे वत्सरे तुष्टो भगवान् हरस्तस्मा अभीप्सितं वरं ददौ। तस्माद्यवनेशक्षेत्रे[1]ऽलिसन्निभ[2]: कालयवनो नाम सुतो जज्ञे ॥

कालेन स वीर्यमदोन्मत्तः 'ऋषिवर्य, पृथिव्यां के के बलिनो नृपाः'—इति नारदं पप्रच्छ। 'यादवा जगतीतले परमबलिनः'—इति नारदस्तस्मा उत्तरं ददौ ॥

म्लेच्छकोटिसहस्रपरिवृतो गजाश्वरथपत्त्योघैः समायुक्त कालयवनो दिने दिने छिन्नया[3]नोऽव्यवच्छिन्नं मथुरां पुरीं प्रययौ ॥

तस्मिन्नवसरे कृष्णश्चिन्तयामास—'यादवबलं यवनेन रणे क्षपितं चेद् मागधस्य गम्यं भविष्यति। तस्मादतिदुर्जयं दुर्गं करिष्यामि यत्र स्थित्वा स्त्रियोऽपि युध्येरन्, किं पुनर्वृष्णिवीराः। मयि प्रोषिते दुष्टा अरयो यादवाभिभवं मा कुर्युः' इति ॥

अथ गोविन्दो महोदधिं द्वादश योजनानि भूमिं ययाचे। तत्र च द्वारकां पुरीं निर्ममे। आसन्ने कालयवने मथुरावासिनं लोकं तत्राऽऽनीय जनार्दनः स्वयं मथुरां ययौ ॥

बहिरावासिते सैन्ये मथुराया निरायुधो गोविन्दो निर्जगाम। तं दृष्ट्वा बाहुप्रहरणः कालयवनोऽनुजगाम। तेनानुयातः कृष्णः कांचिद् महागुहां प्रविवेश। यवनोऽपि तां प्रविश्य

---

[1]भार्यायाम्। [2]कृष्णवर्णः। [3]अन्तराऽन्तरा श्रान्तं गजाश्वादिवाहनं त्यक्त्वा वाहनान्तरेण पूर्वमेव तत्रतत्र स्थापितेनाव्यवच्छिन्नं यथा भवति तथा ॥

कंचिच्छय्यागतं नरं कृष्णबुद्ध्या पादेन ताडयामास। तेन प्रबुद्धेन दृष्टमात्रो यवनः क्रोधजेन वह्निना तत्क्षणाद्भस्मीभूतः॥

---

८. मुचुकुन्दस्य वरप्राप्तिः

(त्वयि प्रसन्ने किमिहास्त्यलभ्यम्।)

अथ स पुरुषः पार्श्ववर्तिनं मधुसूदनं दृष्ट्वा, 'कस्त्वम्'-इत्याह। कृष्णोऽपि 'शशिनः कुले जातं यदुवंशसमुद्भवं वसुदेवतनयं मां विद्धि'—इति तं प्रत्युवाच। ततोऽसौ वृद्धगर्गवचःस्मरणेन तं विष्णोरंशं परमेश्वरं विज्ञाय प्रणिपातपुरःसरमुवाच—"प्रभो, प्रपन्नं मां मुचुकुन्दं जानीहि। पूर्वं देवासुरे युद्धे महाऽसुरान् विजित्य देवेभ्यो निद्रार्तोऽहं वरं प्राप्नवम्—'महान्तं कालं निद्रां सुखेनावाप्स्यसि। यस्त्वां संसुप्तमुत्थापयिष्यति स देहजेनाग्निना सद्यो भस्मीभविष्यति' इति। पुरा मे वृद्धगर्गेण कथितम्–'अष्टाविंशतितमे युगे द्वापरान्ते यदोर्वंशे हरेर्जन्म भविष्यति' इति। स त्वं प्राप्तोऽसि। न संदेहः" इति॥

'अहमत्यन्तविषयी मोहितस्तव मायया।
ममत्वगर्वगर्ताऽन्तर् भ्रमामि परमेश्वर॥
सोऽहं त्वां शरणमपारमीशमाद्यं
संप्राप्तः परमपरं यतो न किंचित्।
संसारभ्रमपरितापतप्तचेताः
निर्वाणे परिणतधाम्नि साभिलाषः'॥

इत्थं स्तुतो भगवान् 'यथाऽभिवाञ्छितान् दिव्याँल्लोकान् गच्छ। अव्याहतपरैश्वर्यो मत्प्रसादोपबृंहितो दिव्यान् महाभोगान् भुक्त्वा महाकुले जातिस्मरो भविष्यसि। ततो मत्प्रसादाद् मोक्षमवाप्स्यसि'—इति वरं प्रायच्छत्॥

आत्मानं कृतकृत्यं मन्यमानो मुचुकुन्दो जगदीशं प्रणिपत्य गुहामुखाद्विनिष्क्रान्तोऽल्पकान्नरान् ददर्श । कलियुगं च प्राप्तं ज्ञात्वा तपसे गन्धमादने नरनारायणस्थानं प्रययौ ॥

---

९. बलदेवस्य वृन्दावनगमनम्

(सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज)

यदा यदुकुलं सर्वथा पराभिभवनिःशङ्कं बभूव तदा ज्ञातिसंदर्शनोत्कण्ठो बलदेवो नन्दगोकुलं जगाम। यथापूर्वं गोपीश्च गोपांश्च बहुमानपुरःसरं प्रेमभरेणाभ्यवादयत। कांश्चित्तं परिषस्वजिरे। कांश्चित्स परिषस्वजे। गोपैर्गोपीभिश्च सह हास्यं चक्रे। तेऽपि हलायुधमनेकानि प्रियाण्याचख्युः ॥

काश्चिद् गोप्यः प्रेमकुपिता ऊचुरपराश्च सेर्ष्यं पप्रच्छुः—'कच्चिन्नागरीजनवल्लभोऽस्मच्चेष्टामुपहसन् सुखमास्ते? कच्चित् क्षणिकसौहृदः पुरयोषितां सौभाग्यमानमधिकं कुरुते? कच्चिन्नो गीतानुकूलं कलं स्मरति? अप्यसौ सकृदपि मातरं द्रष्टुमागमिष्यति? अथवा किं तदालापैः? अपराः कथाः क्रियन्ताम्। यथाऽस्माभिर्विना तस्य भवति तथैव तेन विनाऽस्माकं भविष्यति। वस्तुतस्तु स नामाकृतज्ञध्वजः। तत्कृतेऽस्माभिः किं न त्यक्तम्? पिता त्यक्तः; माता त्यक्ता, भ्रातरस्त्यक्ताः, पुत्रास्त्यक्ताः, किं बहुना भर्ताऽपि त्यक्तः। अपि कृष्ण इहागमनविषयमालापं करोति? कृष्ण कृष्ण, भवता नानृतं ....। बलभद्र, सत्यं वद। अस्माकं तु गोविन्दो दुर्दर्शः प्रतिभाति' इति ॥

रामेण कृष्णस्यातिमनोहरैः साममधुरैः प्रेमगर्भैः संदेशैस्ता गोप्य आश्वासिताः।

कदाचिद् वृन्दावने विचरन् बलदेवः कुतोऽप्यागच्छन्तं

मदिरागन्धमाघ्राय पुरातनं मदिरातर्षमवाप। ततोऽन्विष्यन् कदम्बवृक्षसकाशात् पतन्तीं मधुधारां वीक्ष्य परमहृष्टो बभूव। गोपैर्गोपीभिश्च समेतः स लाङ्गली कर्णेहत्य मदिरां पपौ। समन्तादुत्पन्नघर्माम्भःकणिकामौक्तिकोज्ज्वलो मधुपानमत्तः, 'यमुने, स्नातुमिच्छामि। एहि, सत्वरमेहि'—इति यमुनानदीमाचुक्रोश। यदा च पुनः पुनराहूताऽपि नाऽऽयाति तदा स मदविह्वलः क्रुद्धो भूत्वा लाङ्गलं जग्राह। 'पापे, नाऽऽयासि? नाऽऽयासि? अधुनाऽऽत्मेच्छया गच्छ। पश्यामि'—इति विब्रुवंस्तां तटे लाङ्गलेन चकर्ष। तत्कृतद्वारेण भीतेव यमुना वृन्दावनभूभागं जलैः प्लावयामास।

इत्थं मासद्वयं गोकुल उषित्वा द्वारकामागत्य च रैवततनयां रेवतीमुपयेमे।

---

१०. रुक्मिणीहरणम्

(ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।)

विदर्भविषये कुण्डिनपुरे भीष्मको नाम राजाऽऽसीत्। जरासन्धवचनगौरवात् कृष्णैकमनस्कामपि स्वकन्यां रुक्मिणीं शिशुपालाय दातुं स निश्चिकाय। विवाहार्थं जरासन्धमुखा नृपा भीष्मकपुरमाजग्मुः। बलभद्रादिभिश्च यादवैः सह कृष्णोऽपि विवाहं द्रष्टुमाययौ।

अथ रामादिषु बन्धुषु विपक्षभारमासज्य, श्वोभाविनि विवाहे रुक्मवर्णां रुक्मिणीं हरिः पश्यतां सर्वेषामपजहार।

संक्रुद्धाः शिशुपालजरासन्धदन्तवक्त्रादयश्च महीभृतस्तं रुक्मिणीहरं हन्तुं कृतमहोद्योगा अपि रामादिभिर्यदुपुङ्गवैर्निःशेषं निर्जिताः। रुक्मिणीभ्राता रुक्मी तु 'कृष्णहतकमहत्वा

कुण्डिनं न प्रवेक्ष्यामि'—इति प्रतिज्ञामारुह्य तमभिदुद्राव। किंतु चक्रिणा लीलयैवाऽऽत्मश्यालको निर्जित उर्व्यां च पातितः। हन्तुमना अपि, 'भगवन्, एक एव मम भ्राता। त्वया न हन्तव्यः भ्रातृभिक्षा मे प्रदीयताम्'—इति भ्रातृस्नेहविक्लवया रुक्मिण्या सकरुणं प्रार्थितो भगवान् प्रियासहोदरं परितत्याज। यथाप्रतिज्ञं रुक्मी भोजकटं नाम पुरं निर्माय तत्रैव न्यवसत्। कुण्डिनपुरं च न कदाऽपि प्रविवेश॥

कृष्णोऽपि द्वारकामागत्य राक्षसेन विवाहेन रुक्मिणीमुपयेमे॥

---

११. प्रद्युम्नवृत्तान्तः

(जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे विनश्यति।)

वासुदेवाद्रुक्मिण्यां मदनांशः प्रद्युम्नो जज्ञे। षष्ठेऽहनि 'ममैष हन्ता'—इति शम्बरः सूतिकागृहात्तमपहृत्य लवणार्णवे चिक्षेप॥

कदाचिन्मत्स्यबन्धा अन्यैर्मत्स्यैः सह निगीर्णप्रद्युम्नं मत्स्यमसुरवर्याय निवेदयामासुः॥

सूदानामाधिपत्ये नियुक्ता मायावती नाम सर्वगृहेश्वरी विदारिते मत्स्यजठरे दग्धस्य मन्मथतरोः प्रथमाङ्कुरमिवातिशोभनं कुमारं ददर्श। नारदवचनाविश्वस्ताऽवगतसकलवृत्तान्ता सा तं शिशुमतिरागेण पालयामास। यदा स यौवनाभोगभूषितो बभूव तदा सा तस्मिन्नतीव गाढं भावं बबन्ध। मायावती चास्मै सर्वा माया ददौ। एकदा किल कामार्ता प्रसक्तां तामवलोक्य प्रद्युम्नः प्राह—'मातृभावमपहायान्यथा किमेवं मयि वर्तसे' इति। सा प्रत्युवाच—'सुन्दर, नासि त्वं मे पुत्रः। किंतु मम प्राणवल्लभः पतिः। आत्मानं विष्णोस्तनयं विद्धि।

कालशम्बरेण समुद्रे त्वं क्षिप्त आसीः मत्स्याजीविभिरानीतस्यान्यतमस्य मत्स्यस्योदरे भाग्येन मम लब्धोऽसि। योऽयं शम्बरः स तव रिपुः। तं जहि। अचिरादेव शोकविक्लवा ते माता पुत्रमुखाम्बुजदर्शनसुखमनुभवतु' इति॥

प्रद्युम्नः क्रोधाकुलमना भूत्वा युद्धाय शम्बरं समाह्वयत्। तस्य दैत्यस्याशेषं सैन्यं हत्वा निरस्य च सर्वा अपि तन्मायाः स्वमायया तमपि कालमुखे निचिक्षेप॥

मायावत्या सार्धं प्रद्युम्नः पितुर्गृहमाजगाम। तं दृष्ट्वा कृष्णयोषितः कृष्णसंकल्पा बभूवुः। रुक्मिणी च साश्रुदृष्टिः प्रेम्णाऽवदत्—'सा खलु धन्यतमा स्त्री याऽनेन पुत्रवती भवति। वत्स, प्रद्युम्नोऽपि एवंविधः स्यात् यदि स जीवेत्। अथवा कृतं संदेहेन। यथा मयि पुत्रवात्सल्यं समुद्भवति, यथा च वपुषाऽपि तादृगेव दृश्यसे, तथाऽहं पश्यामि व्यक्तमेव त्वं हरेः पुत्रोऽसि' इति॥

एतस्मिन्नन्तरे कृष्णेन सह नारदः प्राप्तः। स हर्षयन् रुक्मिणीं प्राह—'सुभ्रु, एष ते तनयः। येनायमपहृतस्तं हत्वाऽत्राऽऽयातः। इयं मायावती नाम तव तनयस्य भार्या। अत्र कारणं श्रूयताम्। पूर्वं मन्मथे नाशंगते तदुद्भवपरायणा रतिर्मायारूपेण शम्बरं मोहयामास। काम एवायं प्रद्युम्नत्वेनावतीर्णः। तस्येयं दयिता रतिः' इति॥

तदा चिरनष्टेन पुत्रेण संयुक्तां रुक्मिणीं प्रेक्ष्य सर्वोऽपि द्वारवतीजन आनन्दसाधारणं विस्मयमवाप॥

---

१२. रुक्मिवधः

(सर्वं नष्टं द्यूतेनैव !)

महावीर्यः प्रद्युम्नो रुक्मिणस्तनयां स्वयंवरे जग्राह। तस्यामनिरुद्धो नाम पुत्रो बभूव। सोऽपि रुक्मिणः पौत्रीं वरयामास। तस्या विवाहे हरिणा सह रामाद्यो यादवा रुक्मिणो नगरं भोजकटं जग्मुः॥

अनिरुद्धविवाहे निर्वृत्ते कलिङ्गराजप्रमुखा रुक्मिणमब्रुवन्—'असौ हली अनक्षज्ञोऽपिद्यूते महाव्यसनी दृश्यते। तदेनं द्यूतेन कस्माद्वयं न जयेम'— इति। तथेति रुक्मी अनुमेने॥

अथ सभायां द्यूतं प्रववृते। निष्काणामेकं सहस्रं रुक्मिणा बलदेवो विजितः। द्वितीयेऽपि पणेऽन्यत् सहस्रं जितः। ततो बलभद्रो निष्काणां दशसहस्राणि पणमादद्दे। रुक्मी तान्यजयत्। तदा कलिङ्गाधिपो दन्तान् दर्शयन् सस्वनं जहास। मदोद्धतश्च रुक्मी 'अयं बलो द्यूतानभिज्ञः। मयाऽसौ पराजितः। मुधैवासावक्षावलेपान्ध आत्मानमक्षकोविदं मन्यते'—इति प्राह॥

एतदाकर्ण्य कोपपरीतात्मा हलायुधो निष्ककोटिं ग्लह[1] जग्राह। रुक्मी च तदर्थेऽक्षानपातयत्। तं बलदेवोऽजयत्। 'मया जितम्'—इति चोच्चैः प्राह। 'रे बल, अलमलीकवचनैः। मयैव जितम्'—इति रुक्मिणोद्घुष्टम्॥

'जितं बलेन धर्मेण रुक्मिणो भाषितं मृषा।
अनुक्त्वाऽपि वचः किंचित् कृतं भवति कर्मणा'॥

इत्यशरीरिणी वागुदचरत्।

---

[1] पणम्।

ततः समुत्थाय कोपसंरक्तलोचनो बलोऽष्टाप[1]देनैव रुक्मिणं निजघान। कलिङ्गराजस्य च दन्तान् बभञ्ज। एकं जातरूप[2]मयं महास्तम्भमाकृष्य तत्पक्ष्यान् भूभृतः कृतान्तान्तिकमनयत् ॥

---

१३. नरकवधः

(दण्डं दण्ड्येषु पातयेत्।)

त्रिभुवनेश्वरः शक्रो द्वारवतीमागत्य शौरये प्राग्ज्योतिषपुरेश्वरस्य विचेष्टितमाख्याय तस्य प्रतीकारमयाचत। तदा भगवान् वासवं हस्ते गृहीत्वा वरासनात्समुत्थाय सत्यभामासहितो गरुडमारुह्य तत्पुरं प्रययौ ॥

तत्र मुरं हयग्रीवं पञ्चजनं च हत्वा महासैन्येन नरकेण संग्राममकरोत्। शस्त्रास्त्रवर्षं मुञ्चन्तं नरकं दैत्यचक्रहा चक्रेण द्विधा चक्रे ॥

अथ नरकेणापहृतेऽदितिकुण्डले गृहीत्वा भूमिर्जगन्नाथमुपतस्थे। 'नाथ, यदा शूकरमूर्तिना त्वयाऽहमुद्धृता तदाऽयं त्वत्स्पर्शसम्भवः पुत्रो मय्यजायत। सोऽयं त्वयैव दत्तस्त्वयैव विनिपातितः। भगवन्, इमे कुण्डले गृहीत्वाऽस्य सन्ततिं पालय'—इति चाब्रवीत्। तथेत्युक्त्वा गोविन्दो नरकावसाद् महान्ति रत्नानि, कन्यानां शताधिकषोडशसहस्रं, षट्सहस्रं चतुर्दन्तान् गजान्, काम्बोजानां चाश्वानामेकविंशतिं नियुतानि, नरककिङ्करैर्द्वारकां प्रेषयामास। वारुणं छत्रं मणिपर्वतं च गरुडे समारोप्य स्वयं सत्यभामासहायस्तमारुह्य कुण्डले दातुं त्रिदिवालयं जगाम ॥

---

[1] अक्षद्यूतफलकेन. [2] सुवर्णमयम्.

१४. पारिजातवृत्तान्तः

(भर्त्रा स्त्री का न गर्विता ।)

स्वर्गद्वारं गतो हरिः शङ्खमुपाधमत् । तदा देवास्तमर्घ्यपात्रैरुपतस्थिरे । तैरर्चितः कृष्णो देवमातुर्निवेशनं प्रविश्य तां च प्रणम्य कुण्डलोत्तमे दत्वा नरकनाशं शशंस । अदित्या कृतानुज्ञो देवराजो जनार्दनं यथावत् पूजयामास ॥

ततः सत्यभामया सह कृष्णो नन्दनादीनि देवोद्यानानि ददर्श । तत्र शच्याह्लादकरं जातरूपसमत्वचं सुगन्धाढ्यं पारिजातं विलोक्य सत्यभामा गोविन्दं प्राह—"एष देवपादपः कस्माद् द्वारकां न नीयते? 'सत्ये, यथा मे त्वमभीष्टा तथा न जाम्बवती न च रुक्मिणी'-इति त्वयाऽसकृदुक्तम् । गोविन्द, यदि तदुपचारकृतं न स्यात् तर्हि मद्गेहनिष्कु[1]टार्थायायं तरुर्नीयताम् । अस्य मञ्जरीं केशपक्षेण बिभ्रती सपत्नीनां मध्ये शोभेयेति कामये' इति ॥

'शचीपरिग्रहं पारिजातं हर्तुं नार्हसि—' इति वनरक्षिभिर्निवारितोऽपि गोविन्दः प्रहस्य पारिजातं गरुत्मत्यारोपयामास । तदा कुपिता सत्यभामा तानाह-"का शची? को वा शक्रः? एषोऽमृतमन्थने समुत्पन्नः सर्वलोकानां सामान्यः । 'भर्तृबाहुमहागर्वा शची यथैनं रुणद्धि तथैव सत्या हारयति । यदि त्वं भर्तुर्दयिता यदि च पतिस्तव वश्यस्तर्हि वृक्षं हरतो मद्भर्तुर्निवारणं कारय'-इति कथ्यताम्" इति ॥

रक्षिभिर्यथोदितमुक्ता शची त्रिदशाधिपतिं पतिमुत्साहयामास । समस्तदेवसैन्यपरिवृतः शक्रो वज्रमादाय पारिजातार्थे योधयितुं हरिं प्रययौ । युद्धाय समुपस्थितं शक्रं निरीक्ष्य

---

[1] गृहोद्यानम्.

गोविन्दः शङ्खनिर्घोषं चकार। ततस्त्रिदशा अनेकशोऽस्त्रशस्त्राणि मुमुचुः। जगदीश्वरो लीलयैव तानि सहस्रधा चिच्छेद। छिन्नेषु तेषु वासवो वज्रं चिक्षेप। तद् गृहीत्वा भगवान्–तिष्ठ तिष्ठेति देवराजमब्रवीत्॥

अथ पलायनपरायणं देवेन्द्रं सत्यभामा प्राह—'त्रैलोक्येश्वर, न युक्तं शचीभर्तुः पलायनम्। पारिजातस्रगाभोगा शची त्वामुपस्थास्यते। शक्र, अलं प्रयातेन। नार्हसि व्रीडां गन्तुम्। अयं पारिजातो नीयताम्। यतः पतिगर्वावलेपेन मां गृहे यातां शची बहुमानपुरःसरमुपचारेण न ददर्श, ततोऽहं भवता सह विग्रहं कृतवती। तदलं पारिजातेन' इति॥

एवमुक्तो देवराजो विनिवृत्य हरिमस्तौत्। 'भगवन्, अयं पारिजातो द्वारवतीं पुरीं नीयताम्। त्वया त्यक्ते मर्त्यलोकेऽयं भुवि न स्थास्यति'—इति च भगवन्तं प्रसादयामास॥

ततो हरिर्द्वारकामागत्य पारिजातं सत्यभामानिष्कुटे स्थापयामास। एकस्मिन्नेव च शुभे काले नरकावासात् समुपानीताः शताधिकषोडशसहस्रं कन्यास्तावन्ति रूपाणि कृत्वा भगवान् मधुसूदन उपयेमे॥

---

१५. उषाहरणम्

(रुद्राणां शंकरश्चास्मि।)

शोणितपुराधिपस्य बाणस्योषा नाम सुता शंभुना सह क्रीडन्तीं पार्वतीमुपलक्ष्य स्वभर्त्रा सह क्रीडाविषयां स्पृहां चक्रे। तां सकलचित्तज्ञा गौरी प्राह–'राजपुत्रि, अलं परितापेन। त्वमप्यचिरादेव भर्त्रा सह रंस्यसे। यो वैशाखशुक्लद्वादश्यां स्वप्ने तवाभिभवं करिष्यति, स ते भर्ता भविष्यति' इति॥

तस्यां तिथौ कश्चित् पुमान् स्वप्ने बाणसुताया अभिभवं चकार। तस्मिन् रागपूर्णा यदा सा प्रबुद्धा तदा कान्तभ्रान्त्या 'क्व गतोऽसि'—इति ससंभ्रमं सखीं चित्रलेखा[1]मुक्तवती। 'कोऽयं त्वयोच्यते?'—इति तया पृष्टा राजपुत्री सर्वं वृत्तान्तं कथयामास। तत्प्राप्त्युपायांश्च चिन्तयितुं प्रार्थयामास॥

ततश्चित्रलेखा सुरान् दैत्यान् गन्धर्वान् मनुष्यांश्च प्रधानतः पटेऽभिलिख्यास्या अदर्शयत्। सा तु सुरादीनपास्य मनुष्येषु दृष्टिं ददौ। तत्राप्यन्धकवृष्णिषु कृष्णरामौ विलोक्य लज्जाजडा बभूव। प्रद्युम्नदर्शने च व्रीडायुक्तां दृष्टिमन्यतो निनाय। कान्ते प्रद्युम्नतनये दृष्टमात्रे लज्जां निराकृत्य 'सोऽयं सोऽयम्'--इति निरादिशत्। तत उषां समाश्वास्य योगगामिनी चित्रलेखा प्रद्युम्नतनयमानेतुं द्वारवतीं जगाम॥

पूर्वं त्रिलोचनमुपेत्य 'देव, आहवं विना बाहुसहस्रेण निर्विण्णोऽस्मि। किं मम भुजैः। युद्धं विना भारायैव ते भवन्ति। कच्चिद् ममैषां बाहूनां साफल्यजनको रणो भविष्यति?'—इति बाणः पप्रच्छ। 'यदा ते मयूरध्वजभङ्गो भविष्यति तदा पिशिताशिजनानन्दं रणं प्राप्स्यसि'—इति तं शंकरः वरं ददौ। तेन प्रहृष्टो बाणो गृहमागत्य ध्वजभङ्गमालोक्य हर्षान्तरं ययौ॥

एतस्मिन्नेव काले चित्रलेखा योगविद्याबलेनानिरुद्धमानीय कन्यान्तःपुरे स्थापयामास। उषया सह रममाणं तं विलोक्य रक्षिणो दैत्यभूपतेः शशंसुः। तेन दुरात्मनाऽऽदिष्टं किंकराणां सैन्यमनिरुद्धो लोहपरिघमादाय निजघान। हतेषु तेषु युध्यमानो बाणोऽपि तेन निर्जितः। तदा मायया योद्धुं मन्त्रिभिश्चोदितो बाणस्तं यदुनन्दनं पन्नगास्त्रेण बबन्ध॥

---

[1] बाणस्य मन्त्रिणः कुम्भाण्डस्य सुता.

'अनिरुद्धः क्व यातः'–इति जल्पद्भ्यो यदुभ्यो नारदस्तं बाणेन बद्धमाचचक्षे। तच्छ्रुत्वा बलप्रद्युम्नसहितो हरिर्बाणस्य पुरं प्रययौ॥

तत्र गत्वा पुरप्रवेशाधिकृतान् प्रमथान्[1] संक्षयं नीत्वा विष्णुर्दानवानां बलं लीलया चूर्णयामास। बाणत्राणाय युध्यमानं शङ्करं गोविन्दो जृम्भणास्त्रेण जृम्भयामास। जृम्भिते शङ्करे, गुहे च विनिर्जिते नन्दीशसंगृहीताश्वं महारथमधिरूढो बाणो योद्धुमाययौ। बाणेन छिद्यमानेष्वशेषेषु शरेषु दैत्यचक्रारिर्हरिस्तस्य बाहुवनं छेत्तुं सुदर्शनं चक्रं मुमोच। छिन्नं बाहुवनं विलोक्य महादेवो बाणनाशायोद्यतं गोविन्दं 'प्रभो, प्रसीद। अस्य बाणस्य मयाऽभयं दत्तम्। मम वचस्त्वया नानृतं कार्यम्। अस्मत्-संश्रयवृद्धोऽयं तवापराद्धो भवितुं नार्हति'—इति क्षामयामास॥

"शङ्कर, युष्मद्दत्तवरो बाणो जीवतु। यत्त्वयाऽभयं दत्तं तदखिलं मयैव दत्तम्॥

योऽहं स त्वं जगच्चेदं सदेवासुरमानुषम्।
अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः"॥

इत्युक्त्वा कृष्णः प्रद्युम्नसकाशं जगाम। रामकार्ष्णि-दामोदरा द्वारकामाजग्मुः॥

१६.वाराणसीदहनम्

(अद्य परसामर्थ्यः सदर्पः को भवेन्न हि।)

पौण्ड्रको वासुदेवोऽज्ञानमोहितैर्जनैः 'त्वं वासुदेवोऽवतीर्णः'–इति संस्तुत आत्मानं वासुदेवं मन्यमानः सर्वं विष्णुचिह्नं बभार। 'चक्रादिकं चिह्नं मदीयं च नाम त्यक्त्वा जीवितार्थाय मे प्रणतिं व्रज'—इति च संदेशं हर्तुं स कृष्णायदूतं प्रेषयामास॥

---

[1] रुद्रपार्षदान्.

दूतवचनं निशम्य जनार्दनः प्रहस्य तं प्राह—'अहं निज-चिह्नं चक्रं त्वयि समुत्स्रक्ष्यामि। श्वस्ते शरणमभ्येत्य तथा करिष्यामि यथा भूयो मे भयं न भविष्यतीति मद्वचनात् स पौण्ड्रकस्त्वया वाच्यः' इति॥

अथ गरुत्मन्तमारुह्य भगवांस्तत्पुरं प्रययौ। केशवोद्योगं श्रुत्वा सर्वसैन्यपरिवृतः काशिपतिरभिमुखं गत्वा तेन सह युयुधे। जनार्दनो गदाचक्रनिपातैः काशिराजबलं क्षयं नीत्वा शार्ङ्गधनुर्मुक्तैः शरैस्तस्य शिरश्छित्वा काशिपुर्यां चिक्षेप॥

तं वासुदेवेन हतं ज्ञात्वा तत्सुतः पुरोहितेन सहितः शङ्करं तोषयामास। 'भगवन् त्वत्प्रसादाद् मे पितृहन्तुर्वधाय कृत्या समुत्तिष्ठतु'—इति प्रीतान्महेश्वरात् स वरं वव्रे॥

ततो वरप्रभावसंभूतां महाकृत्यामायान्तीमवेक्ष्य द्वारावतीजनो जगतां शरण्यं शरणं ययौ। 'इमामुग्रां कृत्यां जहि'—इत्युक्त्वा चक्रिणोत्सृष्टं सुदर्शनं चक्रं तामनुजगाम। चक्रप्रतापविध्वस्ता कृत्या तदा वाराणसीं प्रविवेश। कृत्यागर्भां तामशेषां पुरीं दग्ध्वा तत् प्रस्फुरद्दीप्ति चक्रं विष्णोः करमभ्याययौ॥

---

१७. हस्तिनापुरकर्षणम्

(प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते.)

जाम्बवतीसुतः साम्बः स्वयंवरकृतक्षणां दुर्योधनतनयां बलादादत्तवान्। तेन क्रुद्धाः कर्णदुर्योधनादयस्तं युधि निर्जित्य बबन्धुः। ततो यादवाः कौरवान् निहंतुं महोद्यमं चक्रुः। तान् निवार्य बलः प्राह—'अहमेकस्तत्र यास्यामि। मद्वचनात्ते साम्बं मोक्ष्यन्ति' इति॥

हस्तिनापुरं गत्वा बाह्योपवने निविष्टाय बलाय दुर्योधनादय उदकमर्घ्यं च प्रत्यवेदयन् । सर्वं विधिवद् गृहीत्वा रामस्तान् कौरवानाह—'साम्बमाशु विमुञ्चतेत्युग्रसेन आज्ञापयति' इति ॥

तद्वचः श्रुत्वा कुपिताः कौरवाः, 'रे बलभद्र, किमेतद्भवतेरितम्? को यादवः कुरुकुलोत्थानामाज्ञां प्रदास्यति? न भवतो न चाप्युग्रसेनस्य शासनात् पापाज्जं साम्बं विमोक्ष्यामः'—इत्युक्त्वा नागसाह्वयं नगरं विविशुः ॥

एवमधिक्षितो हलायुधोऽतिताम्राक्षो निष्कौरवामुर्वीं कर्तुं समस्तैः कुरुभिः सह गजसाह्वयं पुरं भागीरथ्यां प्रक्षेप्तुं मतिं चक्रे । कर्षणाधोमुखं हलं प्राकारवप्रे विन्यस्य मुसलायुधश्चकर्ष । सहसा हस्तिनापुरं विचलितं विलोक्य सर्वकौरवाः संक्षुब्धहृदयाः 'राम महाबाहो, क्षम्यतां क्षम्यताम् । प्रसीद प्रसीद । एष सपत्नीकः साम्बस्तव समर्पितः'—इति चुक्रुशुः ॥

ततो नगराद् निष्क्रम्य कौरवाः पत्न्या समन्वितं साम्बं निर्यातयामासुः । बलदेवोऽपि प्रियं वदतां भीष्मादीनां क्षमां प्रददौ । तत्पुरमद्याप्याघूर्णिताऽऽकारं लक्ष्यते ॥

साम्बेन सह द्वारवतीमागत्य बलभद्रो यज्ञविध्वंसकं नरकसखं द्विविदं नाम वानरं जघान ॥

---

१८. यदुकुलोपसंहारः

(लोकान् समाहर्तुमिह प्रवृत्तः ।)

एवं बलदेवसहायवान् कृष्णो जगतः कृते दैत्यानां दुष्टक्षितीशानां च वधं कृत्वा फल्गुणेन समं समस्ताक्षौहिणीवधात् क्षितेर्भारमवतारयामास । ततो विप्राणां शापव्याजेन स्वकुलमुपसंहृतवान् ॥

एकदा यौवनोन्मत्ता यदुकुमारकाः पिण्डारके महातीर्थे विश्वामित्रं कण्वं नारदं च ददृशुः। भाविकार्यप्रचोदिताश्च ते स्त्रीरूपधरं साम्बं तेषां पुरतो नीत्वा प्रणिपातपुरःसरं प्रोचुः— 'भगवन्तः, इयं पुत्रकामस्य बभ्रोः स्त्री किं जनयिष्यति'–इति। 'सा मुसलं जनयिष्यति येनाखिलयदुकुलोत्सादो भविष्यति'–इति कुपिता मुनयोऽवदन्॥

अचिरादेव साम्बस्योदराद् मुसलं जज्ञे। कुमारेभ्य एतत् सर्वं श्रुत्वोग्रसेनस्तदायसं मुसलं चूर्णमकारयत्। महोदधौ प्रक्षिप्तः स चूर्ण एरका[1]रूपेण प्ररुरोह। तस्मिन्नेव क्षिप्तं मुसलस्यावशिष्टं खण्डं मत्स्योदराज्जरासंज्ञो लुब्धो जग्राह॥

अथ द्वारकायां दिव्यभौमान्तरिक्षगानुत्पातान् दृष्ट्वा तत्प्रशमाय प्रभासं गन्तुं भगवान् यादवान् प्रचोदयामास। विपरीतानि निमित्तानि समीक्ष्य भगवदाज्ञायोद्धवो नरनारायणस्थानं प्रययौ। सर्वे च यादवाः कृष्णरामादिभिः सार्द्धं शीघ्रगान् रथानारुह्य प्रभासमाजग्मुः। तत्र स्नात्वा सुरापानं कुर्वतां तेषां परस्परं सङ्घर्षेण क्षयावहोऽतिवादेन्धनः कलहाग्निः प्रजज्वाल। दैवविमोहितास्ते शस्त्रैः परस्परं हन्तुं प्रावर्तन्त। क्षीणशस्त्राश्च प्रत्यासन्नामेरकां जगृहुः। कृष्णेन निवारिता अपि सहसाऽभ्येत्यैरकारूपिभिर्वज्रैस्ते परस्परं निजघ्नुः॥

तदानीमेव पश्यतो दारुकस्य चक्रिणो रथोऽश्वैरर्णवे हृतः। हरिं प्रदक्षिणीकृत्य चक्रं गदा शार्ङ्गतूणौ शङ्खोऽसिश्चादित्यवर्त्मना जग्मुः। क्षणेन ऋते कृष्णं दारुकं च सर्वे यादवा विनाशमापेदिरे॥

चङ्क्रम्यमाणौ तौ वृक्षमूलकृतासनस्य रामस्य मुखाद् निष्क्रम्यार्णवं प्रविशन्तं महोरगं ददृशतुः। बलस्य निर्याणं दृष्ट्वा केशवो दारुकं प्राह—"सर्वमिदं वसुदेवोग्रसेनयोस्त्वमाचक्ष्व।

[1] धारात्रयोपेतास्तृणभेदाः.

योगे स्थित्वाऽहमप्येतत् कलेवरं परित्यक्ष्यामि। 'इमां नगरीं समुद्रः प्लावयिष्यति तस्माद्भवाद्भिरर्जुनागमः प्रतीक्ष्यः। तस्मिन् निष्क्रान्ते द्वारकामध्ये न स्थेयम्। किंतु तेनैव सह गन्तव्यम्' इति द्वारकावासिजनस्त्वाया वाच्यः। 'स्वशक्त्या मत्परिग्रहः पालनीयः'—इति च मद्वचनादर्जुनो वाच्यः। भवताऽप्यर्जुनेन सह द्वारवतीजनं गृहीत्वा गन्तव्यम्। यदुराज्ये च वज्रोऽभिषेचनीयः" इति ॥

एवमादिष्टो दारुकः कृष्णं पुनः पुनः प्रणिपत्य प्रदक्षिणं च कृत्वा यथोदितं चक्रे ॥

भगवान् गोविन्दोऽपि दुर्वास[1]सो वचः संमानयन् जानुनि पादं कृत्वा योगयुक्तोऽभवत्। स जरा नाम लुब्धको मुसलावशेषलोहनिर्मितेन शरेण तत्पादतलं विव्याध। समीपमागत्य 'अजानता मया हरिणशङ्कयेदं कृतम्। क्षम्यताम्। आत्मपापेन दग्धं मां दग्धुमर्हसि'—इति विलपन्तं व्याधं भगवान् स्वर्गलोकं प्रापयामास। स्वयं चाऽऽत्मन्यात्मानं संयोज्य त्रिविधां च गतिमतीत्य मानुषं देहं तत्याज। तस्मिन्नेव दिने कालकायः कलिर्भूमाववतीर्णः ॥

---

१९. अर्जुनपराभवः

(तद्धनुस्तानि चास्त्राणि स रथस्ते च वाजिनः।
सर्वमेकपदे नष्टं विना तेन महात्मना ॥)

रामकृष्णकलेवरेऽन्विष्यार्जुनस्तयोरन्येषां च संस्कारं लम्भ-

---

[1] एवं च किल भारते कथा। कदाचिद् दुर्वाससमतिथिं भगवान् भोजयामास। तदा च स्वाङ्गं तदुच्छिष्टेन लिम्पन् पादौ नालिम्पत्। तदा च कुपितः स प्राह—'तव पादतलं मरणस्थानं भविष्यति' इति ॥

यामास। रुक्मिणीप्रमुखा अष्टौ महिष्यो हरेर्देहमुपगुह्य हुताशनं विविशुः। रेवती च रामस्य देहमाश्लिष्य तत्सङ्गाह्लादशीतलं ज्वलितं वह्निं विवेश। उग्रसेनवासुदेवौ देवकी रोहिणी चापि तच्छ्रुत्वा जातवेदसं विविशुः॥

ततोऽर्जुनस्तेषां यथाविधि प्रेतकार्यं समाप्य सर्वं जनं कृष्णपत्नीश्च गृहीत्वा द्वारवत्या निश्चक्राम। तां च शून्यां द्वारकां यदुदेवगृहं विहाय महोदधिः प्लावयामास॥

पञ्चनददेशं प्राप्यार्जुनः स्त्रीजनेन सह तत्र वासमकरोत्। तमेकाकिनं दृष्ट्वा लोभोपहतचेतस आभीराः समेत्य मन्त्रयामासुः—'धिगेतदस्माकं बलं यदयमेकोऽर्जुन अस्मानतिक्रम्य स्त्रीजनं नयति। भीष्मादीन् हत्वा गर्वं समारूढोऽस्मानवगणयति। महायामा यष्टीर्गृहीत्वा तावद् ग्रामवासिनां बलं दर्शयिष्यामः' इति। ततो यष्टिप्रहरणाश्च ते दस्यवः पश्यतः पार्थस्य धनं स्त्रीजनं चादाय यथेष्टं जग्मुः। सकलभूभृतां विजेताऽर्जुनोऽपि तान्निवारयितुं न प्रबभौ॥

स्वपराजयेन सुदुःखितो जिष्णुः 'अहो कष्टं कष्टम्। भगवता मुषितोऽस्मि'—इति रुरोद॥

'तौ बाहू स च मे मुष्टिः स्थानं तत् सोऽस्मि चार्जुनः।
पुण्येनैव विना तेन गतं सर्वमसारताम्'॥

इति च ब्रुवन् मथुरां गत्वा वज्रं राजानं चकार।

अथ फल्गुणः काननाश्रयं व्यासं ददर्श। 'पार्थ, कथमीदृशोऽत्यन्तं निःश्रीको विच्छायोऽसि'?—इति पृष्टः स सगद्गदं भगवते व्यासायात्मपराभवं गोविन्दस्य च गमनं यथावदाचष्ट। 'भारावतारार्थमवतीर्णः कालरूपी जनार्दनोऽशेषं तत्कार्यं निष्पाद्य यथेच्छया गतः। अर्जुन, त्वयैकेनैव भीष्मादयो हताः। यथा तेषां तथा तवाऽपि न्यूनाभिभवः कालोत्थ एव। एतत्सर्वं

हरेर्लीलाविचेष्टितम्। तस्मात् पार्थ, त्वया संतापो न कर्तव्यः'—इत्यर्जुनं समाश्वास्य व्यासः पुरावृत्तं कथयामास ॥

"पुरा मेरुपृष्ठे गच्छन्त्यो वरस्त्रियः सलिल आकण्ठमग्नमष्टावक्रं विलोक्य स्तोत्रैस्तं तुष्टुवुः। प्रीताच्च तस्मात् पुरुषोत्तमं पतिं वव्रुः। जलादुत्तीर्णं विरूपमष्टधा वक्रं मुनिं दृष्ट्वा ता वराङ्गना जहसुः। तेन कुपितो मुनिः 'पुरुषोत्तमं भर्तारं लब्ध्वा दस्युहस्तं गमिष्यथ'—इति शापं ददौ। पुनरपि ताभिः प्रसादितः 'भूयः सुरेन्द्रलोकं प्राप्स्यथ'—इत्यनुग्रहं चकार। ताश्च वरयुवतयः केशवं भर्तारं प्राप्य दस्युहस्तं याताः" इति ॥

'भवतामुपसंहारमासन्नं कुर्वता भगवता भवतां बलं तेजो वीर्यं माहात्म्यं चोपसंहृतम्। तस्मात्त्वया परश्वो भ्रातृभिः सह तपसे वनं गन्तव्यम्'—इति व्यासेन समादिष्टोऽर्जुनोऽभ्येत्य पार्थाभ्यां यमाभ्यां च सर्वं निवेदयामास। अर्जुनसमीरितं व्यासवाक्यं श्रुत्वा ते सर्वे परिक्षितं राज्येऽभिषिच्य वनं वव्रजुः ॥

कुसुममाला

The tale of Pûruravas and Urvasi.

Part I.

उर्वशीपुरूरवसोः कथा.

प्रथमोभागः ।

पुरा किल सोमकुलावतंसः पुरूरवा नाम राजा बभूव। स एकदा सूर्योपस्थानान्निवर्तमानः 'परित्रायतां, परित्रायतां, यः सुरपक्षपाती, यस्य वाम्बरतले गतिरस्ती'ति करुणं क्रन्दतमप्सरसां गणं ददर्श। ता अभ्युपेत्य प्रोवाच च। "अलमलमाक्रन्दितेन। कथ्यतां कुतो भवत्यः परित्रातव्या" इति। तासामेकतमा मेनका नाम प्रत्युवाच। "शृणोतु महाराजः। या तपोविशेषपरिशङ्कितस्य महेन्द्रस्य सुकुमारं प्रहरणं, रूपगर्विताया: श्रियः प्रत्यादेशः, स्वर्गस्य चालङ्कारः सा नः प्रियसख्युर्वशी कुबेरभवनात्प्रतिनिवर्तमाना समापत्तिदृष्टेन केशिना दानवेन चित्रलेखाद्वितीया बन्दिग्राहं गृहीता। तदस्मादसुरावलेपाद्वयं परित्रातव्या" इति। तच्छ्रुत्वा पूर्वोत्तरेण दिग्भागेन गतः स जाल्मो दानव इति च विज्ञायैशानीं दिशं प्रत्यश्वांश्चोदयितुं सूतमादिश्य राजा ता आप्सरसः सान्त्वयन्प्रोवाच। "विमुच्यतां विषादो; यतिष्ये वः सखीप्रत्यानयनाय"। इत्युक्त्वा महता रथवेगेन तं मघोनोऽपकारिणमसुरमासादयितुं गते पुरूरवसि ताः सर्वाः हेमकूटशिखरे तदागमनं प्रतिपालयन्त्यस्तस्थुः। अत्रान्तरे राजापि केशिनं पराभूय तद्धस्ताच्चित्रलेखाद्वितीयामुर्वशीमाच्छि-

धाजगाम। उर्वशी सुरारिसंभवेन भयेन बलवत्परित्रस्ता कंचित्कालं प्रकृतिं नापद्यत। किं तु नातिचिराद्रोधःपतनकलुषां प्रसादं गृह्णतीं गङ्गामिव मोहेन मुच्यमानां प्रियसखीमवलोक्य चित्रलेखोवाच। "सखि, विश्रब्धा भव। पराभूताः खलु त्रिदशपरिपन्थिनो हताशाः।" तच्छ्रुत्वा चक्षुषी उन्मील्योर्वशी सखीं पप्रच्छ। "किं महेन्द्रेणे"ति। "न महेन्द्रेण; महेन्द्रसदृशानुभावेनानेन राजर्षिणे"ति सख्या कथिते सा राजानमवलोक्यात्मगतमाह। 'उपकृतं खलु दानवैः' इति। राजापि तन्मनोहरं रूपं प्रेक्ष्य तद्गतमना नेयं तपस्विनो नारायणस्य मुनेः सृष्टिर्भवितुमर्हतीति निश्चिकाय। कुत्रेदानीं मे सखीजनो भवेदित्युर्वश्या पृष्टे राजा हेमकूटस्थिताभिः स्वसखीभिस्ते उभे संयोजयामास। ताः सर्वा अप्सरसः प्रत्यानीतां सखीं महाराजं चापरिक्षतमवलोक्य तं विजयेनावर्धयन्। अत्रान्तरे चित्ररथो नाम गन्धर्वराजस्तदेव शैलशिखरमवततार। आगमनप्रयोजनं च पृष्टोऽकथयत्। "वयस्य, केशिना हृतामुर्वशीं नारदादुपश्रुत्य प्रत्याहरणार्थमस्याः शतक्रतुना गन्धर्वसेना समादिष्टा। ततो वयमन्तरा चारणेभ्यस्त्वदीयं जयोदाहरणं श्रुत्वा त्वामिहस्थमुपागताः। स भवानिमां पुरस्कृत्य सहास्माभिर्मघवन्तं द्रष्टुमर्हति। महत्खलु तत्रभवतो मघोनः प्रियमनुष्ठितं भवते"ति। राजा प्रत्युवाच। "मैवं। ननु वज्रिण एव वीर्यमेतद्यदस्य पक्ष्या द्विषतो विजयन्ते। वसुधाधरकन्दराभिसर्पी हरेः प्रतिशब्दोऽपि नागान् हिनस्ति। तथापि नायमवसरो मम शतक्रतुं द्रष्टुं। त्वमेवात्रभवतीं प्रभोरन्तिकं प्रापये"ति। तथेत्युक्त्वा चित्ररथः सह सर्वाभिरप्सरोभिः प्रस्थितः। उर्वशी तु राजर्षिमामन्त्रयितुमशक्नुवती चित्रलेखामुखेन महाराजेनाभ्यनुज्ञातेच्छामि प्रियसखीमिव महाराजस्य कीर्तिं महेन्द्रलोकं नेतुमिति राजानं विज्ञापयामास। तेनानु-

ज्ञाता च लताविटप एकावली लग्ना इति सव्याजं तां मोचयितुं सखीमभ्यर्थ्य राजानमेवावलोकयन्ती सनिःश्वासं निष्क्रान्ता ॥

राजा तु तां सुरसुन्दरीं गतामवलोक्य मदनशरपीडितस्तस्याः कृते भृशमुत्कण्ठितोऽभूत्। तां तस्यावस्थां दृष्ट्वा तस्य देवी काशीराजपुत्र्यौशिनरी नाम तस्य शून्यहृदयत्वस्य कारणं राज्ञः प्रियवयस्यान्माणवकाद्विज्ञातुं निपुणिकां नाम स्वचेटीमाज्ञापयामास। यथार्थनाम्नी सा निपुणिकाऽतिविदग्धतया भर्तृरहस्यदुर्गभेदनं कृतवती। ततो राजा रहस्यनिक्षेपरक्षणविषये माणवकेन समाश्वासित उर्वशीगतामेव कथां कुर्वन्वयस्येन सहोत्कण्ठाविनोदनार्थं प्रमदवनं प्रविवेश। किं तु वसन्तावतारसूचकं तदभिरामत्वमालोक्य संजाताधिकतरोत्कण्ठः कुत्रापि धृतिं न लेभे। तस्माद्वयस्यमाह। "कोऽप्युपायस्तावच्चिन्त्यतां; येन सफलप्रार्थनो भवेयमि"ति। यावन्माणकः समाधिमास्थायोपायं चिन्तयति तावदाकाशयानेन चित्रलेखासहितोर्वशी प्रतिष्ठानस्य शिखाभरणभूतं राजर्षेर्भवनमुपस्थिता। ते उभे तिरस्कारिणीप्रतिच्छन्ने भूत्वा राज्ञो वयस्येन सह संलापं शृण्वत्यौ तस्थतुः। माणवको राजानमाह। "भो वयस्य, चिन्तितो मयोपायः। स्वप्नसमागमकारिणीं निद्रां सेवतां भवान्। अथवा तत्रभवत्या उर्वश्याः प्रतिकृतिमालिख्यावलोकयंस्तिष्ठ"। राजा प्राह। "सखे, उभयमप्यनुपपन्नम्। मम हृदयं कामस्येषुभिः सशल्यमतः स्वप्नसमागमकारिणीं निद्रां कथमुपलभे। अपरं च यदि तस्याः प्रतिकृतिमालिखामि तर्ह्यालेख्येऽसमाप्त एव मम नयने उद्बाष्पे भवतः। अतो या मम मानसीं रुजं न वेत्ति, विदित्वा वा मामवमन्यते, तस्यामुर्वश्यां मम समागममनोरथमलब्धफलनीरसं विधाय पञ्चबाणः सर्वथा कृती भवतु"। उर्वशी

तद्वचनं श्रुत्वा "स्वामिन्, यदि नामाहमनुरक्तस्य तवोपरि यथा त्वया संभाविता तथा परमार्थतः स्यां; तर्हि किमिति नन्दनवनवाता अपि ललितपारिजातशयनीये मम शरीरकेऽत्युष्णा भवेयुरि"ति तुल्यानुरागपिशुनं काव्यं प्रभावनिर्मिते भूर्जपत्रे लिखित्वा राज्ञः पुरतस्तत्पत्रं न्यक्षिपत्। राजापि तद् गृहीत्वा वाचयित्वा च संजातानन्दो 'धार्यतामयं प्रियायाः स्वहस्त' इत्युक्त्वा माणवकस्य हस्ते तत्पत्रं ददौ। अत्रान्तर एवोर्वशीप्रेषिता चित्रलेखा– ✓ "त्वद्दर्शनसमुत्थेन मदनेन बलवद्बाध्यमानाहं भूयोऽपि महाराजेनानुकम्पनीया"—इति प्रियसख्या विज्ञप्तिं राज्ञे निवेदयामास। सोऽपि ततोऽधिकतरं मदनेन पीडचमानस्तां विज्ञप्तिं परमाह्लादेनानुमेने। यावदुर्वशी राजानं प्रणम्योपाविशति तावदेव "चित्रलेखे, त्वरयोर्वशीं; यतो भरतेन मुनिना भवतीषु यः प्रयोगो नियुक्तस्तमयं सलोकपालो मरुतां भर्ता द्रष्टुमना" इति देवदूताह्वानं ते अशृणुतां। राज्ञानुज्ञाते च स्वर्गमगच्छताम्। गतायां तस्यां राजा वैयर्थ्यमिव संप्रति चक्षुष इति संप्रधार्य तद्भूर्जपत्रावलोकनेन दृष्टिं विलोभयितुकामो माणवकमाह। "उपनय भूर्जपत्रमि"ति। किं तु माणवकस्य प्रमादेन तत्पत्रं तस्य हस्ताद् भ्रष्टं। भर्तारं द्रष्टुमायान्त्या देव्या औशीनर्या समासादितम्। तद्गताक्षरार्थं च परिज्ञाय सेर्ष्यया तयेतस्ततस्तदन्वेषणपरस्य तस्य पुरत एव सहसानीय प्रक्षिप्तम्। राजा तु लोप्त्रेण गृहीतः कुम्भीरक इव प्रतिवचनं दातुमसमर्थ आत्मनः सौभाग्यं प्रच्छादयितुं कथं कथमपि प्रायतत। देवीं तु कुपितां दृष्ट्वाऽ"पराधी नामाहं, प्रसीद रम्भोरु, विरम संरम्भादि"त्यादिवचनैस्तां सप्रणिपातमनुनेतुं प्रवृत्तः। किं तु तत्प्रणिपातमवधूय प्रावृड्नदीवाप्रसन्ना सा सपरिवारा निष्क्रान्ता। अनेन समयेन गतमर्धं दिवसस्य। तस्मात्स्नानभोजने सेवितुं राजा सवयस्योऽन्तःपुरमेव प्राविशत्॥

भरतमुनिप्रयोगं द्रष्टुमना महेन्द्र उर्वशीं ससखीमाह्वाययदिति प्रागेवनिर्दिष्टमेव। तथा च तस्य पुरतः सरस्वतीकृतलक्ष्मीस्वयंवरनामके काव्यबन्धेऽभिनीयमाने तेषु तेषु रसेषु परिषत्तन्मय्यासीत्। किं तु 'भवितव्यतानुविधायीनीन्द्रियाणी'ति वचनानुरोधादुर्वश्या वचनमेकस्मिन् स्थले प्रमादस्खलितमासीत्। यतो लक्ष्मीभूमिकायां वर्तमानोर्वशी वारुणीभूमिकायां वर्तमानया मेनकया पृष्टा। "सखि, समागता एते सकेशवा लोकपालाः। कतमस्मिंस्ते भावाभिनिवेशः?" इति। ततस्तया "पुरुषोत्तम" इति भणितव्ये "पुरूरवसी"ति निर्गता वाणी। तां श्रुत्वा भरतः क्रुद्धस्तां शशाप "येन ममोपदेशस्त्वया लङ्घितस्तेन न ते दिव्यं स्थानं भविष्यती"ति। महेन्द्रेण पुनः प्रेक्षणावसाने लज्जावनतमुखी सा भणिता "यस्मिन् बद्धभावासि तस्य मे रणसहायस्य राजर्षेः प्रियमत्र करणीयम्। अतस्त्वं यथाकामं पुरूरवसमुपतिष्ठ यावत्स त्वयि दृष्टसंतानो भवेदि"ति। तदादेशानुरोधादुर्वशी—अस्तमिते सूर्ये—पुरूरवसमुपस्थातुकामाऽल्पाभरणभूषितं नीलांशुकपरिग्रहमभिसारिकावेषं परिधाय सह सख्या परिवर्तितमिव कैलासशिखरं प्रियतमस्य भवनमुपगता। तदा राजा वयस्येन सह स्वामवस्थामेवोद्दिश्य स्वैरालापं कुर्वाणस्तया दृष्टः। यदा चाहमेवास्योत्कण्ठाहेतुरिति तस्याः संशयच्छेदो जातस्तदा तमुपगन्तुमियेष। किं तु तत्क्षण एव 'इत इतो देवी'ति वचनं श्रुत्वा परं विषादमगमत्। किं तूपवासनियमवेषा राजर्षिमहिषी दृश्यते तन्नैषा चिरमिह स्थास्यतीति चित्रलेखया समाश्वासिता तथैव तिरस्करिणीप्रतिच्छन्नातिष्ठत्। एवमवस्थितायां तस्यां देव्यवधूतार्यपुत्रप्रणिपाता पश्चात्संतप्यमानसापि प्रियानुप्रसादननामकव्रतापदेशेनोपचारातिक्रमं प्रमार्ष्टुकामा तत्रैवागता। तां दृष्ट्वा राजाऽन्यसंक्रान्तप्रेमाऽधिकतरमेव देव्यां दक्षिणोऽभूत्। देव्यपि व्रतानुरूपं गन्ध-

पुष्पादिभिरादौ चन्द्रपादानभ्यर्च्य पश्चाद्राजानं च पूजयित्वा प्राञ्जलिः प्रणिपत्याह। "एषाहं देवतामिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्यार्यपुत्रमनुप्रसादयामि। अद्य प्रभृति यां स्त्रियमार्यपुत्रः प्रार्थयते या चार्यपुत्रसमागमप्रणयिनी तया सह मया प्रीतिबन्धेन वर्तितव्यमि"ति। इदं देवीवचनं श्रुत्वा माणवकोऽपवार्याह। छिन्नहस्ते मत्स्ये पलायिते निर्विण्णो धीवरो भणति 'धर्मो मे भविष्यति'। प्रकाशं च देवीमाह। "भगवति, किं तादृशः प्रियस्तत्रभवान्?" देव्याह। "मूढ, अहं खल्वात्मनः सुखावसानेनार्यपुत्रं निर्वृतशरीरं कर्तुमिच्छामि। एतावता चिन्तय तावत्प्रियो न वे"ति। एवमुक्त्वा निष्क्रान्ता देवी। उर्वश्यपि 'महानुभावया देव्या अभ्यनुज्ञातोऽनन्तरायी मे प्रियसमागमो भविष्यती'ति मन्यमाना राजानं सहसोपसृत्य जयशब्दमुदीरयामास। तेन चाभिनन्दिता तस्यैवासन उपविष्टा। "वयस्य, वसन्तानन्तर उष्णसमये भगवान् सूर्यो मयोपचरितव्यस्तद्यथेयं मे प्रियसखी स्वर्गस्य नोत्कण्ठते तथा त्वया कर्तव्यमि"ति राजानं विज्ञाप्य चित्रलेखा गता। राजापि "तथे"ति प्रतिपद्य मनोरथसंपत्त्या हर्षनिर्भरः कंचित्कालं प्रदोषरमणीयांश्चन्द्रपादान् सेवित्वा वासगृहं प्रविवेश॥

The tale of Pûruravas and Urvasi
Part II.

अथ समतिक्रान्तेषु केषुचिद्दिवसेषु उर्वशी तं राजर्षिममात्यनिवेशितराज्यधुरं गृहीत्वा गन्धमादनवनं विहर्तुं गता। तत्र खलु मन्दाकिन्याः पुलिनेषु स्थिता सिकतापर्वतकेलिभिः क्रीडन्ती विद्याधरदारिका—उदयवती नाम तेन राजर्षिणा निध्यातेति कुपितोर्वशी यतो दूरारूढः प्रणयोऽसहनः ततो

भर्तुरनुनयमप्रतिपद्यमाना गुरुशापसंमूढहृदया स्त्रीजनपरिहरणीयं कुमारवनं प्रविष्टा। प्रवेशानन्तरमेव च काननोपान्तवर्तिलताभावेन परिणतमस्या रूपम्। अथ स राजर्षिस्तस्मिन्नेव कानने प्रियतमां विचिन्वन्नहोरात्रमतिवाहयामास। प्रथमं तावत्तस्य प्रियया वियोग एकपद उपनतः। अपरं च निर्वृतानामप्युत्कण्ठाकारी जलदसमयः संप्राप्तः। तेन तस्य दुःखं दुःखानुबन्धीव संजातम्। तथा चोन्मत्त इव तस्मिन्वने यत्किंचित्तस्य दृष्टिपथमाययौ तत्प्रियाप्रवृत्तिं सोत्सुकं पप्रच्छ। एवं तेन मयूरः परभृता राजहंसश्चक्रवाको मधुकरो नागराजः शिलोच्चयः सरित्कृष्णसारश्च क्रमेणाभ्यर्थिताः। किं तु स सर्वत्र भग्नाशो बभूव। एवं प्रियान्वेषणार्थं परिभ्रमन्नेकदा रक्ताशोकस्तबकसमरागं कमपि शिलाभेदान्तरगतं मणिं ददर्श। 'स च संगमनीयो नाम मणिः शैलसुताचरणरागसमुद्भवो धार्यमाणश्चिरात्प्रियजनेन संगममावहती'ति केनापि मुनिनानुशिष्टस्तं गृहीत्वा पुनः परिचक्राम। अन्ते स एकां कुसुमरहितां लतां दृष्ट्वा तां स्वप्रियानुकारिणीं च मत्वालिङ्गितुं प्रवृत्तः। स्पृष्टमात्रायां लतायां तत्स्थान एवोर्वशी प्रादुर्भूता। राजा तां विलोक्य "दिष्ट्या गतासुना चेतनेव त्वं मया प्रत्युपलब्धासि। त्वद्दर्शनादेव प्रसन्नबाह्यान्तःकरणो ममान्तरात्मा। तत्कथय कथमियन्तं कालमवस्थिता मया विना भवती"ति तामुवाच। उर्वशी प्रत्युवाच "शृणोतु महाराजः। भगवता कुमारेण शाश्वतकुमारव्रतं गृहीत्वाऽकलुषो नाम गन्धमादनकच्छोऽध्यासितः। कृतश्चैष विधिः। 'यैतं प्रदेशं स्त्री प्रवेक्ष्यति सा लताभावेन परिणंस्यति। गौरीचरणसंभवं मणिं विना ततो न मोक्ष्यत' इति। साहं गुरुशापसंमूढहृदया देवतासमयं विस्मृत्य कुमारवनं प्रविष्टा प्रवेशानन्तरमेव वासन्तीलता संवृत्ते"ति। तन्निशम्य

राजा प्राह "सर्वमुपपन्नमधुना। शयने सुप्तमपि मां या प्रवासगतं मन्यसे सा त्वं मदीयं चिरवियोगं कथं सहेथाः। इदं तद्यथा कथितं त्वत्संगमनिमित्तं मुनेरुपलभ्य मणिं तत्प्रभावात्त्वमासादिताऽस्माभिरि"ति वदन्मणिं तामदर्शयत्। सा तं गृहीत्वा मूर्ध्न्यवहद्राजानं चोवाच। "महान्खलु कालस्तव प्रतिष्ठानान्निर्गतस्य। तदेहि निवर्तावह" इति। ततो भर्त्रा सहिता विमानतां गमितेन नवेन पयोमुचा राजधानीमाससाद॥

उर्वशीसहितं महाराजं चिरस्य कालस्य प्रतिनिवृत्तमवलोक्याखिलाः प्रजाः सप्रजा ननन्दुः। ताभिः स ससत्कारोपचारैरनुरज्यमानश्च राज्यमशिषत्। संतानं वर्जयित्वा न तस्य किमपि हीनम्। एकदा तु तिथिविशेष इति सान्तःपुरो गङ्गायमुनयोः संगमे कृताभिषेक उपकार्यां प्रविष्टः। अत्रान्तर एव दुकूलोत्तरच्छदे तालवृन्ताधारे निक्षिप्य कयापि दास्या नीयमानः संगमनीयमणिरामिषशङ्किना गृध्रेणाक्षिप्तः। तदवलोक्यासमाप्तनेपथ्य एव राजा सावेगं प्राह। आत्मनो वधमाहर्ता क्वासौ विहगतस्करः? येन तत्प्रथमं स्तेयं गोप्तुरेव गृहे कृतम्। अतः सायं निवासवृक्षाश्रयिणं विहगदस्युं विचेतुं नागरिकमादिदेश। समनन्तरमेव कञ्चुकी सशरं मणिमादाय राज्ञेऽदर्शयत्। आह च। "त्वद्बलेन मार्गणतां गतेन निर्भिन्नतनुः स वध्योऽपराधोचितं प्राप्यान्तरिक्षात्समौलिरत्नः पतित" इति। राजा "मणिमग्निशुद्धं कृत्वा पेटकं प्रवेशये"ति किरातीमादिश्य कञ्चुकिनं पप्रच्छ। "अपि जानीते भवान्कस्यायं बाण"? इति। स आह। "नामाङ्कितो दृश्यते। किं तु न मे वर्णविचारक्षमा दृष्टिरि"ति राज्ञे शरमुपानयत्। राजा तस्मिन्निमानि नामाक्षराण्यपश्यत्। "उर्वशीसंभवस्यायमैलसूनोर्धनुष्मतः। कुमारस्यायुषो बाणः प्रहर्तुर्द्विषदायुषाम्"। इति। तानि वाचयित्वा स वयस्यमाह। "सखे, कथ-

मेतत्? अन्यत्र नैमिषेयसत्रादवियुक्तोहमुर्वश्या। न च मया गर्भव्यक्तिरालक्षिता कुत एव प्रसूतिः? केवलं कानिचिद्दिनानि तस्या वपुः पाण्डुराननच्छायमलसेक्षणं चाभूत्"। माणवक आह। "मा भवान्सर्वं मानुषीधर्मं दिव्यासु संभावयतु। प्रभावनिगूढानि तासां चरितानि"। राजा प्रोवाच। "अस्तु तावदेवं यथा भवानाह। पुत्रसंवरणे किमिव कारणं तत्रभवत्याः"? माणवकः प्रत्युवाच। "को देवतारहस्यानि तर्कयिष्यति"? इति एवं तयोः संलापे प्रवर्तमाने कञ्चुकी प्रविश्याह। "देव च्यवनाश्रमात्कुमारं गृहीत्वा तापसी संप्राप्ता देवं द्रष्टुमिच्छति"। इति "अविलम्बितमुभावपि प्रवेशये"-त्यादिष्टः कञ्चुकी तथाकरोत्। माणवकः कुमारं विलोक्योवाच। "किं न खलु स एष तत्रभवान् क्षत्रियकुमारो यन्नामाङ्कितो गृध्रलक्षवेधी नाराचः? तथा बहुतरं भवन्तमनुकरोति"। राजा प्राह। "स्यादेवम्। अतः खलु मम दृष्टिरस्मिन्निपतिता बाष्पायते। वात्सल्यबन्धि हृदयं मनसः प्रसादः। एनं चादय परिरब्धुमिच्छामि"। राज्ञाऽभिवादिता तापसी 'सोमवंशविस्तारयिता भवेरि'त्याशिषं प्रयुयुजे। कुमारं च प्राह "जात, प्रणम ते गुरुम्"। कुमारस्तथा कृत्वोपविष्टः। ततो राजा तापसीं पप्रच्छ "भगवति, किमागमनप्रयोजनम्?" तापसी प्रत्युवाच। "शृणोतु महाराजः। एष दीर्घायुरायुर्जातमात्र एवोर्वश्या किमपि निमित्तमवेक्ष्य मम हस्ते न्यासीकृतः। यत्क्षत्रियकुमारस्य जातकर्मादिविधानं तदस्य भगवता च्यवनेनाशेषमनुष्ठितं। गृहीतविद्यो धनुर्वेदेऽभिविनीतः। अद्य पुष्पसमिदर्थमृषिकुमारकैः सह गतेनानेनाश्रमविरुद्धमाचरितं यदनेन गृहीतामिषः किल गृध्रः पादपशिखरे निलीयमानो लक्ष्यीकृतो बाणस्य। तत उपलब्धवृत्तान्तेन भगवता च्यवनेनाहं समादिष्टा 'निर्यातय हस्तन्यासमि'ति। तदिच्छाम्युर्वशीं प्रेक्षितुमि"ति। राज्ञाहूतामूर्वशीं तापसी प्राह। "एष गृहीतविद्य आयुः सांप्रतं कवचधरः संवृत्तः।

तदेतस्य ते भर्तुः समक्षं निर्यातितो हस्तनिक्षेपः। अधुना विसर्जय मामुपरुध्यते ममाश्रमधर्मः"। उर्वशी तु तच्चिरदर्शनेनाधिकतरमातितृष्णा सती कथं कथमपि तां विससर्ज। राजा पुत्रवतीं भार्यां प्रेक्ष्य सानन्दमाह। "कल्याणि, पौलोमीसंभवेन जयन्तेन पुरंदर इवाद्याहममुना तव सत्पुत्रेण पुत्रिणामग्रचः"। तद्वचः श्रुत्वोर्वशी सहसा रोदितुमारेभे। कारणं पृष्टा प्रत्युवाच। "महाराज, प्रथमं पुत्रदर्शनेन विस्मृतवत्यस्मि। इदानीं महेन्द्रसंकीर्तनेन समयो मम हृदयमायासयति। स समयस्त्वेवंविधः अहं पुरा महाराजगृहीतहृदया महेन्द्रेणाज्ञाता। 'यदैष मम प्रियसखो राजर्षिस्त्वयि समुत्पन्नस्य वंशकरस्य मुखं प्रेक्षिष्यते तदा त्वया भूयोपि मम समीपमागन्तव्यमि'ति। ततो मया महाराजवियोगभीरुतया जातमात्र एव विद्यागमनिमित्तं भगवतश्च्यवनस्याश्रमपद आर्यायाः सत्यवत्या हस्तेऽप्रकाशं निक्षिप्तः। अद्य पितुराराधनसमर्थः संवृत्त इति कलयन्त्या निर्यातितो मे दीर्घायुः। तदेतावान्मे महाराजेन संवास" इति। तच्छ्रुत्वा राजा दैवस्य सुखप्रत्यर्थितां निन्दन् प्रियामाह। "सुलभवियोगा परवत्तात्मप्रियाणि कर्तुं न प्रभवति। अतस्त्वं भर्तुः शासने तिष्ठ। अहमपि तव सूनावायुषि न्यस्तराज्यो विचरितमृगयूथानि वनान्याश्रयिष्ये"। इति। ततः कुमारस्यायुषोऽभिषेकसंभाराः क्रियन्तामित्यमात्यपरिषदमादिदेश। तस्मिन्नेव क्षणे भगवान्नारद आकाशादवतीर्णः सर्वैस्तैरर्घ्यादिभिरुपचारैः पूजित आसनं परिगृह्य राजानमुवाच। "श्रूयताम् महेन्द्रसंदेशः। प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिं भवन्तमनुशास्ति। त्रिकालदर्शिभिर्मुनिभिरादिष्टः सुरासुरसंगरो भावी। भवांश्च सांयुगीनः सहायो नः। तेन त्वया न शस्त्रं सन्यस्तव्यम्। इयं चोर्वशी यावदायुस्तव सहधर्मचारिणी भवत्वि"ति। तच्छ्रुत्वोर्वशी हृदयाच्छल्यमपनीतामिव मेने।

राजाप्युवाच। "परवानस्मि देवेश्वरेण"। नारदस्तमभिनन्द्याह। "युक्तम्—त्वत्कार्यं वासवः कुर्यात्त्वं च तस्येष्टमाचरेः। सूर्यस्तेजसाऽग्निं समेधयत्यग्निः सूर्यं च"। इत्युक्त्वा कुमारमायुषं स्वहस्तेनैव यौवराज्येऽभिषिषेच राजानं पप्रच्छ च। "किंते भूयः पाकशासनः प्रियं करोतु?" राजोवाच। "यदि मे मघवा प्रसन्नः किमतः परमिच्छामि? तथापीदमस्तु भरतवाक्यम्॥

परस्परविरोधिन्योरेकसंश्रयदुर्लभम्।
संगतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम्"॥